Sanskrit Sahitya Parishat Series No. 15.

PRAS'ASTAPĀDABHĀṢYAM

With Sūkti on the Bhāṣya

By

JAGADĪS'A TARKĀLAṄKĀRA

EDITED WITH

Sūktidīpikā and Bengali elucidation etc. etc.

BY

KĀLĪPADA TARKĀCHĀRYA

ADHYĀPAKA, SANSKRIT SAHITYA PARISHAT.

Published by

THE SANSKRIT SAHITYA PARISHAT.

Shyambazar, Calcutta.

Price { 10 ... ers / for ... }

संस्कृतसाहित्यपरिषद्ग्रन्थमालायां १५श-संख्या

वैशेषिकदर्शने

प्रशस्तपादभाष्यम्

[द्रव्यग्रन्थात्मकम्]

जगदीशसूक्तिसहितम्

संस्कृतसाहित्यपरिषदाचार्य्य-

श्रीकालीपदतर्काचार्य्येण

स्वकृतसूक्तिदीपिकाख्यटीका-वङ्गभाषामयभाष्यतात्पर्य्य-
प्रभृतिभिः समलङ्कृत्य सम्पादितम्

भारते भातु भारती

कलिकाता-संस्कृतसाहित्यपरिषद्भवनात्

प्रकाशितम्

Printed by
ABINASH CHADRA MANDAL at the
SIDDHESWAR PRESS
29, Nando Kumar Chowdhury 2nd Lane, CALCUTTA.

विषयसूचिः

—००—

भूमिका

वैशेषिकदर्शनस्य सप्तपदार्थपरत्वम्—विदितमेवेदं भारतीयदार्शनिकानाम् यथा षट्सु प्रथितास्तिकदर्शनेषु वैशेषिकमेकतमं पदार्थतत्त्वनिर्णयप्रधानं दर्शनमिति। तत्र मुख्यतया प्रतिपादिताः षट् पदार्था द्रव्यगुणकर्म्मसामान्यविशेषसमवायाः, त एव गौणतयाऽभावस्यापि अभ्युपगमेनाभावसप्तमाः। न च 'द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्' इति सूत्रेण पदार्थषट्कमात्रप्रतिपादनात्, 'न वयं षट्पदार्थवादिनो वैशेषिकादिव'दिति सांख्यसूत्रादिभिरपि कणादतच्छिष्यप्रशिष्यादीनां षट्पदार्थवादित्वस्य विशेषतः समुल्लेखात्, 'धर्म्मं व्याख्यातुकामस्य षट्पदार्थोपवर्णनम्। सागरं गन्तुकामस्य हिमवद्गमनोपमम्'। इति षट्पदार्थवादितया समुल्लिख्यैव वैशेषिकदर्शनकाराणामधिक्षेपोपक्षेपादन्यथा च वैशेषिकदर्शनसिद्धाः षडेव पदार्थाः प्रसिध्यन्ति, नाभावसप्तमा इति शङ्कनीयम्, श्रीभगवदुदयनाचार्य्यादिभिरेतच्छङ्कायाः सुसमाधानात् (१)। विस्तरः सूक्तिदीपिकायामनुसन्धेयः

न्यायवैशेषिकयोर्मतभेदादिकम्—नव्यनैयायिकैरपि संक्षेपतस्तदेव मतमुपाददानैः प्रवर्त्तितं नव्यन्यायशास्त्रं, यस्य हि परिभाषाप्रद्योतकतया

---

(१) तदुक्तं किरणावल्याम्—'एते च पदार्थाः प्रधानतयोद्दिष्टाः, अभावस्तु स्वरूपवानपि पृथक् नोद्दिष्टः प्रतियोगिनिरूपणाधीननिरूपणत्वात्, न तु तुच्छत्वात्, उत्पत्तिविनाशचिन्तायां प्रागभावप्रध्वंसाभावयोः वैधर्म्म्ये च इतरेतराभावात्यन्ताभावयोः तत्र तत्र दर्शयिष्यमाणत्वा'दिति। तथा न्यायकन्दल्याम्—'अभावस्य पृथगनुपदेशः भावपारतन्त्र्यात्, न त्वभावात्' इति।

तथा कणादसूत्रविवृतौ—'अत्र षट्पदार्थकीर्त्तनं भावाभिप्रायेण वस्तुतोऽभावोऽपि पदार्थान्तरतया मुनेरभिप्रेतः, अत एव द्वितीयाह्निके कारणाभावात् कार्य्याभाव इति सूत्रस्य, नवमाध्याये 'क्रियागुणव्यपदेशाभावात् इत्यादिसूत्राणाञ्च नासङ्गतिः। अत एव न्यायलीलावत्याम् अभावश्च वक्तव्यो निःश्रेयसोपयोगित्वात् भावप्रपञ्चवत् कारणाभावेन कार्य्याभावस्य सर्वसिद्धत्वादुपयोगित्वसिद्धेरित्यभिहितम्' इति।

सुचिरमधीयते नव्यन्यायविद्यार्थिभिः सप्तपदार्थोपदेशको(१) भाषापरिच्छेदो नाम। न च वैशेषिकमतप्रतिपादक एवायमिति वाच्यं 'एतेषां पाकजत्वन्तु चितो नान्यत्र कुत्रचि'दित्यनेन तत्रैव स्वारसिकतया स्वमतमुपक्षिप्य 'तत्रापि परमाणौ स्यात् पाको वैशेषिके नये' इत्यनेन स्वमतभिन्नतया वैशेषिकमतस्य संसूचनात्। साम्प्रतिकनैयायिकानां पदार्थतत्त्वनिर्णये सप्तपदार्थवाद एवावलम्बो न्यायमताविरोधेन सुतरामस्य प्रतिष्ठानात्। बहुभिरेव टीकाकारादिभिरक्षपादोपक्षिप्तषोड़शपदार्थानामत्रैव सप्तसु पदार्थेषु प्रवेशस्य सङ्कीर्त्तनाच्च (२)। सन्ति च ये ये न्यायवैशेषिकदर्शनयोः पदार्थतत्त्वमधिकृत्यावान्तरभेदाः, ते ते परस्परविशेषसाधनाय नितरामलं भवन्ति। तद्यथा न्यायदर्शने चत्वारि प्रमाणानि वैशेषिके दर्शने च प्रमाणद्वयी(३) न्याये समवायः प्रत्यक्षः, वैशेषिके चानुमेयः,(४) न्याये अवयविनि पाकः, वैशेषिके चावयवेषु(५) इत्येवं रीत्या वैषम्यमुपगन्तव्यम्।

सप्तानाञ्च तेषां पदार्थानां सामान्यतो विशेषतश्च भाष्यादिभिरेव सुव्याख्यातत्वात् नात्र तद्विषयावलम्बनः समीचीनः प्रयास इति मन्यमानास्ततो विरमामः। पदार्थानां तत्त्वज्ञानस्य निःश्रेयसोपयोगित्वादिकमपि सविशेषं सूक्तिदीपिकाभाष्यतात्पर्य्यादिभिरेव सुविशदीकृतमास्ते।

---

(१) 'द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम्। समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः'। इति भाषापरिच्छेदः।

(२) 'सर्व्वेषामपि पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम्' इति अन्नंभट्टकृततर्कसंग्रहः।

(३) 'प्रत्यक्षमेकं चार्व्वाकाः काणादसुगतौ पुनः। अनुमानञ्च तच्चाथ सांख्याः शब्दञ्च ते अपि। न्यायैकदेशिनोऽप्येवमुपमानञ्च केचन। अर्थापत्त्या सहैतानि चत्वार्य्याहुः प्रभाकराः। अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा। सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः।' इति सर्व्वमतसंग्रहः।

(४) 'प्रत्यक्षः समवाय इति नैयायिकास्तदप्यनुपपन्नं समवायोऽतीन्द्रियः आत्मान्यत्वे सति असमवेतभावत्वात् मनोवत् कालादिवद्वा' इति वैशेषिकसूत्रोपस्कारः।

(५) 'एतेषां पाकजत्वन्तु क्षिता'वित्यादिः भाषापरिच्छेदः।

वैशेषिकदर्शनसंज्ञाभेदाः—तदिदं वैशेषिकदर्शनं औलूक्यदर्शनमिति(१) काणाददर्शन(२)मिति)वैशेषिकदर्शन(३)मिति च बहुविधाः संज्ञा बोधकतया अङ्गीकरोति। तत्रास्य संज्ञाभेदवीजमिदमेव विश्रूयते यथा,—औलूक्यः उलूकर्षिगोत्रसम्भूतः तत्कृतं दर्शनम् औलूक्यदर्शनमिति। एतेन वैशेषिकदर्शन-मतप्रवर्त्तकतया प्रथितस्य कणादापरनाम्नः काश्यपस्य औलूक्य इत्यपि गोत्रकृतं नामान्तरमित्यायाति। अत एव कुत्रचित् औलूक्य इत्यत्र औलूक इत्यपि निर्देशो दृश्यते।

वैशेषिकदर्शनमिति संज्ञावीजम्—वैशेषिकदर्शनमिति संज्ञाया नाना-विधं वीजमनुसन्धीयते। तत्र प्रथमं तावत् विशेषेण अन्त्यलक्षणेन(४) संसृष्टं दर्शनं वैशेषिकदर्शनम्। तथाहि अन्यत्र दर्शने तथाभूतस्य विशेषस्य अनुपदेशात्

---

(१) सर्व्वदर्शनसंग्रहे एतत्सप्तपदार्थवादविचारप्रकरणे तन्मतस्य औलूक्यदर्शनतया माधवाचार्य्येण कृतः परिग्रहः।

आवश्यकाभिधे जैनग्रन्थे 'षट्लू'वंशोद्भवेन रोहगुप्तेन (रोहगुप्तेन) महावीरसमयात् चतुश्चत्वारिंशदधिकपञ्चशतसंवत्सरेभ्यः परं प्रादुर्भूतेन वैशेषिकदर्शनं प्रवर्त्तितमिति यतो दर्शनस्य नामान्तरं चलूदा इति (इदं नाम औलूक्य इत्यस्य अपभ्रंशः स्यात्) इति क्विथ्साहवमहोदयानामाशयः। 'इह किल पूर्व्वमजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये कणादाय स्वयमोश्वर उलूकरूपधारी प्रत्यक्षीभूय द्रव्यगुणकर्म्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश। तदनु स महर्षिर्लोकानुकम्पया षट्पदार्थरहस्यप्रपञ्चनपराणि सूत्राणि रचयाञ्चकार। इति राजशेखरकृतन्यायकन्दलीटीका औलूक्येति नाम्नो वीजा-न्तरं सूचयति। एतद्विशेषविवरणानि वाराणसीमुद्रापितन्यायकन्दलीभूमिकायामालोच्यानि।

(२) कणादस्य इदमिति काणादं दर्शनमिति स्पष्टम्। कणादशब्दार्थः सूक्तिदीपि-कायामेव विवृतोऽस्माभिः।

(३) उक्तं प्रशस्तपादेन—'योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्। चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः।' इति प्रशस्तपादभाष्यान्ते।

'कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं सांख्यन्तु कपिलेन वै।' इति पद्मपुराणम्।

(४) 'अन्यत्र अन्त्येभ्यो विशेषेभ्य' इति वैशेषिकदर्शनसूत्रम्।

अत्र च विशेषेण स्वतन्त्रतया तदुपदेशादेतद्दर्शनस्य दर्शनान्तरव्यावृत्तेः स्फुटतया लाभेन दर्शनान्तरव्यावर्त्तिकेयमस्य संज्ञेति।

द्वितीयं तावत् एकदेशिनां मते अत्यन्तविशेषगुणोच्छेद एव मोक्षः, (१) न तु दुःखात्यन्तोच्छेदः, अत एव मुक्तेः सर्वदर्शनप्रतिपाद्यतया तत्रैव विशेषगुणमादाय दर्शनान्तरैर्लक्षण्यस्य उपपादितत्वात् विशेष एव वैशेषिक इति स्वार्थे ष्णिकप्रत्ययेन तत्सम्बन्धितया दर्शनसंज्ञा, विशेषेण विशेषगुणेन संसृष्टमिति वार्थस्तत्र कर्त्तव्यः।

तृतीयं तावत् विगतः शेषः यस्य तत् विशेषं निरवशेषं तदेव वैशेषिकम्। तथाहि षोड़शपदार्थवादिप्रभृतिभिः पदार्थानां षोड़शसंख्यादिकमुपगम्य ये ये पदार्था उपपादिताः सप्तपदार्थमात्रवादिनां वैशेषिकाणामपि प्रस्थानेन ते ते निरवशेषाः सिद्धा, अत एव पदार्थतत्त्वानि निःशेषमधिजिगमिषूणाम् आदितः सप्तपदार्थनामश्रवणमात्रेणैव नोपयुक्तो विरागः, एतेनैव सर्वपदार्थानां निःशेषमुपदेशादिति नाम्नापि स्वदर्शने तत्त्वजिज्ञासुप्रवृत्तिरनुकूलिता।

चतुर्थं तावत् विशेषणं विशेषः पदार्थानां लक्षणपरीक्षादिभिः प्रतिपादनम्, स एव वैशेषिकम्, स्वार्थिका अपि शब्दाः कदाचित् स्वलिङ्गवचनानि अतिवर्त्तन्त इति नयेन स्वार्थिकष्णिकप्रत्ययान्तस्यापि लिङ्गपरित्यागो न विरुध्यते। एतेन सांख्यवेदान्तग्रन्थादिषु साक्षात् मुक्त्यनुकूलपदार्थानामेव सविशेषविचारेण सृष्टितत्त्वाद्यालोचनेन च पदार्थतत्त्वेषु तथा सम्यग्दर्शनं नो सम्भवतीति तत्प्रयोजनकतया न्यायवैशेषिकादीनामत्यन्तमुपयोगित्वेन तत्प्रकारैरेव सिद्धान्तितत्वात् तदर्थिकेयं संज्ञा। तत्रापि न्यायदर्शनतत्त्वस्य लाघवमभिप्रेत्य केवलमेतेनैव विचारितेन पदार्थतत्त्वे सम्यग्दर्शननिष्पत्तिरिति प्रथयितुं नाम्ना तत्प्रतिपादनेन मुमुक्षुप्रभृतीनां साम्मुख्यमुपपादितं भवतीति ध्येयम्।

(१) 'अशेषविशेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिरिति तत्त्वज्ञानान्निःश्रेयस'-मित्यन्तसूत्रोपस्कारे शङ्करमिश्राः। 'एके तावद्वर्णयन्ति समस्तविशेषगुणोच्छेदे संहारावस्थायामाकाशवदात्मनोऽत्यन्तावस्थानं मोक्ष' इति भासर्व्वज्ञकृतन्यायसारसन्दर्भस्य जयसिंहसूरिकृतन्यायतात्पर्य्यदीपिकायाम् 'एके इति औलूक्याः' इति। एकदेशिनामित्युक्तिश्च बहुत्रैव दुःखात्यन्तोच्छेदस्य वैशेषिकमतसिद्धमुक्तित्वस्य आचार्य्यादिभिरुपदेशात्।

पञ्चमं तावत् विशेषो भेदः विशेषो विशेषगुणश्च ताभ्यां संसृष्टं दर्शनं वैशेषिकम्। तथाहि वेदान्तदर्शने आत्मनो भेदो नाभ्युपेयते विशेषगुणश्च। अत्र दर्शने आत्मनां भेदः, तद्वृत्तिविशेषगुणाश्चाभ्युपेयन्ते। कापिलैः आत्मभेदमङ्गीकुर्वाणैरपि नात्मनो विशेषगुणवत्त्वम्। अत एव अनया संज्ञया स्वदर्शनस्य आत्मभेदपरत्वं आत्मसगुणत्वपरत्वञ्चेति द्वयं प्रतिपादयद्भिः कणादमहर्षिभिः सांख्यवेदान्तादिभिरस्य गतार्थत्वं नास्तीति प्रतिपाद्यते। वीजान्तराणि पुनरनुसन्धेयानि।

वैशेषिकदर्शनाध्यायादिकथा—अस्य दर्शनस्य दश अध्यायाः, प्रत्यध्यायमाह्निकद्वयं, तदेवं सम्भूय विंशतिराह्निकानि सम्पद्यन्ते। अध्यायविषयास्तु स्वयमालोचनेन वा वङ्गीय-एसियाटिकसोसाइटीसभाप्रकाशित-निर्घण्टपत्रसमोच्चयाद् वा सुबोधा इति ग्रन्थविस्तरभिया नात्र तदुल्लेखः।

वैशेषिकदर्शनव्याख्यानकथा—एतद्दर्शनस्य प्रत्येकं सूत्रमधिकृत्य पृथक्तया व्याख्यानद्वयं प्राचीनम् एकञ्च नवीनमनुलक्ष्यते। तत्र एकं शङ्करमिश्रकृतवैशेषिकोपस्काररूपम्, अन्यत् भारद्वाजवृत्त्याख्यम् (१)। एतद्द्वयमेव प्राचीनम्। नवीनञ्च बहुलतन्त्रस्वतन्त्राणां वङ्गालङ्कारभूत-महामहोपाध्याय-चन्द्रकान्ततर्कालङ्कार-महाभागानां कृतिः वैशेषिकसूत्रभाष्यं नाम।

---

(१) भारद्वाजवृत्तिर्नाम वैशेषिकसूत्रव्याख्यानं यद्यपि अद्यत्वे नोपलभ्यतेऽस्माभिः, तथापि वाराणसीमुद्रितन्यायकन्दलीसहितप्रशस्तपादभाष्यटिप्पन्यां विद्वद्वरविन्ध्येश्वरीप्रसादद्विवेदमहाभागैः स्वयं 'वाराणसामिकस्य सन्यासिनो निकटे तालपत्रेषु मैथिलाक्षरैर्लिखितं जीर्णत्वात् समन्ताच्छिन्नं भारद्वाजवृत्तिपुस्तकं वर्त्तते, तच्च पत्राङ्कानामपि छिन्नत्वात् किं केन पत्रेण संयोज्यमित्यपि कर्त्तुमशक्यम्। प्रारम्भपत्रस्य प्रथमपृष्ठे वैशेषिकसूत्रवृत्तिभारद्वाजीया इति लेखदर्शनात्, यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्म इति सूत्रव्याख्याने शङ्करमिश्रैर्निरूपितस्य वृत्तिकृतस्त्वित्यादिलेखस्य दर्शनात् सेवेयं वृत्तिरिति निर्णीतम्' इति लेखोपन्यासस्य कृतत्वात् तथोक्तम्।

'श्रीगङ्गाधरकविरत्नकविराजकृत-भारद्वाजवृत्तिभाष्यपुस्तके तु सूत्रेषु पाठभेदादयो वर्त्तन्त एव किन्तु अध्यायाह्निकक्रमवैषम्यमपि वर्त्तत इति तत्र मृग्य'मित्यपि तदुक्तिस्तत्रैवोपलभ्यते।

अस्ति चापरं रावणप्रणीतं भाष्यमिति(१), तदपि प्रतिसूत्रमपरभाष्यरीत्या निबद्धमिति कल्प्यते। तदेवं सम्भूय चत्वारि तथा व्याख्यानानि सम्भाव्यन्ते।

सूत्रोक्तविषयान् साकल्येन मनसि कृत्वा प्रकरणग्रन्थरूपेण तदीयव्याख्यानं प्रशस्तपादकृतं भाष्यं शङ्करमिश्रकृतं कणादरहस्यं वल्लभाचार्य्यकृता न्यायलीलावती चेति। न च कणादरहस्ये शङ्करमिश्रेण स्वयमेव 'प्रशस्तपादाचार्य्यभाष्यव्याख्याछलेन कणादरहस्यं व्याख्यास्याम' इत्युक्तत्वात् प्रशस्तपादभाष्यव्याख्यैवेयमिति वक्तुमुचितमिति वाच्यं छलशब्दप्रयोगेण तस्य तथात्वस्य पारमार्थिकतायाः स्वयमेव अपाकृतत्वात् भाष्यप्रतीकाद्यनासादनेन मुख्यतया तस्य भाष्यव्याख्यानत्वस्य उपपादयितुमशक्यत्वात् व्याख्येयप्रतीकाद्यनवलम्बनेन तद्व्याख्यानत्वस्य स्वीकारे एकशेषस्य दुष्करत्वाच्चेति। न्यायलीलावत्यां सृष्टिसंहारविधिनिरूपणारम्भे 'अत्र भाष्ये संहारविधिरुक्तः, स नास्ति प्रमाणाभावादित्येके' इत्यादि सन्दर्भदर्शनात् भाष्यं मनसि कृत्वैव वल्लभाचार्य्याः स्वग्रन्थं न्यबध्नन्, न तु सूत्राणि मनसि कृत्वेति प्रतीयते, अतः न्यायलीलावती भाष्यव्याख्यानमिति केचिदाहुः; तन्न प्रशस्तपादभाष्यस्य वैशेषिकदर्शनव्याख्यानेषु सविशेषप्रामाणिकतया तन्मतपरिपोषणाय एव तदुक्तिरन्यत्र दर्शनेष्विव प्रकृतदर्शनेष्विव वा सुसङ्गच्छते।

प्रशस्तपादभाष्यस्य विशेषतः प्रामाण्यम्—तदेवं कणादकृतवैशेषिकसूत्राणां बहूनि व्याख्यानानि तत्तद्विशेषविवरणाय समुपलभ्यन्त इति स्थितेऽपि तेषु व्याख्यानेषु प्रशस्तपादभाष्यस्य विशेषतः प्रामाण्यं प्रशस्तपादस्य ऋषित्वात् (२) तदुक्तेरदोषप्रयुक्तत्वात् प्राचीनत्वमपि शक्यनिश्चयं बोधायन-

(१) अत्रापि तैरेव पूर्व्वोक्तमहाभागैरुपक्षिप्ता टिप्पनी पर्य्यालोच्या।

कियथाहवमहोदयैरपि 'प्रशस्तपादभाष्यमिव रावणभाष्यमपरं भाष्यं वैशेषिकदर्शनसूत्राणा'मिति वदन्ति।

(२) 'प्रवरैर्ये समाख्याता ऋषयस्त इति श्रुतिः'। इति। प्रशस्तस्य च 'औशनसा दिश्याः प्रशस्ताः सुरूपाचाः महीदराः विकङ्कताः सुनुद्रा निहता इत्येते औशनसाः तेषां त्र्यार्षेयः प्रवरो भवति आङ्गिरसगौतमौशनस इति इत्यादि प्रवराध्याये बौधायनेन निर्देशात् ऋषित्वं सङ्गतम्। 'प्रशस्तस्याभवन् पञ्च पुत्राः सर्वे तपोधनाः' इति शिवरहस्यम्।

सूत्रशिवरहस्यग्रन्थादौ प्रशस्तनामोल्लेखात् प्रायेण सर्व्वैर्व्याख्यातृभिः तद्व्याख्यास्मरणेन (१) स्वकृतौ प्रवर्त्तनस्य बहुत्र सूचितत्वाच्च।

प्रस्तुतभाष्यस्य प्रशस्तपादभाष्यत्वयुक्तिः—अथ इदमेव भाष्यं प्रशस्तपादाचार्य्यकृतमित्यत्र किं मानम्? यद्यपि प्रशस्तपादभाष्यव्याख्याच्छलेन कणादरहस्यं व्याख्यास्याम इति शङ्करमिश्रकृतग्रन्थप्रतीकं दृश्यते, तदन्यविधानुपूर्व्वीकग्रन्थस्य प्रशस्तपादभाष्यत्वेऽपि नासङ्गतं भवतीति चेन्न बहुषु प्राचीनहस्तलिखितपुस्तकेषु एवमानुपूर्व्वीकस्यैव ग्रन्थरत्नस्य पुष्पिकाविलासेन प्रशस्तपादभाष्यत्वकीर्त्तनस्य दृष्टचरत्वात् प्रामाणिकटीकाकारैरुदयनश्रीधराचार्य्यजगदीशादिभिरस्यैव प्रशस्तपादकृतत्वनिश्चयेन तदीयटीकानिर्माणे टीकाव्याख्यानादिनिर्माणे च स्वप्रतिभाया नियोजितत्वात् (२)

---

(१) 'प्रशस्तपादाचार्य्यभाष्यव्याख्याच्छलेन कणादरहस्यं व्याख्यास्याम' इति कणादरहस्ये शङ्करमिश्राः। 'अत्र भाष्ये संहारविधिरुक्त' इति न्यायलीलावत्यां वल्लभाचार्य्याः। 'प्रशस्ताचार्य्यास्तु सिद्धदर्शन' न ज्ञानान्तरमित्याहुरिति' उपस्कारे शङ्करमिश्राः।

(२) भगवता श्रीमदुदयनाचार्य्येण प्रशस्तपादभाष्योपरि किरणावलीटीका निर्म्मिता, श्रीधराचार्य्यैः न्यायकन्दलीटीका निर्म्मिता। उक्तञ्च श्रीधराचार्य्यैः स्वकृतन्यायकन्दलीग्रन्थान्ते क्वचिदुपलभ्यते। कणादकृतमूलदृश्या प्रशस्तभाष्यद्रुमावनद्धा च। श्रीधरहृदयोपवने विलसन्ती न्यायकन्दली रम्या॥' इति। महामहोपाध्याय-जगदीशतर्कालङ्कारभट्टाचार्य्यैः प्रशस्तपादद्रव्यभाष्यग्रन्थोपरि द्रव्यभाष्यसूक्तिरिति सूक्तिरिति द्रव्यभाष्यटीकेति वा नाम्ना टीका कृता। व्योमशिवाचार्य्यैः प्रशस्तपादभाष्ये व्योमवतीनाम टीका कृता। तत्रैव च महामहोपाध्याय-पद्मनाभमिश्रेण सेतुनाम्नी टीका विहिता, यत्समन्वितं प्रशस्तभाष्यं चौखाम्बासंस्कृतग्रन्थमालायां मुद्राप्यमाणमुपलभ्यते। अनुमानतः खृष्टीय-षट्शतवत्सरेभ्यः पूर्व्वं चन्द्रेण दशपदार्थशास्त्रग्रन्थः प्रशस्तपादभाष्यग्रन्थावलम्बनेन प्रणीतः। तस्य केवलमद्यत्वे चैनिकभाषानुवादः समुपलभ्यते। इति। किरणावलीग्रन्थोपरि वर्द्धमानोपाध्यायेन किरणावलीप्रकाशाख्यं, तदुपरि च भगीरथठक्कुरेण द्रव्यप्रकाशिकाख्यं, अपरञ्च रघुनाथभट्टाचार्य्यकृतं गुणप्रकाशविवृतिनामकं, विवृतेरपि व्याख्यानं मथुरानाथतर्कवागीशेन गुणप्रकाशविवृतिरहस्यनामकं, गुणप्रकाशविवृतिभावप्रकाशिकाख्यमपरं रुद्रभट्टाचार्य्यकृतं, तृतीयं रामकृष्णकृतं, चतुर्थं जयरामभट्टाचार्य्यकृतं, अन्यच्च गदाधरेण गुणकिरणावलीदीधितिरहस्यम्, किरणावलीग्रन्थोपरि बलभद्रात्मजपद्मनाभकृतं किरणावलीभास्करनामकं, प्रशस्तपादभाष्य

चित्सुखाचार्य्यादिभिरपि चित्सुखीग्रन्थादौ 'गुणादीनां पञ्चानामपि निर्गुणत्व-निष्क्रियत्वे इति प्रशस्तपादभाष्यदर्शना'दित्यादिग्रन्थेन एतद्ग्रन्थीयप्रतीकस्यैव प्रशस्तपादभाष्यांशत्वस्य प्रतिपादनाच्च। तदिदमेव भाष्यं प्रशस्तपादकृतमित्यविवादम्।

प्रशस्तपादस्य नामविचारः—अथेदानीं प्रशस्तपादस्य नामसम्बन्धी विचारः प्रवर्त्तते —कुत्रचिद्दृश्यते भाष्यस्यास्य प्रशस्तकरकृतत्वमिति। अपरत्र कुत्रापि प्रशस्तपादकृतत्वमिति। अन्यत्र च प्रशस्तदेवाचार्य्यकृतत्वमिति। परत्र च केवलप्रशस्तशब्दप्रयोगेण प्रशस्तकृतत्वमिति। कुत्रचिच्चेतरत्र प्रशस्तकरपादाचार्य्यकृतत्वमित्येतावतो मतभेदानाश्रित्य(१) संशयः समुद्भवति,—किमयं प्रशस्तो वा प्रशस्तकरो वा प्रशस्तपादो वा प्रशस्तकरपादो वा प्रशस्तदेवाचार्य्यो वेति। प्रशस्तचरणादिसंज्ञाभागित्वमपि क्वचिदेषां दृष्टचरमास्ते (२)। तदत्र विनिगमनानुसरणार्थं विचारः प्रवर्त्तनीयो भवति। स चेत्थं यथा बोधायनसूत्रे शिवरहस्ये च प्रशस्तपादस्य प्रशस्तेति नाममात्रोल्लेखात् प्रशस्तेत्येव तन्नाम। करपादचरणदेवादिशब्दास्तु पितृपाद-

---

ब्याख्या-न्यायलीलावतीग्रन्थोपरि रघुनाथभट्टाचार्य्येण तार्किकशिरोमणिना न्यायलीलावती-दीधितिपुस्तकं रचितमुपलभ्यते। इत्यत्र सर्वैरविवादमस्य प्रशस्तपादभाष्यत्वमङ्गीकृत्य तत्तट्टीकाविधौ प्रयत्नः समाहित इत्यस्यैव तथात्वे को वा संशयः।

(१) वाराणसीमुद्रितकिरणावलीपुस्तके 'प्रशस्तपादभाष्ये द्रव्यपदार्थ' इति ग्रन्थस्थले टिप्पण्यां 'प्रशस्तकरीयभाष्ये' इति पाठान्तरमुपन्यस्तम्। अपरञ्च पाठान्तरं तत्रैव 'श्रीप्रशस्तदेवाचार्य्यविरचिते वैशेषिकभाष्ये' इति। मूलञ्च 'प्रशस्तपादभाष्ये' इति। तदेतत्पाठत्रयसमाहारेण त्रिविधं नाम सम्प्राप्तम्। महादेवभट्टकृतमुक्तावलीव्याख्याने 'भाकरे प्रशस्तपादभाष्यादौ' इत्युक्तत्वात् चित्सुखाचार्य्यादिभिरपि तथैव निर्देशात् प्रशस्तपादेति नाम स्यात् 'प्रशस्तस्याभवन् पुत्रा' इत्यादि शिवरहस्यवचनात् 'प्रशस्तभाष्यद्रुमावनद्धा' इति न्यायकन्दलीवचनात् 'प्रशस्ताचार्य्यास्तु सिद्धदर्शनं न ज्ञानान्तर'मित्युपस्कारवचनाच्च प्रशस्तेत्येतन्मात्रस्यापि नामत्वमायाति।

(२) नैयायिकोऽक्षपादः प्रशस्तपादः प्रशस्तचरणोऽक्षचरण इति महर्षेर्गौतमस्यैव नामभेदाः इति किंवदन्ती वृद्धानाम् उट्टङ्किता विन्ध्येश्वरीप्रसादैः।

गुरुपादादिशब्दवत् सम्मानविशेषद्योतका एव। एतदेवोक्तं तत्र भवद्भिरन्यैरपि दार्शनिकैः स्वनिबन्धे। (१)

प्रशस्तपादस्य कालः—प्रशस्तपादस्य कालस्तु निरूपयितुमशक्यो विशेषेण, परं बोधायनसूत्रादौ तदुल्लेखात् तस्य सुचिरन्तनत्वमविवादमेव। अथ बोधायनसूत्रादिना मुनेरेव प्रशस्तस्य समुल्लेखात् अस्य च 'इत्येतदस्मदादीनां प्रत्यक्षम् अस्मद्विशिष्टानान्तु योगिना'मित्यादिग्रन्थेन योगिनां स्वतो वैलक्षण्यप्रस्तावात् मुनित्वमेव व्याहतमिति कथं तदुक्त्या अस्य चिरन्तनत्वसम्भव इति चेन्न तस्य लौकिकोक्त्या सामञ्जस्यात्। अत एव अस्मदादीनामित्यस्य अयोगिनामित्यर्थो न्यायकन्दल्यां विवृतः। बहुत्रैव न्यायकन्दल्यादौ प्रकृतभाष्यकर्त्तुर्मुनित्वमुल्लिखितञ्च दृश्यते।(२)

खृष्टीय-७मशताब्द्यां वर्त्तमानस्य उद्योतकरस्य ग्रन्थे प्रशस्तपादस्य नामोल्लेखो वर्त्तते, ततस्तस्मादयं प्राचीन इति स्थिते खृष्टसप्तमशताब्दीपूर्वकालस्तत्काल आयाति। शङ्कराचार्य्यलेखदर्शनेन ततोऽप्ययं प्राचीन आभाति। उदयनकृतकिरणावलीदर्शनात् प्रशस्तपादस्य तदपेक्षया बह्वोः कालात् पूर्वतः सुप्रतिष्ठा प्रतीयते। रावणभाष्यमपि प्रशस्तपादभाष्यापेक्षया परवर्त्तीति केषाञ्चिदाशयः। दिङ्नागकृतप्रमाणसमुच्चये तु प्रशस्तपादभाष्यापेक्षया पूर्ववर्त्तिभाषास्य वार्त्ता श्रूयते। ततस्तस्य प्राचीनत्वमव्याहतमतः संक्षेपेण सूत्रस्यैवास्य सकलवैशेषिकपदार्थप्रतिपादकतया निपुणव्याख्यातृभिरपि मूलभूतानि सूत्राणि परिहाय अस्यैव व्याख्यानविधौ निरवशेषो यत्नो व्यधायि। सूत्रापेक्षया भाष्यान्तरापेक्षया च अस्य प्रकर्षः स्वयं प्रशस्तपादैरेव प्रारम्भे 'प्रवक्ष्यते महोदय' इत्यत्र प्रशब्देन प्रतिपादित इति विवृतमाचार्य्यैः। (३)

---

(१) 'एतेन प्रशस्त इति भाष्यकारस्य मुख्यं नाम पाददेवादिशब्दस्त्वौपचारिकः' इति वाराणसीमुद्रितन्यायकन्दलीभूमिका।

(२) 'तत्र मुनिर्बन्धघातकपक्षपरिगृहं कुर्म्मन्नाह श्रीभगमेतद्विधान'मिति। न्यायकन्दली। 'भाष्यन्त्वार्षमिति।' पद्मनाभमिश्रकृतकिरणावलीभास्करव्याख्या।

(३) 'स प्रकृष्टो वक्ष्यते। प्रकरणशुद्धेः संगृहपदेनैव दर्शितत्वात्। वैशद्यं लघुत्वं कृत्स्नत्वञ्च प्रकर्षः। सूत्रेषु वैशद्याभावात् भाष्यस्य विस्तरत्वात् प्रकरणादीनाञ्च एकदेशत्वात्।' इति किरणावली।

प्रशस्तपादग्रन्थस्य भाष्यत्वविचारः—प्रशस्तपादाचार्य्यैः कणादसूत्राणां प्रायेण सर्वेषामेव व्याख्यानं प्रणीतम्, परं तत्र चत्वारिंशतः सूत्राणां व्याख्यानं नोपलभ्यते। अस्ति च सूत्रापेक्षया अतिरिक्तानां केषाञ्चन विषयाणां स्रष्टृत्वसंहर्त्तृत्वादिरूपेणेश्वरकल्पनादीनां तत्र सन्निवेश इति पृथगेवायं प्रकरणभूतमूलग्रन्थो, न तु वैशेषिकसूत्रभाष्यमिति केषाञ्चिदाशयः।

किञ्च प्रशस्तपादभाष्ये सामान्यविशेषसमवायानां पदार्थानां निरूपणे सूत्रोपदर्शिततत्त्वविसदृशमेव तत्त्वमुपगृहीतं प्रशस्तपादेन।

तथा गुणनिरूपणे सूत्रकारैरुपक्षिप्ताः सप्तदश गुणाः तत्रैव चकारेण पुनः सप्तानां गुणानां सूचनमनुसन्धाय चतुर्विंशतिरेव गुणाः प्रशस्तपादेन प्रतिपादिताः (१) कृतञ्च हेत्वाभासे विपर्य्ययसाधनं सूत्राणाम् अत एव पृथक्त्वमस्य कल्पनीयम्।

अत्रेदं समाधानम्,—यद्यपि आपातदृष्ट्या चत्वारिंशतः सूत्राणां तत्र व्याख्यानं नोपलभ्यते तथाप्येतद्भाष्योक्तानां विशकलितानामर्थानामादानेन तत्तद्व्याख्यापि उपपादयितुं शक्येत। अतः प्रथमो हेतुरसिद्धः।

किञ्च यद्वि प्रशस्तपादभाष्ये सामान्यादीनां वैशिष्ट्यं तदपि सूत्रकारैर्न निषिद्धमिति 'अप्रतिषिद्धमनुमतं भवती'ति न्यायेन सूत्रकारानुमतमेव तत् तत् प्रतिभाति तदावेदनेन टीकाकृतां टीकाया उपादेयतामात्रं न तु तदीयव्याख्यात्वविघटनमपि इति द्वितीयो हेतुरसिद्धः।

अन्यच्च बहुत्रैव टीकासु दृश्यते चकारादिभिः समुच्चयाद्यर्थप्रतिपादकैर्मूलानुक्ता अपि अर्थाः प्रतिपाद्यन्ते, सिद्धञ्च तत्र तदीयटीकात्वमपि, तदेवं व्यभि-

---

'प्रवक्ष्यत इति—पदार्थधर्म्माणां संक्षेपेणाभिधायको ग्रन्थः प्रकृष्टो मया वक्ष्यत इति ग्रन्थकर्त्तुः प्रतिज्ञा। ग्रन्थस्य चेयं प्रकृष्टता यदन्यत्र ग्रन्थे विस्तरेणेतस्ततोऽभिहितानां इहैकत्र तावतामेव पदार्थधर्म्माणां ग्रन्थे संक्षेपेण कथनम्'। इति न्यायकन्दली।

(१) गुणाश्च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश। चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणा इति। चदृष्टपदेन धर्म्माधर्म्मयोरुपग्रहात् समुच्चितेषु सप्तत्वं सकलेषु च चतुर्विंशतिसंख्या समन्वेति।

चारेण नालं तृतीयोऽपि हेतुरात्मना साध्यं साधयितुमिति तृतीयोऽपि हेतुरस्य पृथक्प्रकरणत्वव्यवस्थापकतया अभिमतो निरस्त एवेति। तदिदं वैशेषिकसूत्रीयं भाष्यमिति निरपवादं वचः।

अत्र केचिदेवमपि प्रत्यवतिष्ठन्ते ननु कथं प्रशस्तपादाचार्य्यकृतस्यास्य वैशेषिकदर्शनग्रन्थस्य भाष्यत्वं? भाष्यलक्षणं हि 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु'रिति। तद्धि प्रकृते ग्रन्थे न समन्वेति। तथाहि आदौ तावदत्र यानि पदानि यथाक्रममभिवीक्ष्यन्ते, तेषां सूत्रक्रमाद्यनुसारित्वविरहात् स्वपदवर्णनाया एकान्ततोऽसत्त्वात् नेदं वैशेषिकसूत्रभाष्यं परं प्रकरणग्रन्थ(१) एवायमिति। किञ्च प्रशस्तपादेन स्वयमपि स्वकीयग्रन्थारम्भे प्रतिज्ञां कुर्वता अस्य ग्रन्थस्य भाष्यत्वमनाख्याय पदार्थधर्म्म(२)संग्रहरूपता प्रकटीकृता, तदप्यस्य भाष्यत्वाभावं सूचयति। अस्ति च श्रीमद्भगवदुदयनाचार्य्यैः किरणावल्यां प्रथमश्लोकव्याख्यानावसरे प्रतिपादितं भाष्यापेक्षया लघुत्वेन अस्य प्रकर्ष (३) इति, तदस्यापि भाष्यत्वे विरुध्यते। लघुत्वस्य भाष्यत्वेन विरोधात् लघुत्वमप्यस्य भाष्यत्वं प्रतिरुन्धे इत्यादि। अतो नेदं भाष्यमिति नव्याः।(४)

तन्न बहुभिरेव दर्शनटीकाकारैरस्य भाष्यतायाः समुद्घोषित(५)त्वात्

---

(१) शास्त्रैकदेशसम्बद्धं शास्त्रकार्य्यान्तरे स्थितम्। आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः। इति प्रकरणलक्षणम्। अस्य प्रायेण समग्रवैशेषिकशास्त्रार्थप्रतिपादकत्वेऽपि सूत्रविशेषाणामव्याख्यानात् लक्षणमिदं प्रकृते समञ्जसं भवति।

(२) प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः। इति स्वीयप्रतिज्ञाश्लोकः।

(३) स प्रकृष्टो वक्ष्यते; प्रकरणग्रन्थैः संग्रहपदेनैव दर्शितत्वात् वैशद्यं लघुत्वं कृत्स्नत्वञ्च प्रकर्षः। सूत्रेषु वैशद्याभावात् भाष्यस्य च विस्तरत्वात्। इति किरणावली।

(४) 'अस्य किमपि भाष्यमिदानीं नोपलभ्यते' इत्यतः समारभ्य तथाच पदार्थधर्म्मसंग्रहो न भाष्यमिति निर्व्यूढम्। तथा च अस्य भाष्याभावमाकलयता मया यथामति भाष्यमिदमकारि इत्यन्तः चन्द्रकान्ततर्कालङ्कारकृतवैशेषिकभाष्यभूमिकाग्रन्थः।

(५) (क) स्वयं प्रशस्तपादेन 'इति प्रशस्तपादाचार्य्यविरचितं द्रव्यादिषट्पदार्थभाष्यं समाप्त'मिति ग्रन्थस्यास्य पुष्पिका लिखिता।

प्राचीनप्रामाणिकतत्तद्व्याख्यातृमतापेक्षया पराचीनानां तदवलम्बानां मतस्य दौर्बल्यसम्भवाच्च। यच्च प्रशस्तपादाचार्य्यकृतग्रन्थस्य तर्कालङ्कारपादैर्भाष्यताया अपलापः, स तु सत्यपि तथा प्रामाणिकभाष्ये स्वीयभाष्यान्तरनिर्म्माण-प्रवृत्तेः समीचीनताद्योतनमूल एवेति केषाञ्चिन्मतं नानुपादेयम्।

न चास्य भाष्यत्वे प्रतिज्ञाश्लोकेन तदनुल्लेखो दोषायेति वाच्यं प्रायेण सर्वत्रैव ग्रन्थानां भाष्यत्ववार्त्तिकत्वप्रकरणत्वादीनां प्रतिज्ञायामनुपन्यासस्य दृष्टत्वात् (१) तत्र तत्र प्रसिद्धानां भाष्यत्वादीनामपलापप्रसङ्गात्।

न च भाष्यलक्षणमुक्तदिशाव्याप्तमिति वाच्यम्। प्रशस्तपादभाष्यस्य सूत्रानुसारिताया बहुत्र स्वयमेव (२) सूत्रसम्मतिप्रदर्शनव्याजेन समुपन्यासात्

(ख) न्यायकन्दल्यां 'अस्माभिरिह भाष्यतात्पर्य्यमात्रं व्याख्यातमिति गुणग्रन्थान्ते श्रीधराचार्य्यैरुक्तम्।

(ग) कणादरहस्ये 'प्रशस्तदेवाचार्य्यभाष्यव्याख्याच्छलेन कणादरहस्यं व्याख्यास्याम' इति कणादरहस्ये शङ्करमिश्रैरुक्तम्।

(घ) गुणप्रकाशविवृतौ 'वक्ष्यति च भाष्यकारो विभागग्रन्थे' इति दीधितिकारैरुक्तम्।

(ङ) मुक्तावलीव्याख्याने दिनकरीये 'आकरे प्रशस्तपादभाष्यादौ इति महादेवभट्टैरुक्तम्।

(च) चित्सुखीग्रन्थे चतुर्थकारिकाव्याख्यायां 'गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे इति प्रशस्तपादभाष्यदर्शनात्' इति चित्सुखाचार्य्यैरुक्तम्।

(१) विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य। विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता। इत्यादि न्यायसूत्रवृत्त्यादिप्रारम्भे विश्वनाथादिभिरपि स्वकृतेर्वृत्तित्वादिरूपत्वानुल्लेखः। वात्स्यायनभाष्यादिप्रारम्भेऽपि नोक्तं वात्स्यायनादिभिः स्वकृतेर्भाष्यत्वम्, अथ च तत्र तत्र वृत्तित्वभाष्यत्वादिकं सुप्रसिद्धमेव। अथ शब्दानुशासनमिति महाभाष्यारम्भे पतञ्जलिना स्वग्रन्थस्य भाष्यरूपस्य भाष्यत्वमपि प्रतिज्ञायामनुल्लिखितमास्ते।

(२) प्रशस्तपादभाष्ये आकाशनिरूपणादौ 'विभववचनात् परममहत्परिमाणम्। शब्दकारणत्ववचनात् संयोगविभागा'विति। 'कारणे काल' इति वचनात् परममहत्परिमाणम्। कारणपरत्वादिति वचनात् संयोगः' इति। धर्म्माधर्म्मावात्मान्तरगुणाना-

किरणावली (१) जगदीशसूक्ति(२) न्यायकन्दल्यादिभिस्तत्र तत्र सम्यक्तया तस्य प्रकटनात्। अतः पदैः सूत्रानुसारिभिरित्यंशलभ्यार्थस्य प्रशस्तपादाचार्य्यग्रन्थे नासङ्गतिर्दृश्यते।

अथ केवलं सूत्रानुसारिभिः पदैरेव ग्रन्थस्य सन्दर्भणं यदि भाष्यताप्रयोजकं तदा वृत्तिमात्रेष्वतिप्रसङ्ग इति 'स्वपदानि च वर्ण्यन्ते' इत्यंशोऽप्युपादेयः, स चात्र नास्तीति चेन्न न्यायकन्दल्यादिटीकाकृद्भिः 'स्वोक्तं विवृणोति' 'स्वयमेव विवृणोति' इत्यादिग्रन्थैरस्य स्वपदवर्णनात्मकत्वस्य प्रदर्शितत्वात्। न च अत्र निखिलानां सूत्राणां निरुक्तरीत्या वात्स्यायनभाष्यादिवत् व्याख्यानाभावात् कथं भाष्यत्वमिति वाच्यं पातञ्जलमहाभाष्यादावपि तया रीत्या व्याख्यानानुपलब्ध्या तस्यापि सुप्रसिद्धमहाभाष्यभावस्य भाष्यताया अभावप्रसङ्गादित्यादिकमूह्यम्।

जगदीशतर्कालङ्कारकृतिः—तदेवमस्य भाष्यत्वे निरपवादे बहुभिः प्राचीनैर्गौरवबुद्ध्या नानाविधव्याख्यानैरस्य विवरणं सुसङ्गच्छते। तत्र बहूनां भाष्यटीकाकृतां निर्देशः पूर्वमेव कृतोऽस्माभिः पादटीकायाम्। तेषु महामहोपाध्याय-जगदीशतर्कालङ्कारभट्टाचार्य्या एवात्र अस्माभिः प्रकृततया सविशेषमालोच्याः। महामहोपाध्याय-जगदीशभट्टाचार्य्याः खलु बहूनां ग्रन्थानां कर्त्तारो बहुग्रन्थटीकाकृतश्च। तत्कृतग्रन्थरूपेण तत्त्वचिन्तामणिदीधिति-

मकारणत्ववचनात्' 'संस्कारः स्मृत्युत्पत्तौ कारणवचनात्। व्यवस्थावचनात् संख्या। पृथक्त्वमप्यत एव। तथा चात्मेति वचनात् परममहत्परिमाणम्' इत्यादि। प्रदर्शितश्च प्रतिभाष्यं सूत्रानुसारित्वं सहैव भाष्यसन्दर्भैरस्माभिः।

(१) किरणावल्यां 'एतेन सौत्रमप्यतः पदं व्याख्यातं' 'एतेन अथातो धर्म्मं व्याख्यास्यामः, यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः, तद्वचनादाम्नायस्य प्रामाण्यम् इति त्रिसूत्री व्याख्याता' इति।

(२) जगदीशसूक्तौ—'कारणे कालाख्ये'ति हि सूत्रकारवचनमिति 'कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे' इति सूत्रमिति 'एषु गुणेषु सूत्रकारसम्मतिमाह आत्मलिङ्गेति।' 'सूत्रकारेणोक्तम् आत्मान्तरगुणेषु आत्मान्तरगुणानामकारणत्वादिति' 'संस्कारसिद्धौ सूत्रकारसम्मतिमाह संस्कारः स्मृत्युत्पत्ताविति'। संख्यायां सूत्रकारसम्मतिमाह व्यवस्थावचनात् संख्येत्यादि'।

प्रकाशिका जागदीशी टीकेति प्रसिद्धा, तत्त्वचिन्तामणिमयूखः(१) गङ्गेशकृत-मूलटीका, सा तु खण्डितैव लभ्या। न्यायदर्शनं न्यायसारावली वा, शब्द-शक्तिप्रकाशिका, तर्कामृतम् इत्येते मूलग्रन्थाः। न्यायलीलावतीव्याख्या द्रव्यभाष्यटीका चेति वैशेषिकदर्शनसम्बन्धिटीकाद्वयी। एका वल्लभाचार्य्य-कृतन्यायलीलावती(२)दीधितिटीका, अपरा प्रशस्तपादाचार्य्यकृतप्रशस्त-पादभाष्यीयद्रव्यग्रन्थोपरि टीका। गुणभाष्यादिटीकाया जगदीशकृताया अद्यापि केनचिदनुपलम्भात् द्रव्यभाष्यमात्रटीका एव तैः कृतेति सर्वेषां निपुण-दर्शिनां मतमुपलभ्यते। (३)

जगदीशतर्कालङ्कारस्य काव्यप्रकाशटीकाकारत्वखण्डनम्—

केचित्तु काव्यप्रकाशरहस्यप्रकाशमपि जगदीशतर्कालङ्कारभट्टाचार्य्यैरेव कृतं पुस्तकम्, (४) यतस्तदारम्भे स्वयमेव 'सम्प्रति स्वमतिप्रीत्यै श्रीजगदीशद्विजो

---

(१) यस्यायमारम्भश्लोकः—'श्रीसार्व्वभौमस्य गुरोः पदाब्जं विद्यार्थिनां कल्पतरोः प्रणम्य। विनिर्म्मितः श्रीजगदीशविज्ञैर्विद्योततामद्य मणेर्मयूखः।' इति। कलिकाता-राजकीयसंस्कृतमहाविद्यालयपुस्तकसूची—३२३—५७५सं।

(२) यस्यायमाद्यश्लोकः—'कर्पूरकुन्दकुमुदकैलासोदरसोदरम्। विघ्नविध्वंसकं धाम नमामः शिवदैवतम्। कणभक्षमुनेः पचरचाविन्यस्तवासनाः। वचांसि जगदीशस्य चिन्तयन्तु विचक्षणाः।' इति।

(३) उक्तं विन्ध्येश्वरीप्रसादद्विवेदिन न्यायकन्दलीभूमिकापादटीकायां—'अस्मन्निकटे अस्य ग्रन्थस्य पुस्तकत्रयमस्ति, देशान्तरेऽपि द्विवाणि पुस्तकानि सन्ति, परन्तु द्रव्यग्रन्थस्यैव व्याख्यानं न तु गुणादीनां कदाचिदेतावानेव ग्रन्थो जगदीशेन रचित' इति।

अस्माभिरपि सुबहु अन्विष्य न लब्धा जगदीशकृतगुणादिटीका, यत्र यत्र भाष्यसूक्तिरस्ति तत्र तत्रैव द्रव्यग्रन्थात्मिका सेति विदितञ्च।

(४) यस्यायमारम्भः—'निद्राणेव मदेकमुद्रितमतौ पुष्पायुधे सायुधे, प्रीतेवार्पित-लोचनाम्बुजवलौ चक्रायुधेऽनायुधे। सेवासीत् कुपितेव किञ्च जगतां विद्रावणे रावणे, शम्भोः कापि कृपा दृगन्तकलिता भिद्यादविद्यामदम्। सम्प्रति स्वमतिप्रीत्यै श्रीजगदीश-द्विजो धीमान् काव्यप्रकाशसूक्तौ सरसरहस्यं प्रकाशयति।' इति।

अन्तश्च—'तत्र शिष्यजिज्ञासाक्रमेण तत्कथनात् शिष्यजिज्ञासानिवृत्तौ वक्तव्याभावेन सम्पूर्णम् अनपेक्षितवाक्यान्तरम्। श्रीः।' इति

धीमान्। काव्यप्रकाशसूक्तौ सरसरहस्यं प्रकाशयति।' इति स्वकृतित्वमस्य समुद्घोषितम्। किञ्च 'सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः' इति तर्कालङ्कारकृतद्रव्यभाष्यटीकादाविव अत्रापि अस्य ग्रन्थस्य जगदीशकृतित्वस्य सूक्तिपदप्रयोगस्य च स्वयमुपवर्णनात् जगदीशतर्कालङ्कारकृतद्रव्यभाष्यटीका-'वचांसि जगदीशस्य चिन्तयन्तु विचक्षणाः' इत्यादितन्निर्म्मितन्यायलीलावतीदीधितिटीकाभ्यामेककर्त्तृकत्वमस्य समं सम्प्रतीयत इति। तदयं काव्यप्रकाशरहस्यप्रकाशग्रन्थोऽपि जगदीशतर्कालङ्कारकृत एवेति निःसंशयं शक्यमुरीकर्त्तुमिति वदन्ति, तन्न समीचीनं तद्ग्रन्थपुष्पिकायां तैरेवास्य जगदीशतर्कपञ्चाननकृतत्वप्रकाशनेन (१) स्वयमेव स्वीयमतस्य सुदूरमुत्सारितत्वात्, नहि जगदीशतर्कालङ्कारो जगदीशतर्कपञ्चाननश्चाभिन्न एवेति प्रतिपादयितुं किमपि प्रमाणमुपलभामहे तदिदमप्रमाणं परिहेयमेवेति।

द्रव्यभाष्यसूक्तौ जगदीशकृतत्वस्थापनम्—अथास्या द्रव्यभाष्यटीकाया जगदीशतर्कालङ्कारप्रणीतत्वे किं मानमिति चेत् प्राचीनहस्तलिखितपुस्तकपुष्पिकादिरेव। निर्णीयते हि नामादिकं ग्रन्थकर्त्तुः शिष्यप्रशिष्यादिक्रमेण तत्कृतत्वप्रसिद्ध्या प्रतिज्ञापुष्पिकादिपर्य्यालोचनैश्च (२)। अन्यथा सर्वत्रैव सर्वकर्त्तृत्वापत्त्या दुर्णिरूपमेव ग्रन्थकर्त्तृनामादिकमर्व्वाचीनैरिति। अत्रापि बहुल प्राचीनहस्तलिखितपुस्तकेषु पुष्पिकाभागे (३) जगदीशतर्का-

---

(१) काव्यप्रकाशरहस्यप्रकाशग्रन्थस्य पुष्पिका यथा—'इति श्रीजगदीशतर्कपञ्चानन भट्टाचार्य्यकृते काव्यप्रकाशरहस्यप्रकाशे अर्थालङ्कारनिरूपको दशमोल्लासः समाप्तः।' इति।

Catalogus catalogram ग्रन्थेऽपि तन्मूलमालम्ब्य महान् भ्रमः कृत इति परं दुःखस्थानमिदम्।

(२) तर्कामृतग्रन्थादौ शिष्यप्रशिष्यादिक्रमेण पुष्पिकायां 'इति श्रीजगदीशभट्टाचार्य्यविरचितं तर्कामृतं समाप्तम्।' इत्यादिदर्शनाच्च कर्त्तृनिर्णयः। गौतमसूत्रादावपि शिष्यादिक्रमेण तत्कृतत्वसिद्ध्यादिना तथा।

किरणावल्यादौ—'न्यातेने किरणावलीमुदयनः सत्तर्कतर्कमयी'मिति प्रतिज्ञादिपर्य्यालोचनैः कर्त्तृनिर्णयः।

(३) पुष्पिका यथा—'इति महामहोपाध्यायभट्टाचार्य्यतर्कालङ्कारकृतद्रव्यभाष्यटीका समाप्ता' इति।

लङ्कारकर्तृत्वस्य दर्शनात् साम्प्रदायिकप्रसिद्ध्या च जगदीशतर्कालङ्कारकृतत्वं विनिश्चीयत इति।

तस्याः पदार्थतत्त्वनिर्णयसंज्ञाविचारः—अस्यैव ग्रन्थस्य पदार्थतत्त्वनिर्णय इत्यपरं नामेति catalogus cutalogram ग्रन्थे ३५७ पृष्ठे दृश्यते, (१) तन्निर्देशानुसारेण एसियाटिक्सोसाइटीगृहं गत्वा ग्रन्थसूचीमवेक्षमाणैरस्माभिः यथानिर्देशं किमपि तत्प्रमाणं नोपलब्धम्। तदिदमित्थमिति कथं वा वयं निश्चेतुं प्रभवामः। पदार्थधर्म्मसंग्रह इति प्रशस्तपादभाष्यस्य व्युत्पत्ति(२)योगात् संज्ञान्तरमिव अस्यापि ग्रन्थस्य पदार्थतत्त्वनिर्णय इतिसंज्ञान्तरे तु नास्त्यस्माकं विसंवादः। एवं रीत्या पदार्थतत्त्वोपदेशः पदार्थोपदेशः पदार्थनिर्णयः पदार्थतत्त्वनिरूपणमित्यादिरपि संज्ञास्य भवितुमर्हति, तदनुक्त्या तु तत्र न्यूनत्वमेव प्रतिपादयितुं शक्यं स्यादिति। तदस्य पदार्थतत्त्वनिर्णय इत्यपरा विशेषसंज्ञेति नास्माकं प्रतिभाति।

द्रव्यभाष्यटीकाया नामभेदाः—अस्याः प्रशस्तपादद्रव्यभाष्यटीकाया बहुत्र बहूनि नामानि समुपलभ्यन्ते। कुत्रचित् द्रव्यभाष्यटीकेति (३) कुत्रचित् भाष्य(४)सूक्तिरिति कुत्रचित् द्रव्यभाष्य(५)सूक्तिरिति क्वचिच्च पदार्थतत्त्वनिर्णय (६) इति। तत्रान्तिमः पक्षो निराकृतपूर्व एवास्माभिः।

---

(१) तत्स्थानं द्रष्टव्यम्।

(२) पदार्थधर्म्मसंग्रह इत्यस्य व्युत्पत्तिर्यथा किरणावल्यां 'पदार्थधर्म्मसंग्रह इति—पदार्था द्रव्यादयस्तेषां धर्म्माः साधर्म्यवैधर्म्यरूपास्त एव परस्परं विशेषणीभूतास्ते अनेन सङ्गृह्यन्ते शास्त्रे नानास्थानेषु वितता एकत्र सङ्कलय्य कथ्यन्ते इति संग्रहः। इति।

(३) V-7-द्रव्यभाष्यटीका—२४८५ नं—पुष्पिका-'इति महामहोपाध्यायभट्टाचार्य्यतर्कालङ्कारकृतद्रव्यभाष्यटीका समाप्ता। इति सं कलेजसूची।

(४) प्रशस्तपादभाष्यस्य अन्यदपि व्याख्यानं जगदीशभट्टाचार्य्यकृतं भाष्यसूक्त्यभिधम् इति वाराणसेयन्यायकन्दलीभूमिकायाम्।

(५) तत्रैव पादटीकायां परिसमाप्तिवाक्यमुद्धृतं दृश्यते कुतश्चित्-यथा—'इति श्रीजगदीशभट्टाचार्य्यकृता द्रव्यभाष्यसूक्तिः समाप्ता' इति।

(६) पदार्थतत्त्वनिर्णय इति संज्ञा Catalogus catalogram ग्रन्थे ३५७ पृष्ठे द्रष्टव्या।

अपरे पश्चा विनिगमनाविरहेण अविशेषतः स्वीकार्य्या अपि 'सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः' इति प्रारम्भश्लोके जगदीशेन कथञ्चित् नामसूचनायाः कृतत्वसम्भावनात् तद्विसदृशास्ते परिह्रीयन्ते (१)। नाम तु अस्य जगदीशसूक्तिरित्येव स्यात् 'जगदीशस्य सूक्ति'मित्यवमस्य निर्देशात्। अत एव अस्माभिरस्याः जगदीशसूक्तिरित्येव संज्ञा परिगृहीतास्ते ग्रन्थकारैरकृते विशेषोल्लेखे विविधनामकल्पनायां स्वातन्त्र्योऽपि विशेषोल्लेखेन तद्बाधस्य सम्भवात्। विविधपुष्पिकादर्शनात् सर्वेषामेव निरुक्तपदानामेकपर्य्यायतया (२) प्रकृतभाष्यनामत्वमित्यपि केचित्। एवं च सत्स्वपि तथा संज्ञाभेदेषु दृश्यमानेषु द्रव्यभाष्यटीका भाष्यसूक्तिः द्रव्यभाष्यसूक्तिः जगदीशसूक्तिरित्येतत् सर्वमेकमेवेति वस्तुगतिः।

चिन्तामणिदीधितिप्रकाशिकादिग्रन्थानामिव नास्ति सूक्तेरस्यापि नव्यनैयायिकविद्वत्सु भूयान् प्रचारः, किं बहुना जगदीशस्य प्रशस्तभाष्यसूक्तिरियमस्तीत्येव बहवो न जानन्ति का कथा तदालोचनतत्त्वनिर्द्धारणयोः। एवंरीत्या कति ग्रन्थाः प्राचीनानां लोकलोचनान्तराले स्ववैयर्थ्यमनुसन्दधते।

किरणावल्यादिकमादर्शीकृत्य जगदीशस्य सूक्तिनिर्म्माणसम्भावनम्—अयं ग्रन्थः श्रीजगदीशेन प्रशस्तपादभाष्यस्य प्रशस्तिमतीं टीकां किरणावलीमनुध्याय न्यायकन्दलीमनुसृत्य च विरचित इति सम्भाव्यते बहुत्र व्याख्यायां तदीयक्रमानुसरणस्य (३) दृष्टत्वात् अन्तरान्तरा तत्कृतव्याख्यायाः

---

(१) जगदीशस्य सूक्तिमित्यनेन जगदीशशब्दस्यापि संज्ञाघटकत्वं सम्भाव्यते, निरुक्तसंज्ञानाञ्च कस्या अपि संज्ञाया जगदीशशब्दाघटितत्वेन सम्भावितनाम्ना वैसादृश्यमनुसन्धीयते।

(२) विभिन्नानुपूर्वीकत्वे सति एकार्थबोधकत्वं पर्य्यायत्वम् इति प्राञ्चः।

(३) ईश्वरं प्रणम्य अत ईश्वरप्रणामादनु पश्चात् कणादं प्रणम्येत्यन्वयः इति जगदीशसूक्तौ, अतः ईश्वरप्रणामादनु पश्चात् कणादनामानं मुनिं प्रणम्येत्यनुषज्यते इति किरणावल्याम् ईश्वरमादौ प्रणम्य ईश्वरप्रणामादनु पश्चात् कणादं प्रणम्येत्यर्थः इति न्यायकन्दल्याम्। इत्येवं बहुत्र।

प्रमाणादिरूपेण समुद्धारात् (१) दोषोद्घाटनमुखेन च क्वचित् क्वचित् तद्ग्रन्थार्थस्मरणात् (२) स्वप्रतिपादितार्थभिन्नार्थकतदीयसन्दर्भसमावेदनाच्चेति (३)। उदयन-श्रीधराचार्य्यापेक्षया जगदीशस्य अर्वाचीनत्वन्तु सिद्धमेव।

किरणावल्यादिकमनुसृत्य जगदीशेन द्रव्यभाष्यटीकाया निर्म्माणे सत्यपि किरणावल्यादिस्वीकृतप्रशस्तपादभाष्यपाठात् अन्यथा (४) पाठः क्वचित् क्वचित् स्वीकृतो जगदीशेनेति तदीयसूक्तिपर्य्यालोचनात् प्रतीयते। क्वचिच्च प्रशस्तपादाचार्य्यभाष्यावलम्बनसूत्राणामपि प्रसिद्धपाठपरित्यागेन अन्यथापाठः (५)

---

(१) अयञ्च क्रमः श्रुतिसिद्धत्वादुपात्त इत्याचार्य्या इत्यादि जगदीशसूक्तौ। अत इति इमौ प्रसाद्येत्यर्थः, अतः पदस्य ल्यब्लोपे पञ्चम्याः साधनात् यतः सच्छिष्या उपसन्ना अतः प्रवक्ष्यत इत्यर्थ इत्याचार्य्याः। निशीत्यस्य निशातुल्य इत्यर्थ इति त्वाचार्य्या इत्यादि बहुच।

(२) प्रलयहेतुभूतादृष्टमेव जन्यद्रव्यनिरोधकमिति आचार्य्यमतन्तु प्रलयप्राक्क्षण एव तादृशादृष्टस्योत्पत्त्यभ्युपगमे शोभत इति ध्येयम् इति जगदीशसूक्तौ।

(३) सृष्टिसंहारस्य सृष्टिप्राक्कालीनप्रलयस्य तेन महाप्रलयस्य व्युदासः। विधिः क्रमः सृष्टिसंहारयोः उत्पत्तिप्रलययोः विधिः कथ्यत इत्यर्थ इत्याचार्य्या इति सूक्तौ। महाभूतानां सृष्टिसंहारयोर्द्वयोर्विधानस्य प्रतिज्ञातत्वात् संहारविधिमुक्त्वा सृष्टिमाह तत इति त्वाचार्य्यस्वरससिद्धस्तत इत्यस्यावतारक्रमः। इति सूक्तौ। निशीत्यस्य निशातुल्य इत्यर्थ इति त्वाचार्य्या इत्यादि च सूक्तौ बहुव।

(४) तच्चेश्वरनोदनाभिव्यक्ताद्धर्म्मादेव इति पाठमङ्गीकृत्य किरणावल्याम् ईश्वरस्य नोदना उपदेशः वेद इति यावत् तेनाभिव्यक्तात् प्रतिपादितात् धर्म्मादित्यर्थः कृतः। सूक्तौ तु तच्चेश्वरदेशनाभिव्यक्ताद्धर्म्मादेवेति पाठमङ्गीकृत्य ईश्वरदेशनया वेदेन अभिव्यक्तात् प्रतिपादितादात्मधर्म्मिकश्रवणमननाद्यात्मकधर्म्मादित्यर्थः कृतः। अस्पर्शवत्त्वाद्द्रव्यानारम्भकत्वं क्रियावत्त्वान्मूर्त्तत्वमिति किरणावलीसम्मतमनोनिरूपणग्रन्थादेः अस्पर्शत्वाद्द्रव्यानारम्भकक्रियावत्त्वान्मूर्त्तत्वमित्याद्यन्यथाकारश्च।

(५) आत्मान्तरगुणानामात्मान्तरेऽकारणत्वादिति सूत्रस्य आत्मान्तरगुणानामात्मान्तरगुणेष्वकारणत्वादित्यन्यथापाठः। इत्यादि बहुलमूह्यम्।

परिगृहीतस्तैरित्यपि तदीयटीका प्रमाणयति। क्वचित् सूत्रानुपूर्व्यामन्यथाकारः, क्वचिच्च एकस्यैव सूत्रस्य द्वैधेन परिग्रह इत्येवं नानाविधं वैषम्यमनुगृहीतं जगदीशेनेति स्पष्टमालोचनया प्रतिभाति (१)। सर्वमिदमस्मदादर्शानुसारेण उपन्यस्तानां सूक्तिसन्दर्भाणां सविशेषालोचनया प्रतिभायात्।

अस्माभिः जगदीशसूक्तिसम्मतपाठानुगतप्रशस्तपादभाष्यादर्शस्य साकल्येन क्वापि अलाभात् यथामति सूक्तिपर्य्यालोचनया तत्सम्मतपाठानुगतभाष्यसन्दर्भव्यवस्था कृता, परतश्च अनवधानेन यत्र यत्र प्रशस्तपादभाष्यसन्दर्भेण सूक्तिपाठस्य वैषम्यं विदुषां प्रतिभासेत तत्र तत्र सविवेकपाठकल्पनया सूक्त्यर्था उपपादयितव्याः।

जगदीशतर्कालङ्कारपरिचयः—अथ जगदीशस्य विशेषतो वैयक्तिकविचारे प्रतिपित्सिते वयमेवं प्रतिपादयामः—जगदीशो नाम श्रीचैतन्यमहाप्रभोः श्वशुरात् सनातनमिश्रात् चतुर्थः पुरुषः। श्रीचैतन्यमहाप्रभुश्च खृष्टीये पञ्चाशीत्यधिकचतुर्दशशततमाब्दे प्रादुर्बभूवेति इतिहासविदामाशयः। तेन च जगदीशस्य पञ्चाधिकषोड़शशततमखृष्टवत्सरे जन्मेति कल्प्यते। एकस्य तर्कामृतग्रन्थखण्डस्य एकत्रिंशदधिकषोड़शशततमवत्सरो लेखकालः समुपलभ्यते, तेनापि तथा कल्पनं दृढ़ीभवति। उक्तञ्च विद्वद्भिः न्यायकन्दलीभूमिकायां यथा—‘जगदीशभट्टाचार्य्यकृतशब्दशक्तिप्रकाशिकापुस्तकस्य १६२४ शालिवाहनशकलिखितस्योपलम्भात् तत्समयात् पूर्वं तद्ग्रन्थकर्त्तुः स्थितिरिति सुव्यक्तम्’ इति।

यत्तु नवनवत्यधिकपञ्चदशशततमखृष्टीयाब्दे तदीयशिष्येण केनापि तत्कृतकाव्यप्रकाशरहस्यटीकायाः स्वहस्तलिखिताया उपलम्भोऽपि तत्र मान-

---

(१) व्यवस्थातो नाना इत्यस्य नानात्मानो व्यवस्थात इति अन्यथाकारः। कारणे काल इत्यस्य कारणे कालाख्येत्यन्यथाकारः। कारणपरत्वात् कारणापरत्वाच्च इत्येतन्मात्रस्य उपस्कारादिसम्मतसूत्रस्य कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे इति पाठो जगदीशेन कृतः।

मिति तत्र शेषतोऽपि पेशलं जगदीशस्य काव्यप्रकाशरहस्यनिर्म्मातृतायाः सर्व्वथा अत्रैव निराकृतपूर्व्वत्वात्।

स चायं शैशवे सुतरां चञ्चलस्वभाव आसीदिति नानाविधकिंवदन्त्यादिभिः (१) सुस्थितं भवति। स हि अष्टादशसंवत्सरे वयसि तर्केषु बहुटीकामूलग्रन्थकृताम् श्रीभवानन्दसिद्धान्तवागीशभट्टाचार्य्याणां चतुष्पाठीं विद्यापरिग्रहाय समलङ्कृतवान् (२)। जगदीशकृत-मणिमयूख(३)ग्रन्थप्रामाण्येन न्यायरहस्यप्रणेतारः श्रीरामभद्रसार्व्वभौमा अपि तदीयगुरव इति निर्णीयते। एतैरपि रामभद्रसार्व्वभौमैः रामभद्रीत्याख्या कुसुमाञ्जलिटीका निर्म्मितेति।

श्रीमता जगदीशेन अनेके तार्किकप्रकरणग्रन्थाः अनेकाश्च तार्किकटीका निबद्धाः समुपलभ्यन्ते। तेषु ग्रन्थेषु च चिन्तामणिदीधितिप्रकाशिका सुतरां प्रशस्यते। तत्रापि व्याप्तिज्ञानकाण्डयोर्व्याप्तिवादे परमं नैपुण्यमेषां प्रतिपन्नं भवति, येन प्रथितयशसां तार्किकप्रकाण्डानां गदाधरसुधियां ग्रन्थमतीत्यापि व्याप्तिवादे जगदीशटीकामेव सुमेधसः समभ्यस्यन्तीति। अयमेव प्रभेदः तत्रभवतोर्व्याख्यातृमुख्ययोर्जगदीशगदाधरयोर्यत् जगदीशः जिज्ञासितमर्थमात्रं स्वल्पाक्षरेण परिष्कृत्य जिज्ञासां विनिवर्त्तयति, गदाधरश्च बहुना प्रपञ्चेन जिज्ञासावतां चित्तमुत्क्षिप्य तामपाकरोतीति तदेवमनयोः प्राचीनैरपि प्रकर्षापकर्षविचारे चित्तविनियोगं कृतमनुष्टणुमः। येन गदाधरग्रन्थान् पाँचाली इत्याख्यया पूर्व्वं व्यवहरन्ति स्म, कालेन पुनर्लाघवात् जनिमतां बुद्धेः सविस्तर एव ग्रन्थः समपेक्षित इति महती प्रशस्तिः प्रादुरभवन्नव्यसम्प्रदायेषु गदाधरग्रन्थानाम्।

---

(१) अत्र जयचन्द्रसिद्धान्तभूषणसम्पादितशब्दशक्तिप्रकाशिकाग्रन्थभूमिकादिकं द्रष्टव्यम्।

(२) श्रीभवानन्दसिद्धान्तवागीशेन कारकचक्रं नाम कारकार्थप्रतिपादकग्रन्थरत्नं तथा चिन्तामणिदीधितिव्याख्यादिकं निर्म्मितमिति।

(३) "श्रीसार्व्वभौमस्य गुरोः पदाब्जं विद्यार्थिनां कल्पतरोः प्रणम्य। विनिर्म्मितं श्रीजगदीशविज्ञैर्विद्योततामद्य मणेर्मयूखः।" इति (Descriptive Catalogue of Mss. in Sanskrit College, Calcutta III P. 324 No. 575) शब्दशक्तिप्रकाशिकाग्रन्थे च स्वयमेव जगदीशेनोक्तं—'इति प्रमन्यायरहस्ये अस्मद्गुरुचरणाः।" इति।

जगदीशनिबन्धेषु भाष्यसूक्तेः प्राथम्यविचारः—जगदीशकृतसूक्तिलेखशैलीं तदीयापरग्रन्थलेखशैलीञ्च पर्य्यालोच्य सूक्तिरियं तदीया पूर्वा कृतिरित्येव प्रतिभासते। एतत्सूक्तिनिर्म्माणावसरे पदार्थतत्त्वानि प्राक्प्रसिद्धानि आलोचितवतो मनसि संक्षिप्तपदार्थतत्त्वनिर्णायकग्रन्थनिर्म्माणाभिलाषस्य समुत्पत्त्या समनन्तरमेव संक्षिप्तरूपेण पदार्थतत्त्वनिर्णायक-तर्कामृतग्रन्थ-निर्म्माणमिति स्यात्। अपरलेखापेक्षया सुतरामदृढैव लेखशैली प्रशस्तपाद-भाष्यसूक्तेरित्यत्र निपुणसमालोचका एव प्रमाणम्। अपि च चिन्तामणि-दीधितिप्रकाशिकालेखस्य सुदृढबन्धस्य परत एव सम्भाव्यत्वात् तदुपक्रमे कृतेरन्तरा भाष्यसूक्तिनिर्म्माणप्रवृत्तेरसम्भाव्यत्वाच्च प्रथमत एवाप्रतिष्ठावस्थायां तथाभूतादृढबन्धटीकानिर्म्माणं सुसङ्गतं भवतीति विश्वसिमः।

किञ्च क्रमेण ग्रन्थनिर्म्माणे प्रावीण्यमुपगतस्य स्वीयप्रौढ़विज्ञाने विश्वास-समुदयात् अनन्तरकृते तर्कामृते स्वयमेव निरुपमत्वविशेषणं (१) सङ्गच्छते, सूक्तिनिर्म्माणप्रारम्भे तु तथा आत्मनः प्रौढ़विज्ञाने विश्वासाभावात् केवलं विचक्षणानां तद्ग्रन्थचिन्तनाभ्यर्थनमेव(२) कृतं जगदीशेनेति इतोऽपि तर्कामृतस्य सूक्त्यपेक्षया उत्तरकालकृतत्वमायाति।

किञ्च प्रशस्तपादभाष्यव्याख्यां कृतवता जगदीशेन यत्र यत्र ग्रन्थस्य न्यूनता व्यलोकि तत्र तत्र स्वीयतर्कामृतग्रन्थे परिपूरणं कृतमित्येव दृश्यते, (३) न तु तत्र टीकायां तदुल्लेखः कृतः। यदि तर्कामृतं पूर्वनिर्म्मितं स्यात् तदा तत्र तत्र टीकास्थले यथा कथञ्चित् प्रसङ्गेन तदुल्लेखः कृतः स्यात्, न चैवं कृतम्। अस्ति

---

(१) 'ब्रह्माद्या निखिलार्च्चितास्त्रिदशसन्दोहाः मदाभीष्टदाः, अज्ञानप्रशमाय यत्र मनसो वृत्तिं समस्तां दधुः। श्रीविश्वेश्वरपादपङ्कजं भवभयध्वंसैकबीजं परं, हृत्पद्मे विनिधाय तन्निरुपमं तर्कामृतं तन्यते।' इति तर्कामृतम्।

(२) 'कणभक्षमुनेः पदरचाविन्यस्तवासनाः। सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः।' इति सूक्तिः।

(३) 'अथ श्रुतिः श्रूयते' इत्यारभ्य 'संक्षेपतः पदार्थो द्विविधः भावोऽभावश्च' इत्यादि तर्कामृतग्रन्थाः पर्य्यवेक्षणीयाः।

चेयं शैली ग्रन्थकृतां यत् समानविषये सति स्वकृते ग्रन्थान्तरे अनुषङ्गतः तत्-प्रतिपादितमर्थं ते सूचयित्वा प्रकृतग्रन्थलाघवमभिप्रयन्तीति (१)। तर्कामृत-ग्रन्थस्य अपरस्य वा जगदीशकृतस्य ग्रन्थान्तरस्य सूक्तौ नामापि नोपलभ्यते। न च तेनैव हेतुना वैपरीत्यमपि कथं न सम्भाव्यतामिति वाच्यं तर्कामृत-ग्रन्थस्य समग्रविषयविज्ञापकप्रकरणतया सूक्तिसंहितविषयोद्धारस्य तत्रापेक्षा-भावात् सत्तावात्मनः सविशेषाख्याराहित्यस्यापि सुसम्भवत्वाच्च।

किञ्च जगदीशसूक्तौ दृश्यते बहुत्र आचार्य्यमतानुवर्त्तनमात्रं पदे पदे च आचार्य्यमतसमुल्लेखेन आत्ममतसमर्थनादिकम्। तदपि तट्टीकाया प्रथम-लिखितत्वं प्रमाणयति। यावत् तर्केषु सिद्धिमात्मनो नोपलक्षितवान् ताव-देव परमतप्रमाणेनात्मनो मतस्य प्रामाण्यमुपपादयितुं सप्रयत्न आसीदित्येव सुयुक्तिकम्, यावच्च तर्के सिद्धिमात्मनः समुत्प्रेक्षितवान् तावदेव स्वमभ्रान्तं मत्वा स्ववचनमेव प्रमाणरूपेण पर्य्याप्तं मेने इति स्थितम्।

तदेवं बहुभिरेव हेतुभिः जगदीशसूक्तिः श्रीजगदीशतर्कालङ्कारभट्टाचा-र्य्याणां प्रथमो ग्रन्थ इति निश्चेतुं शक्यते, तत एव च तार्किकसमाजेषु तथा तस्य प्रसिद्धिर्नोपलभ्यते, ग्रन्थगतप्रौढ़िप्रकर्षस्यैव प्रायेण ग्रन्थप्रकर्षप्रयोजकत्वात्। न च तथात्वेऽपि द्रव्यभाष्यटीकाया अप्रामाणिकत्वं शङ्कनीयं प्रायेण प्रतिपदं तस्या मूलानुगतत्वात् बहुत्रैव उदयनमार्गानुसारित्वाच्च। अत एव मूलभूत-प्रशस्तपादभाष्यस्य ऋषिप्रणीतस्य तर्केषु लब्धसिद्धभावस्य उदयनस्य किरणा-वल्याश्च प्रामाण्येनैव एतत्प्रामाण्यं निरपवादं व्यवतिष्ठते।

सम्पादकीयविशेषनिवेदनम्—सूक्तिरियमद्य यावत् न केनापि साक-ल्येन प्रकाशिता, चौखाम्बा-संस्कृतग्रन्थमालायां अस्या अंशतः प्रकाशने कृतेऽपि तदंशस्य बहुलप्रमादपर्य्यालोचनया संस्कृतसाहित्यपरिषदा सेयं प्रकाश्यते। अहञ्च तत्र नियुक्तः सम्पादकरूपेण यथामति आदर्शद्वयीं सूक्तेः प्रविचार्य्य वाराणसीमुद्रितवैशेषिकदर्शनादिसाहाय्येन पाठभेदादिकं विनिर्दिश्य प्रथमतः प्रशस्तपादभाष्यं प्रकरणभेदेन सन्निवेश्य ततस्तदवलम्बनसूत्राणि

(१) तत्रागुणवत्त्वमिति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फुटम् इति व्याप्तिपञ्चके मथुरानाथः।

ततो जगदीशसूक्तिं तदनन्तरं स्वकृतां सूक्तिदीपिकानाम्नीं संस्कृतमयीं सूक्तिविवृतिं ततोऽपि वङ्गभाषामयं भाषातात्पर्य्यं विन्यस्य पुनः पादटीकायां विविधपाठान्तरादिकञ्चोपनिबध्य प्रारब्धमस्याः सम्पादनम्। तत्र यथाशक्ति समुत्कर्षसाधने कृतं प्रयत्नशतम्, साफल्ये तु प्रमाणं विपश्चित एव।

अस्य वस्तुनः सम्पादने प्रथमतः समुपकृतं मे संस्कृतसाहित्यपरिषद्ग्रन्थालयेन सूक्तेरादर्शद्वयीं वितीर्णवता।

पदार्थतत्त्वविज्ञानविशेषे च परमनुगृहीतोऽस्मि तार्किककुलमुकुटालङ्कारहीरैः तत्रभवद्भिः महामहोपाध्याय-श्रीकामाख्यानाथतर्कवागीशपादैः परमपूज्यपादतार्किकप्रवरैः स्वीयपितृदेवैश्च श्रीहरिदासतर्कतीर्थमहाभागैः।

एतद्भूमिकागतवस्तुविशेषसंग्रहणेन च नितरामुपकृतोऽस्मि परमस्नेहास्पदेन मदीयान्तेवासिना एम्-ए-काव्यतीर्थोपाधिकेन श्रीमता चिन्ताहरणचक्रवर्त्तिना, यस्य प्रतिभातिभारो बहुषु प्रत्नतत्त्वादिवस्तुषु स्वल्पेनैव कालेन व्यशूयत। तदयं श्रीमान् सुदीर्घं जीवन्नात्मनः प्रतिभया यशो महदनुभूयात्। लब्धश्च मया सुमहानुपकारः काशीधामनि प्रकाशितेभ्यः माननीयविन्ध्येश्वरीप्रसादद्विवेदिसम्पादित-न्यायकन्दलीसहितप्रशस्तपादभाषाग्रन्थादिभ्यः। तदेतेषां सर्वेषामेव यथासम्भवसम्माननादिपुरःसरं वयं कृतवेदितामावेदयामः।

अन्ते च विपश्चितामन्ते विज्ञापयामः—यत् हंसवृत्तिमुपाददानाः श्रीमन्तः सन्तमत्र गुणलेशमपि परिगृह्णन्तु, दोषांश्च भूयसोऽपि मय्येव विज्ञापयितुं परिवर्जयन्त्विति।

१३३२ वङ्गाब्दीय-
चैत्रसंक्रान्त्याम् }

सुधीविधेय—
श्रीकालीपददेवशर्म्मणः

ॐ नमः परमात्मने

वैशेषिकदर्शने

प्रशस्तपादभाष्यं जगदीशसूक्तिसहितम्

प्रशस्तपादभाष्यम्

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।
पदार्थधर्म्मसंग्रहः प्रवक्ष्यते महोदयः॥

[अथातो धर्म्मं व्याख्यास्यामः। १अ। १आ। १सूत्रमालम्बनम्]

जगदीशसूक्तिः

ॐ नमो दुर्गायै (१)।

कणभक्षमुनेः पक्षरक्षाविन्यस्तवासनाः।
सूक्तिं श्रीजगदीशस्य चिन्तयन्तु विचक्षणाः॥

ग्रन्थारम्भे विघ्नविघाताय कृतस्य ईश्वर(२)प्रणामस्य शिष्याणां शिक्षार्थमादौ निबन्धपूर्वकं प्रवृत्त्यङ्गमभिधेयं दर्शयति प्रशस्तकरपादाचार्य्यः(३) प्रणम्येति। ईश्वरं प्रणम्य, अतः ईश्वरप्रणामात् अनु पश्चात् कणादं प्रणम्येत्यन्वयः। यद्वा ईश्वरं प्रणम्य अनु पश्चात् कणादं प्रणम्य

(१) ॐ नमः शिवाय (ख)पुस्तके।

(२) ईश्वरादि (ख) पुं।

(३) प्रशस्तपादाचार्य्यः (ख) पुं।

अतः इमौ ईश्वरकणादौ प्रसाद्य वक्ष्यत इत्यन्वयः। इमौ प्रसाद्येत्यर्थे अतःपदस्य ल्यब्लोपे पञ्चम्या (४) साधनात्। यतः सच्छिष्या उपसन्ना अतः प्रवक्ष्यत (५) इत्याचार्य्याः। वस्तुतः अतः अनेन प्रशस्तकरपादाचार्य्येणेत्यर्थः। 'सर्वविभक्तिभ्यस्तस्' इति तृतीयायास्तस्विधानादिति युक्तमुत्पश्यामः (६)।

पदार्थानां भावपदार्थानां (७) ये धर्म्माः साधर्म्यवैधर्म्यरूपास्तेषां संग्रहः संक्षेपेण कथनं यत्र स पदार्थधर्म्मसंग्रहः भाष्यनामा ग्रन्थः। प्रवक्ष्यते प्रकृष्टं यथा स्यात् तथा वक्ष्यते। वचनस्य प्रकर्षश्चात्र साकाङ्क्षत्व-योग्यत्वादिरूपो ग्राह्यः, संक्षिप्तत्वस्य संग्रहपदेनैव प्राप्तत्वात्।

ग्रन्थासम्पादकस्य ईश्वरस्य ग्रन्थनिर्व्वाहार्थं नतिर्व्यर्थेत्याशङ्कामपनेतुमीश्वरं विशेषयति हेतुमिति। कार्य्यमात्रस्य हेतुभूतमिति तदर्थः।

ननु कणादोक्तानामेव पदार्थधर्म्माणां यदि संक्षेपेण संग्रहः क्रियते, तदा जीवत्वेन(८) विप्रलम्भकस्य कणादस्यैव वचसि विवेचकानां नास्था, प्रागेव तदुक्तस्य संक्षेपेण वचने इत्याशङ्कामपाकुर्व्वन् कणादं विशेषयति मुनिमिति मननशीलमित्यर्थः। तथा च मुनेर्मुक्त्यन्यफलनिरपेक्षत्वात् कणादस्य विप्रलम्भकत्वं वाधितमिति भावः।

स्वीयग्रन्थे (९) शिष्याणां प्रवृत्त्यर्थं फलवत्तां दर्शयति महोदय इति। महान् उत्कृष्टस्तत्त्वज्ञानरूप (१०) उदयो वोधो यस्मात् स महोदयः भाष्यनामा (११) ग्रन्थः।

---

(४) पञ्चम्याः (ख) पुं।

(५) इत्यर्थे इत्याचार्य्याः (ख) पुं।

(६) 'वस्तुत' इत्यारभ्य 'पश्याम' इत्यन्तपाठो हि (ख) पुस्तके नास्ति।

(७) पदस्यार्थानां (ख) पुं।

(८) जीवित्वेन (ख) पुं।

(९) स्वकीयग्रन्थे (ख) पुं।

(१०) शुद्धज्ञानरूपः (ख) पुं।

(११) भाष्यनामा इति पाठः (ख) पुस्तके नास्ति।

सूक्तिदीपिका

यत्पादनीरजरजःपरिधूसराङ्गः
सर्व्वत्र सिद्धिमधिगन्तुमधीश्वरः स्याम् ।
पित्रोस्तयोः पदसरोजरजः शरण्यं
शीर्षे तथा हृदि निधाय विधिं विदध्याम् ।
दुर्गाचरणनिषक्तं हरिपदरक्तं श्रितन्यायम् ।
सपदि कृपामयतातं शिवमनुवेलं शिवं वन्दे ॥

निर्व्विघ्नेन प्रारिप्सितसूक्तिपरिसमाप्तिकामः श्रीमान् जगदीशो दुर्गमपद-प्रशस्तपादभाष्यतत्त्वेषु स्वप्रकाशमभिवाञ्छन् शिवशक्तिं भगवतीं दुर्गामभिष्टौति नम इत्यादिना ।

कणभक्ष्यमुनेरिति पाठे—कणाः शस्यकणाः भक्ष्याः भक्षणीयाः जीविकोपायत्वेन यस्य मुनेस्तस्येति व्युत्पत्त्या कणादस्येत्यर्थः । तदुक्तं न्यायकन्दलीग्रन्थे श्रीधराचार्य्यैः—'तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता संज्ञा' इति । प्रकृतं कर्त्तरि सिद्धम् । पक्षः सिद्धान्तः तस्य रक्षायां परप्रदत्तदोषनिराकरणेनेति शेषः । विन्यस्तवासनाः सकामाः । चिन्तयन्तु स्मरन्तु, न तु केवलमाम्रेड़ितमेव कुर्व्वन्तु । तथाहि एतत्स्मृतिमन्तरेण दुर्गमभाष्यार्थप्रकाशविरहात् असुकरा किल कणादपक्षरक्षेति भावः ।

विघ्नविघातायेति—प्रारिप्सितसमाप्तिप्रतिबन्धकीभूतदुरदृष्टविध्वंसायेत्यर्थः । यद्यपि 'समाप्तिकामो मङ्गलमाचरेद्' इति शिष्टाचारानुमितश्रुत्या मङ्गलाचरणस्य समाप्तिरेव फल-मुपगम्यते, न तु विघ्नविघातोऽपि, तथापि मङ्गलाचरणानन्तरमेव समाप्त्यदर्शनात् तज्जन्यादृष्टकल्पनावत् सत्स्वपि मङ्गलाचरणचयेषु कादम्बर्य्यादौ निर्व्विघ्नग्रन्थसमाप्तिविरहतो विघ्नध्वंसस्यापि अनुरूपमङ्गलाचरणप्रयोज्यस्य समाप्तिसाधकत्वं कल्पनीयम्, अन्यथा मङ्गलाचरणजन्यशुभादृष्टसम्वलनस्य तत्रापि स्वीकर्त्तव्यतया समाप्त्यसत्त्वेन समाप्तिं प्रत्यपि तत्कारणताया दुर्ग्रहत्वापत्तेः, व्यभिचारग्रहस्य कारणताग्रहविरोधित्वादिति। मङ्गलाचरणस्य विघ्नध्वंस एव फलं, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापादिति ब्रुवाणानां नव्यानान्तु यथाश्रुतमेव सम्यक्।

न चैवं 'नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपी'ति शास्त्रं विरुध्यत इति वाच्यं भोगमन्तरेणापि प्रायश्चित्तादिना पापनाशस्य शास्त्रपरिप्राप्ततया भोगनाश्यतावच्छेदकसङ्कोचेनाविरोधादित्यादिकमूह्यम्। केचित्तु समाप्तेरेव मङ्गलाचरणफलत्ववादिमते विघ्नस्य विघातः संसर्गाभावः स विद्यते यस्य प्रयोज्यतया इत्यर्थे मत्वर्थीयाच्प्रत्ययेन विघ्नविघातपदमेव समाप्तिरूपं फलमाचष्टे, तस्मै प्रयोजनाय इत्यर्थः। विस्तरस्तु तन्त्रान्तरेषु द्रष्टव्यः।

ननु ईश्वरनमस्कार एव विघ्नविघातं प्रति वा तद्द्वारा समाप्तिं प्रति वा कारणं, न तु तन्निबन्धनमपि इत्यत आह शिष्याणां शिक्षार्थमिति। तथाहि शिष्या अपि ग्रन्थारम्भे एवमेव स्वेष्टदेवताप्रणतिं यथा कुर्युः, निबन्धनमन्तरेण कथमत्र ते विज्ञा भवेयुरिति भावः।

प्रवृत्त्यङ्गमिति—प्रवृत्तिप्रयोजकमित्यर्थः। तदुक्तं 'सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।' इति।

ईश्वरप्रणामादन्विति—शिष्टा हि गुरुतमगुरुतरगुरुक्रमेणैव प्रणमन्तीति अत एव आदौ ईश्वरं नमस्कृत्य अनन्तरं कणादनमस्कारः कृत इति भावः।

यतः सच्छिष्या इत्यादि—एतदपि शिष्यशिक्षायै;—तदुक्तमाचार्य्येण 'एवं हि शिक्षिते शिष्या अपि तथा कुर्य्युस्तथा च अविच्छिन्नसम्प्रदायवीर्य्यवत्तरं शास्त्रं स्या'दिति।

पदार्थानामित्यादि—भावेत्यनेन अभावस्यापि स्वमते न तुच्छत्वमिति सूच्यते, विस्तरस्तु यथावसरं प्रतिपादयिष्यते। पदार्थधर्म्मसंग्रह इति व्यधिकरणबहुव्रीहिः शिष्टप्रयोगात् समीचीनो मन्तव्यः। केचित्तु संगृह्यन्ते संक्षेपेण अभिधीयन्ते अनेनेति व्युत्पत्त्या संग्रहः संक्षेपेण अभिधायको ग्रन्थः पदार्थधर्म्माणां संग्रहः पदार्थधर्म्मसंग्रह इति षष्ठीतत्पुरुषसमासात् साधुरिति वदन्ति।

भाष्यनामेति—अत्र भाष्यशब्दो न पारिभाषिकार्थकः प्रकृते "सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः"॥ इति तल्लक्षणाननुगमात्, किन्तु यौगिक एव। इत्यत्र पदार्थधर्म्मसंग्रहग्रन्थस्य प्रकर्षकथनावसरे 'वैशद्यं लघुत्वं कृत्स्नत्वञ्च प्रकर्षः। सूत्रेषु वैशद्याभावात् भाष्यस्य च विस्तरत्वात् प्रकरणादीनाञ्च एकदेशत्वात्' इति किरणावल्यामाचार्य्यवचनमपि सङ्गच्छते। परे कथञ्चिदेव भाष्यलक्षणं योजयन्ति।

कार्य्यमात्रस्येत्यादिः—एतेन क्षितिः सकर्त्तृका कार्य्यत्वादित्याद्यनुमानेन ईश्वरस्य सिद्धिः सूचिता भवति। अत एव नास्तिकविप्रतिपत्तयो निरस्ताः। परे तु हेतुमित्यस्य प्रकृतवैशेषिकशास्त्रहेतुमित्यर्थः। अत एव भाष्यकारेण अन्ते 'योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्। चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः'॥ इति स्वयमेव स्पष्टमुपपादितम् इत्याहुः।

जीवत्वेनेत्यादिः—जीवत्वस्य विप्रलम्भकत्वव्यापकत्वमभिप्रेत्य। प्रागेवेति सुतरामेवेत्यर्थः। न आस्था नादरः न यथार्थज्ञानजनकताधीरिति यावत्। सिद्धान्ते न जीवत्वमात्रं विप्रलम्भकताव्यापकं मुक्त्यन्यफलनिरपेक्षे जीवे व्यभिचारादिति भावः।

प्रवृत्त्यर्थमिति—प्रयोजनस्यापि प्रवृत्त्यर्थता व्याख्याता। फलवत्तां प्रयोजकत्वसम्बन्धेन फलविशिष्टताम्। उत्कृष्ट इति निःश्रेयसहेतुतयेति शेषः।

ভাষ্যতাৎপর্য্য

গ্রন্থকারগণ নির্ব্বিঘ্নে নিজগ্রন্থের সমাপ্তিকামনায় গ্রন্থের আদিতে ইষ্টদেবতা ও গুরু প্রভৃতির বন্দনা করিয়া থাকেন। উক্ত বন্দনায় প্রাক্তন দুরদৃষ্ট-বিশেষ নষ্ট হইলে অভীষ্ট সিদ্ধ হইয়া থাকে। এই জন্য ভাষ্যকার প্রশস্তকরপাদাচার্য্য নিজ গ্রন্থের প্রারম্ভে সর্ব্বকর্ত্তা পরমেশ্বর ও নিজভাষ্যের মূলকর্ত্তা মহর্ষি কণাদকে নমস্কার করিয়া গ্রন্থপ্রণয়নে প্রবৃত্ত হইয়াছেন। উক্ত নমস্কারশ্লোকের অর্থ এই যে, প্রথমতঃ সর্ব্বকর্ত্তা পরমেশ্বরকে ও তৎপর মহর্ষি কণাদকে নমস্কার করিয়া তত্ত্বজ্ঞান-জনক পদার্থধর্ম্মসংগ্রহগ্রন্থ (অর্থাৎ যাহা দ্বারা পদার্থের সাধর্ম্ম্য ও বৈধর্ম্ম্য সংক্ষেপে জ্ঞাত হওয়া যায় তাহা) আমি প্রকৃষ্টরূপে বলিব।

এস্থানে আলোচনা করিতে হইবে যে, ঈশ্বর সর্ব্বশ্রেষ্ঠ এই জন্য শ্রেষ্ঠ ব্যক্তি প্রথম প্রণামার্হ বলিয়া প্রথমতঃ ঈশ্বর ও পরে তদপেক্ষা নিকৃষ্ট মহর্ষি কণাদকে নমস্কার করা হইয়াছে।

এই শ্লোকদ্বারা গ্রন্থের অভিধেয় সম্বন্ধ প্রভৃতিও দেখান হইয়াছে, এই গ্রন্থের অভিধেয় বা প্রতিপাদ্য পদার্থের সাধর্ম্ম্য ও বৈধর্ম্ম্য, প্রয়োজন মহান্ উদয় অর্থাৎ মোক্ষজনক তত্ত্বজ্ঞান। পদার্থধর্ম্মরূপ প্রতিপাদ্যের সহিত তৎপ্রতিপাদক এই গ্রন্থের প্রতিপাদ্যপ্রতিপাদকভাবরূপ সম্বন্ধ। প্রয়োজন ও তত্ত্বজ্ঞানের পরস্পর প্রযোজ্য-প্রযোজকভাব সম্বন্ধ।

যিনি সর্ব্বকর্ত্তা, তিনি পরিতুষ্ট হইয়া যে নির্ব্বিঘ্নে গ্রন্থেরও নিষ্পত্তি করিবেন, ইহাতে আর আশ্চর্য্য কি, এই জন্যই ঈশ্বরকে হেতুবিশেষণে বিশেষিত করা হইয়াছে। ইহা দ্বারা জগতের কারণরূপে ঈশ্বরের সিদ্ধিও করা হইল।

কণাদ ঋষি মুনি অর্থাৎ মননশীল,তাহার মুক্তিভিন্ন অন্য কোনও কাম্যবস্তু]নাই, যে কাম্যবস্তুর লাভের জন্য তিনি পরকে ব্যর্থ উপদেশে প্রতারণা করিবেন, অতএব তাহার বাক্যে অনাস্থা করিবার কারণ নাই, ইহাই বুঝাইবার জন্য কণাদকে মুনিবিশেষণে বিশেষিত করা হইয়াছে।

प्रशस्तपादभाष्यम्

द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः। तच्चेश्वर-(१) नोदनाभिव्यक्ताद्धर्म्मादेव।

[अथातो धर्म्मं व्याख्यास्यामः। १अ—१आ—१सू। यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः। १अ—१आ—२सू। तद्वचनादाम्नायस्य प्रामाण्यम्। १अ—१आ—३सू। धर्म्मविशेषप्रसूताद् द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्। १—१आ—४सू। इत्यालम्बनसूत्राणि]

जगदीशसूक्तिः

ननु तत्त्वज्ञानस्य निष्फलत्वात्तदर्थं ग्रन्थे प्रवृत्तिरनुपपन्नेत्यत आह द्रव्यगुणेत्यादि। निःश्रेयसहेतुरिति—तथा च दुःखाभावत्वेनेष्टाया मुक्तेः साधनत्वेन इष्टस्य तत्त्वज्ञानस्य साधने ग्रन्थे प्रवृत्तिर्नानुपपन्नेति भावः।

ननु संसारिणां (२) सर्वेषामेव ग्रन्थवाक्यादितो द्रव्यादिपदार्थानां

---

(१) चोदना (ख) पुं।

(२) नन्वासंसारं (ख) पुं।

साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमुत्पन्नं, न तु कस्यापि मुक्तिवार्त्तेति तत्त्वज्ञानस्य मुक्तिहेतुत्वे मानाभाव इत्यत आह तच्चेति। तत् निःश्रेयसं एवकारोऽप्यर्थे, तथा च ईश्वरनोदनया (२) वेदेनाभिव्यक्तात् प्रतिपादितात् आत्मधर्म्मिकश्रवणमननाद्यात्मकधर्म्मादपि निःश्रेयसमित्यर्थः। पदार्थतत्त्वज्ञानसत्त्वेऽपि श्रवणमननाद्यात्मकसहकार्य्यसत्त्वादेव न सर्वेषां निःश्रेयसं वृत्तमिति भावः।

सूक्तिदीपिका

द्रव्येत्यादिग्रन्थभूमिकामारचयति नन्वित्यादिना। दुःखाभावत्वेनेत्यादिः—दुःखाभावत्वप्रकारकज्ञानजन्येच्छाविषयीभूताया इत्यर्थः। मुक्तेरिति दुःखात्यन्तप्रध्वंसरूपाया इत्यर्थः। सर्व्वेषामिति—'सर्व्वं शुक्ला सरस्वती'त्यादाविव सर्व्वशब्दस्य प्रकृते सङ्कोचवृत्तितया सर्व्वपदेन ग्रन्थाधीतिप्रभृतीनामेव परिग्रहः, न तु संसारित्वव्यापकयावत्त्वावच्छिन्नानां, स्तनन्धयादिषु ग्रन्थवाक्यादितो निरुक्ततत्त्वज्ञानासम्भवेन प्रकृतार्थबाधात्। 'तत्त्वं ब्रह्मणि याथार्थ्ये' इति कोषात् तत्त्वं याथार्थ्यम् अनारोपितं स्वरूपमिति यावत्। तस्य ज्ञानं तत्त्वज्ञानमिति। साधर्म्यवैधर्म्याभ्यामिति स्वानुवृत्तस्वेतरव्यावृत्तधर्म्माभ्यामित्यर्थः। यदा तावदत्यन्तासङ्कीर्णाः स्थाण्वादयः साक्षात्क्रियमाणा अपि वक्रकोटरादिभिर्धर्म्मैरेव पुरुषादिभ्यो विविच्यन्ते, नान्यथा, तदा का कथा पुनरतीन्द्रियाणां मिथः सङ्कीर्णानां कालाकाशादीनामिति भावः। साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानमित्यत्र साधर्म्यवैधर्म्यतत्त्वज्ञानमिति पाठे तु 'साधर्म्यवैधर्म्ये एव तत्त्वं तस्य ज्ञानमिति व्युत्पत्तिरनुसन्धेया। यस्य वस्तुनो यो भावस्तत् तस्य तत्त्वम्। साधारणो धर्म्मः साधर्म्यम्, असाधारणो धर्म्मो वैधर्म्य'मिति श्रीधराचार्य्याः।

ईश्वरनोदनयेति—'आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्य' इत्यादिना श्रुतिवाक्येन इत्यर्थः। न्यायकन्दलीकृतस्तु ईश्वरनोदना ईश्वरेच्छाविशेषः तदभिव्यक्तात् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभिमुखीकृतात् धर्म्मादित्यर्थं व्याचष्टे। तथाहि धर्म्मस्यापि न तावत् निःश्रेयसोपधानं, यावदीश्वरेच्छया नानुग्रह इति भावः।

---

(२) ग्रन्थादितो (ख) पुं।

निरुक्तं तत्त्वज्ञानं हि नोपपत्त्या न वा शब्देन जनितं निःश्रेयसकारि, प्रत्यक्षात्मकमिथ्याज्ञानसमुन्मूलनद्वारा एव तस्य तथात्वस्य वक्तव्यत्वेन प्रकृते तदसम्भवात्, परोक्षज्ञानेन प्रत्यक्षात्मकदिग्भ्रमादेः प्रतिबन्धादर्शनात्, परोक्ष-तत्त्वज्ञानस्यापरोक्षमिथ्याज्ञाननिराकरणसामर्थ्यशून्यत्वस्य सिद्धान्तितत्वात्। किन्तु बलवत्तरमपरोक्षमेव तत्तथा, तत्र च वेदोक्तश्रवणमननादीनि यथोत्तर-मुपयुज्यन्ते।

अथ किमिति समुत्पादविनाशादिविचारे वस्तूनां प्रागभावप्रध्वंसाभावयोः साधर्म्यवैधर्म्यविचारे च भेदात्यन्ताभावयोः सिद्धो भावाः षड़ेव पदार्थाः समुद्दिश्यन्ते, लाघवानुरोधेन सतोऽप्यभावस्य समुद्देशप्रकरणे अनुपग्रहे किमिति द्रव्याद्येकमात्रमेव न समुद्दिष्टमिति चेदत्र प्राचीनाः ;—अभावः स्वरूपवानपि तज्ज्ञानस्य भावात्मकप्रतियोगिज्ञानपरतन्त्रतया न पृथक् समुद्दिष्टः। तथाहि 'अभावप्रत्ययो हि विशिष्टवैशिष्ट्यमर्य्यादां नातिशेते' इति नियमेन अभाव-ज्ञानमात्रस्यैव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैशिष्ट्यावगाहितया तादृशज्ञाने च विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य कारणतायाः सिद्धत्वेन भावात्मकप्रतियोगिज्ञानमन्तरेण अभावज्ञानं नोपपद्यत इति भावः। अत एव किरणावल्यां 'अभावस्तु स्वरूपवानपि पृथक् नोद्दिष्टः प्रतियोगि-निरूपणाधीननिरूपणत्वात्, न तु तुच्छत्वा'दित्युदयनाचार्य्याः प्राहुः। वैशे-षिकमतानुगतनव्यग्रन्थेषु पुनरभावस्यापि पृथक्तया निर्द्देशस्तत एव नास-ङ्गतः प्रतिभाति, तस्य प्रतियोगिनिरूपणाधीननिरूपणत्वेऽपि पृथक्पदार्थताया अपलपितुमशक्यत्वात्। एतेन द्रव्यादिसप्तपदार्थवादो न षोड़शपदार्थसिद्धि-मभ्युपगच्छतां नैयायिकानां, नापि षट्पदार्थसिद्धिमभ्युपगच्छतां वैशेषिकाणां परमन्यादृश एवायमिति वदन्तो निरस्ताः, सप्तपदार्थवादस्यापि अभावसिद्धि-मुपादाय वैशेषिकनयान्तर्गतत्वादिति।

एवकार इत्यादि—धर्म्मादेवेत्यत्र एवकारस्य इतरव्यवच्छेदार्थत्वे 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इत्यादिश्रुतिविरोधः, अतः अप्यर्थ इति। स्वपक्षे तु धर्म्मस्य परम्परया मुक्त्युपयोगित्वात् न श्रुत्यर्थबाध इति भावः।

ভাষ্যতাৎপর্য্য

যে বস্তুদ্বারা কোনও উপকার হইবে এরূপ জ্ঞান হয় নাই, তাহা লাভ করিবার জন্য কাহারও প্রবৃত্তি হয় না, এই জন্যই শাস্ত্রে ইষ্টসাধনতাজ্ঞানকে প্রবৃত্তির কারণ বলা হইয়াছে। অতএব প্রথমতঃ বুঝিতে হইবে যে, যে তত্ত্বজ্ঞান লাভ করিবার জন্য লোক প্রবৃত্ত হইবে, তাহাতে কোনও উত্তম ফল আছে কি না। এই জন্য শাস্ত্রকার প্রথমতই বুঝাইয়া দিতেছেন যে, দ্রব্য গুণ কর্ম্ম সামান্য বিশেষ ও সমবায় এই পদার্থসমূহের সাধর্ম্ম্য ও বৈধর্ম্ম্য দ্বারা যথার্থ স্বরূপজ্ঞান নিষ্ফল নহে, ঐ জ্ঞান সকল ফলের উৎকৃষ্ট মোক্ষফল দান করিয়া থাকে। উক্ত তত্ত্বজ্ঞান আবার ঈশ্বরের উপদেশরূপ বেদদ্বারা প্রতিপাদিত ধর্ম্মের সাহায্যও অপেক্ষা করে। অর্থাৎ প্রথমতঃ শাস্ত্রদ্বারা পদার্থতত্ত্বে জ্ঞান লাভ করিয়া পরে শ্রুতি-স্মৃতি ও ইতিহাস-পুরাণাদি শাস্ত্রে উপদিষ্ট যোগবিধি দ্বারা দীর্ঘকাল আগ্রহের সহিত নিবৃত্তিলক্ষণ ধর্ম্মের সেবা করিলে তত্ত্বজ্ঞান উৎপন্ন হইয়া থাকে। জগদীশের তর্কামৃতগ্রন্থে দেখিতে পাওয়া যায় যে, পরমাত্ম-সাক্ষাৎকার অর্থাৎ পরমেশ্বরে যোগজশক্তিবশতঃ ইতর পদার্থের ভেদজ্ঞান মুক্তির কারণ। পরমাত্মাতে ইতরভেদের জ্ঞান হইতে গেলে আবার ইতরের জ্ঞান থাকা আবশ্যক, কারণ প্রতিযোগী ইতরের জ্ঞান না থাকিলে ইতরভেদরূপ অভাবের জ্ঞান অসম্ভব, অতএব মুক্তির প্রতি সকল পদার্থের তত্ত্বজ্ঞানই হেতু হইয়া থাকে। বস্তুতঃ ইহা অনুভবসিদ্ধ যে, যাহা হইতে যাহার ভেদ বুঝিতে হইবে, তাহার প্রকৃত তত্ত্ব না বুঝিলে উক্ত ভেদজ্ঞান হইতে পারে না। যে ব্যক্তি বৃক্ষের স্বরূপ জানে না, তাহার পক্ষে অপর পদার্থে বৃক্ষের ভেদজ্ঞান কখনও হইতে দেখা যায় না। যখন তাহার বৃক্ষের স্বরূপ জ্ঞান হইল, তখনই সে বুঝিতে পারে যে ইহা বৃক্ষ বা ইহা বৃক্ষ নহে। অতএব পরমাত্মায় ইতর পদার্থের ভেদজ্ঞান ইতর পদার্থের জ্ঞানকে অপেক্ষা করে, ইহাই সিদ্ধান্ত। এইরূপ যে কোনও অভাব পদার্থের ভাববস্তু জ্ঞান ব্যতীত স্বতন্ত্র জ্ঞান অসম্ভব বলিয়া কণাদ অভাব পদার্থকে আর অতিরিক্তরূপে উল্লেখ না করিয়া ছয়টী ভাব-পদার্থকেই পদার্থ বলিয়া স্থির করিয়াছেন। বাস্তবিক অভাব পদার্থও তন্মতে অসৎ নহে। তবেই অভাব পদার্থ আদান করিয়া কণাদ মতকে সপ্তপদার্থবাদ ও অভাব পরিত্যাগ করিয়া কণাদমতকে ষট্‌পদার্থবাদ বলিয়া স্থির করা যায়। কেহ

কেহ আশঙ্কা করেন যে, গ্রন্থবাক্যাদি হইতে দ্রব্যাদি পদার্থের সাধর্ম্ম্য ও বৈধর্ম্ম্য দ্বারা তত্ত্বজ্ঞান হইলেও যখন মুক্তি হয় না দেখিতে পাই, তখন উক্ত তত্ত্বজ্ঞান মুক্তির হেতু ইহা কিরূপে নির্ণয় করা যায় ? ইহার উত্তর এই যে, কেবল গ্রন্থবাক্যাদি জন্য তত্ত্বজ্ঞান মুক্তির কারণ নহে, শাস্ত্রোক্ত মনন প্রভৃতিও তাহার সহকারী। অতএব মননাদি না থাকাতেই সেই সেই স্থলে মুক্তি হয় না। কিন্তু যে স্থলে ঐ সহকারী থাকে, সেই স্থলে মুক্তি অবশ্যই হইয়া থাকে।

प्रशस्तपादभाष्यम्

अथ के द्रव्यादयः पदार्थाः, किञ्च तेषां साधर्म्म्यं वैधर्म्म्य-(१) ञ्चेति। तत्र द्रव्याणि पृथिव्यप्तेजो-वाय्वाकाशकालदिगात्ममनांसि सामान्यविशेष-संज्ञोक्तानि नवैव, तद्व्यतिरेकेण संज्ञान्तरान-भिधानात्। (२)

[पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि—१अ—१आ—५सूत्रमालम्बनम्।]

जगदीशसूक्तिः

अथेति द्रव्यगुणाद्याः के कतिविधाः ? तेन द्रव्यगुणेत्यादि-प्रागुक्तवाक्यादेव द्रव्यगुणादेरवगमात्तेषु प्रश्नासम्भवेऽपि न क्षतिः। तेषां पदार्थानां साधर्म्म्यं अनुगतो धर्म्मः, वैधर्म्म्यं इतरव्यावृत्तो धर्म्मः।

---

(१) वैधर्म्म्यमिति पाठः (ग) पुस्तके नास्ति।

(२) अन्यस्य संज्ञानभिधानात् (ख) पुस्तके।

उत्तरं तत्रेति। तत्र द्रव्यादिषु मध्ये। सामान्यविशेषसंज्ञयोक्तानि विभक्तानि पृथिव्यादीनि (१) नवैव द्रव्याणीति योजना। द्रव्यत्वं यत् सामान्यं तदवान्तरधर्म्मेण या संज्ञा पृथिवीजलेत्यादिका तया उक्तानि पृथिव्यादीनि नवैव द्रव्याणीति तदर्थः। सामान्यविशेषसंज्ञयेत्यस्य जातिविशेषप्रवृत्तिनिमित्तकसंज्ञयेत्यर्थस्तु न युक्तः कालदिगादिसंज्ञायाः पारिभाषिकत्वेन जात्यवच्छिन्नशक्तिमत्त्वाभावात्।

ननु तमसोऽप्यतिरिक्तद्रव्यस्य सत्त्वात् पृथिव्यादीनि नवैव द्रव्याणीति व्याहतमत आह तद्व्यतिरेकेणेति। पृथिव्यादिसंज्ञाव्यतिरेकेण मुनिना संज्ञान्तरेण द्रव्यस्याविभजनादित्यर्थः। तथाच पृथिव्यादिभिन्नं तमो न द्रव्यं, किन्तु महाप्रभात्वावच्छिन्नात्यन्ताभावः, तत्रैव च नीलाद्यारोपरूपा नीलं तमश्चलतीति प्रतीतिरित्याचार्य्याः। बाधकं विना उक्तप्रतीतेर्भ्रमत्वायोगान्नीलरूपवत्त्वेन तमः पृथिव्येव तस्य चालोकाभावव्यङ्ग्यत्वान्न प्रकाशे प्रत्यक्षमिति तु कन्दलीकृतः।

सूक्तिदीपिका

ननु तद्विषयकज्ञानस्य तद्विषयकजिज्ञासाप्रतिबन्धकतया द्रव्यगुणेत्यादिग्रन्थेनैव द्रव्यादिविज्ञानस्य समुत्पादात् कथं द्रव्यादिजिज्ञासेत्यत आह के कतिविधा इति। तथाहि द्रव्येत्यादिग्रन्थेन द्रव्यादिस्वरूपग्रहे सत्यपि विभाजकसंख्यायाः प्रत्येकं ततोऽनवधृतेः प्रश्नोपपत्तिरिति भावः। इत्थञ्च सूत्रे संख्याप्रश्नाभावात् नवैवेत्यादिना संख्यानिरुक्तिरनुपपन्नेत्यपि निरस्तम्। विशेषाणामानन्त्यात् समवायस्य च एकत्वात् तत्र न विभागजिज्ञासेति-ध्येयम्।

साधर्म्म्यवैधर्म्म्यजिज्ञासयैव लक्षणप्रश्नस्य गतार्थत्वात् के इत्यस्य कतिविधा इत्यर्थ इति परे।

तदवान्तरधर्म्मेणेति—तन्न्यूनवृत्तिपृथिवीत्वादिधर्म्मेण इत्यर्थः। तदवान्तरधर्म्मप्रकारकबोधजनिकेति निष्कर्षे संज्ञाविशेषणमिदम् पृथिव्यादि-

---

(१) विभक्तानीति पाठो बहुषु आदर्शेषु नास्ति।

संज्ञायाः पृथिवीत्वाद्यवच्छिन्नबोधकत्वादिति। विभक्तानीति—सामान्यधर्मेण द्रव्यत्वेनावच्छिन्नानां परस्परविरुद्धतद्व्याप्यपृथिवीत्वादिधर्मैः प्रतिपादनाया विषयीभूतानीति तदर्थः। नवैवेति नवविधानीत्यर्थः। एतेन उद्देश्यतावच्छेदकसमनियतवस्तुमदन्यसंख्याया विधार्थत्वान्न न्यूनाधिकसंख्याशङ्केति भावः। एवशब्दस्य इतरव्यवच्छेदार्थत्वेन तद्विशेषस्य लाभः।

पारिभाषिकत्वेनेति उभयावृत्तिधर्मावच्छिन्नसङ्केतवत्त्वरूपलक्षणवत्त्वेनेत्यर्थः। अतएव जगदीशः 'उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी'ति। 'जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता' इति च प्राह शब्दशक्तिप्रकाशिकायाम्।

कालेत्यादि—कालत्वदिक्त्वादीनां धर्म्माणां प्रत्येकमेकव्यक्तिमात्रवृत्तितया जातित्वबाधेन कालत्वाद्यवच्छिन्नप्रतिपादककालादिसंज्ञाया न सामान्यविशेषावच्छिन्नप्रवृत्तिनिमित्तकत्वमिति भावः। अत एव तर्कामृते 'आकाशत्वकालत्वदिक्त्वानि उपाधयः, अन्यानि जातयः।' इत्युक्तं जगदीशेन। प्रवृत्तिनिमित्तत्वञ्च वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति व्यक्तं शक्तिवादे। अत एव कालादिसंज्ञाया अपि द्रव्यत्वाश्रयबोधकत्वेन न जातिविशेषप्रवृत्तिनिमित्तकत्वशङ्केति ध्येयम्।

तमसोऽप्यतिरिक्तद्रव्यस्येति—तथाहि तमो न रूपि द्रव्यं रूपवतो द्रव्यस्य स्पर्शाव्यभिचारात् स्पर्शवतश्च महतः प्रतीघातधर्म्मतया तमसि सञ्चरतां प्रतीघातापत्तेः। किञ्च रूपवतः प्रत्यक्षस्य आलोकसहकारमन्तरेणासम्भवात् तमसश्च आलोकप्रभाविरहदशायामेव प्रत्यक्षस्य अनुभवसिद्धत्वात्। अपि च तमो न पृथिवी गन्धवत्त्वाभावात्, न जलं शुक्लरूपाद्ययोगात्, न तेजःसमीरौ स्पर्शाभावात्, न व्योमादिचतुष्कं अविभुत्वात्, नापि मनो दृश्यत्वात्। तदेवं पृथिव्यादिसंज्ञया संख्यातेषु नवस्वनन्तर्भावात् दशमद्रव्यत्वं तमसः। द्रव्यत्वन्तु नीलरूपवत्त्वात् क्रियावत्त्वाच्च प्रसिध्यति द्रव्यभिन्नानां गुणादीनां निर्गुणक्रियत्वादिति। तदुक्तं 'तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति।" इति भावः।

मुनिनेत्यादि—तथाहि यदि एतन्नवातिरिक्तमपि द्रव्यं स्यात्, तदा सर्व्वज्ञेन निःशेषपदार्थोपदेशप्रवृत्तेन मुनिना तदपि उपादेक्ष्यत इति भावः।

महाप्रभेत्यादि—प्रभांशे महत्त्वञ्च स्वपरप्रकाशकत्वं, स्वप्रकाशकत्वे सति

परप्रकाशकत्वमिति यावत्। तैजसेन्द्रियचक्षुरवच्छेदेन तमःसत्त्वानुपपत्तिवारणाय सत्यन्तम्। खद्योतप्रभावच्छेदेन तदनुपपत्तिवारणाय विशेष्यदलम्। न च तथापि मार्जारचक्षुषः स्वपरप्रकाशकत्वानपायात् तदवच्छेदेन तमसः सत्त्वमनुपपन्नमिति वाच्यम् तत्र गोलकस्य प्रकाशात् तस्य चाप्रकाशकत्वात् तद्भिन्नत्वेनापि तेजसो विशेषणीयत्वात् सिद्धान्तमुक्तावल्या दिनकरीयव्याख्याने आवश्यकतेजोऽभावेनैवोपपत्तावित्यस्य प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनैवोपपत्तावित्यर्थः कृतः। तत्र तेजस्त्रसरेणुकसत्त्वेऽपि तमसः प्रत्ययात् महत्त्वे प्रकृष्टत्वविशेषणम्। चक्षुरादितेजःसत्त्वेऽपि तत्प्रत्ययात् उद्भूतेति रूपविशेषणम्। सुवर्णादिसत्त्वेऽपि तथात्वेन अनभिभूतेति। आलोकवत्यपि तेजोविशेषाभावमादाय अतिप्रसङ्गवारणाय तादृशतेजस्त्वावच्छिन्नप्रतियोगिताकाभावमेवार्थमाहुः। तत्र तु गतिः पूर्व्ववदेव चिन्त्या।

न च विनिगमनाविरहेण तमोरूपं द्रव्यान्तरमङ्गीकृत्य तेज एव किं तदभावो नोपेयत इति वाच्यम् उष्णस्पर्शसमवायिकारणतया तेजसो द्रव्यान्तरस्य सिद्धौ तदभावतयैव तमसः सिद्धेः, अत एव आवश्यकतेजःसामान्याभावस्तम इति नव्याः। ये तु आलोकाभावे आरोपितं नीलं रूपं तम इति वदन्ति, तेषामपि न युक्तः पक्षः नीलं तम इति प्रतीतेरुभयोरंशयोरेव नीलविषयतया तथारोपस्यासम्भवात् ज्ञानगर्भस्वरूपस्य चाक्षुषत्वानुपपत्तेश्च।

उक्तप्रतीतिरिति नीलं तमश्चलतीति प्रतीतिः। भ्रमत्वायोगात् तदभाववति तत्प्रकारकज्ञानत्वासम्बन्धात्। नीलरूपवत्त्वेनेति तमसः पृथिवीत्वे हेतुः पृथिवीभिन्ने नीलरूपवत्त्वाभावादिति भावः। नीलरूपवत्त्वे निरुक्तप्रतीतेर्भ्रमत्वायोगो हेतुः, यत्र यद्विषयकप्रतीतिः न भ्रमः, तत्र तद्वत्त्वमिति व्याप्तेः।

ভাষ্যতাৎপর্য্য

দ্রব্যাদি পদার্থের সাধর্ম্ম্য ও বৈধর্ম্ম্যহেতুক তত্ত্বজ্ঞান মোক্ষের হেতু বলা হইয়াছে, সম্প্রতি দ্রব্যাদি পদার্থ কি কি তাহা বুঝাইবার জন্য বলিতেছেন যে, পৃথিবী জল তেজ বায়ু আকাশ কাল দিক্ আত্মা ও মন এই নয় প্রকার দ্রব্য ;

উহার সামান্য ও বিশেষ সংজ্ঞা উক্ত আছে। সামান্য সংজ্ঞা দ্রব্য ও বিশেষ সংজ্ঞা পৃথিবী ইত্যাদি।

এ স্থলে আশঙ্কা এই যে, কেহ কেহ অন্ধকারকে অতিরিক্ত দ্রব্য বলিয়া স্বীকার করেন, কারণ অন্ধকার এক স্থান হইতে অপর স্থানে চলিয়া যায়, অতএব উহার ক্রিয়া আছে, প্রত্যক্ষতঃ উহার কৃষ্ণ রূপ দেখা যায়, অতএব গুণও আছে এবং অন্ধকারে সংখ্যা পৃথক্ত্ব পরিমাণ সংযোগ ও বিভাগাদিরও সত্তা রহিয়াছে, কিন্তু গুণ ও ক্রিয়া কখনও দ্রব্যভিন্নে থাকিতে পারে না, এই হেতু অন্ধকারও একটী দ্রব্য। পৃথিবী হইলে তাহাতে গন্ধ, জল হইলে তাহাতে অভাস্বর শুক্লরূপ ও মাধুর্য্যরস প্রভৃতি, তেজ হইলে তাহাতে ভাস্বর শুক্লরূপ ও উষ্ণস্পর্শ প্রভৃতি, বায়ু হইলে তাহাতে অনুষ্ণাশীতস্পর্শ ও রূপাভাব প্রভৃতি থাকিতে হয়। এবং বায়ু অপ্রত্যক্ষ দ্রব্য, অন্ধকারের যখন প্রত্যক্ষ অনুভব সিদ্ধ, তখন কোনও রূপেই উহা বায়ু বলিয়া স্বীকার করা চলে না। আকাশ কাল দিক্ ও আত্মার স্বরূপও উহাকে বলা যায় না, কারণ আকাশাদি চতুষ্টয় বিভু ও রূপশূন্য, অন্ধকার বিভিন্ন বিভিন্ন প্রদেশে খণ্ড খণ্ড রূপে থাকে বলিয়া উহার মূর্ত্ততা বা পরিচ্ছিন্নপরিমাণ প্রত্যক্ষসিদ্ধ হইয়া থাকে এবং নীল রূপের আশ্রয় বলিয়াই উহার প্রতীতি হয়। মন নীরূপ ও পরমাণুপরিমাণ, উহা কখনও চক্ষুরিন্দ্রিয়ের গ্রাহ্য হইতে পারে না। অন্ধকার কিন্তু চক্ষুরিন্দ্রিয়ের বিষয় বলিয়া সকলের নিকটই সিদ্ধ, অতএব উহা মন বলিয়াও স্বীকার করা অসম্ভব, এই জন্যই উহাকে অতিরিক্ত দশম দ্রব্য বলিতে হইবে। অথচ কণাদ ঋষি ও প্রশস্তপাদাচার্য্য কেবল নয় প্রকারই দ্রব্য বলিয়া দশম দ্রব্য স্বীকার করেন নাই, ইহার সমাধান কি? এস্থলে এই বলিতে হইবে যে, অন্ধকার অতিরিক্ত দ্রব্য নহে, উহা মহাপ্রভার অভাব মাত্র। উক্ত অভাব পদার্থে নীলরূপ ও চলন ক্রিয়ার আরোপ হইয়া থাকে। অভাব পদার্থ যে বৈশেষিক মতে অসিদ্ধ নহে, তাহা পূর্ব্বেই ব্যক্ত করা হইয়াছে। উষ্ণস্পর্শের সমবায়িকারণরূপে প্রথমতঃ তেজের সিদ্ধি হইলে তাহার অভাব বলিয়া অন্ধকারের স্বরূপনির্ণয়ে বিনিগমনা বা একপক্ষপাতিনী যুক্তিরও অসদ্ভাব নাই। তাহা না হইলে যেমন অন্ধকারকে তেজোদ্রব্যের অভাব বলা হয়, ঐ রূপ তেজকেও অন্ধকার দ্রব্যের অভাব বলা যাইত ইত্যাদি। এই জন্যই মুনি নব দ্রব্যের অতিরিক্ত কোনও দ্রব্যের সংজ্ঞা করেন নাই।

प्रशस्तपादभाष्यम्

गुणा (१) रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश। चशब्दसमुच्चिताश्च गुरुत्व-द्रवत्वस्नेहसंस्काराऽदृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशति-र्गुणाः।

[रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः १ अ—१ चा—६ सूत्रमालम्बनम्।]

जगदीशसूक्तिः

गुणाः कतिविधा इत्यत्रोत्तरं गुणा इत्यादि। गुणाः सप्तदश रूपरसाद्याः कण्ठोक्ताः स्वयमेव मुनिना (२) रूपत्वरसत्वाद्यवान्तर-धर्म्मेण विभक्ताः रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोग-विभागौ परत्वापरत्वबुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणा इति सूत्रेण सप्तदशानां स्वयमेव कणादैर्विभजनादिति भावः। गुरुत्वादे-रविभजनात् मुन्युक्तविभागस्य न्यूनत्वमपाकर्त्तुमाह (३) चशब्देति। प्रयत्नाश्च गुणा इत्युक्तसूत्रस्य-चशब्दसमुच्चिताश्चेत्यर्थः।

अत्र (४) अनुगतस्य अदृष्टत्वस्य मिथ्याज्ञानवासनादिजन्यताव-च्छेदकतया सिद्धस्य सत्त्वेऽपि अदृष्टपदं धर्म्मत्वाधर्म्मत्वाभ्यामेव विभिन्न-

---

(१) गुणाश्च (ख) पुस्तके।

(२) स्वयमेव मुनिनेति पाठः (ख) पुस्तके।

(३) न्यूनत्वमपाकुर्व्वन्नाह (ख) पुस्तके।

(४) तत्रेति (ख) पुस्तके।

रूपाभ्यां धर्म्माधर्म्म-तात्पर्य्यकम् अतो न गुरुत्वादेः सप्तत्वविरोधः, गुणत्व-साक्षाद्व्याप्यजातिभिर्गुणानां (१) विभाज्यत्वनियमे प्रमाणाभावात्, अन्यथा वेगस्थितिस्थापकभावनासु अनुगतसंस्कारत्वजातेर्निष्प्रमाण-कत्वात् वेगत्वादिभिरेव गुणत्वसाक्षाद्व्याप्यजातिभिर्विभजने गुणानां षड्विंशतित्वापत्तेः। इत्येवमिति कण्ठोक्तैः (२) सप्तदशभिश्चशब्द-(३) समुच्चितानां सप्तानां मिलनेनेत्यर्थः।

सूक्तिदीपिका

रूपादिचतुर्व्विंशतिगुणसाधारणं गुणत्वं नाम सामान्यं, तदेव च गुण-शब्दोल्लेखिप्रतीतिविषयो लक्षणं गुणानां, तेन तद्धर्म्मावान्तरधर्म्मप्रकारक-ज्ञानगोचरेच्छां प्रति तद्धर्म्मज्ञानस्य कारणतया प्रकृते गुणत्वरूपसामान्य-धर्म्मज्ञानमन्तरेण विशेषजिज्ञासाया असम्भवेन विभागानुपपत्तिदोषो निरस्तः। एवं द्रव्यादिविभागोऽप्युपपादयितव्य इत्यवधेयम्। सकलगुण-साधारणगुणत्वजातिसिद्धिश्च लैङ्गिकी, तत्प्रयोगप्रकारो यथा, द्रव्यकर्म्मभिन्न-सामान्यवद्वृत्तिकारणता किञ्चिद्धर्म्मावच्छिन्ना कारणतात्वात् दण्डादिनिष्ठघट-कारणतावत् इति धर्म्मस्य जातित्वे लाघवमिति लाघवज्ञानसहकाराच्च तस्य जातित्वमायातमिति भावः।

रूपत्वेत्यादि—रूपत्वरसत्वादिरूपगुणत्वव्याप्यधर्म्मेणेत्यर्थः। न्यूनत्वमिति तदकथनज्ञानज्ञाप्यतदज्ञानवत्पुरुषोच्चरितत्वम् इत्यर्थः। तथाहि मुनिना कणादेन चशब्दप्रयोगादेव शेषाणां सप्तानां विनिर्द्देशान्न न्यूनत्वमिति भावः।

मिथ्याज्ञानेत्यादि—अत्र आदिपदेन कर्म्मादीनामुपग्रहः। तथाहि मिथ्याज्ञानवासनात्वेन अदृष्टत्वेन कर्म्मत्वेन अदृष्टत्वेन च क्रमकार्य्यकारणभावे अदृष्टत्वस्य जन्यतावच्छेदकता सिद्ध्यति। तथाहि मिथ्याज्ञानवासनादिनिरू-

---

(१) जात्यैव गुणानां विभागात् नियमे (ख) पुस्तके।

(२) कण्ठोक्तेति (क) पुस्तके।

(३) चकारेति (ख) (ग) पुस्तकयोः। सहेति (ग) पुस्तके अधिकम्।

पिता अदृष्टवृत्तिजन्यता किञ्चिद्धर्म्मावच्छिन्ना कार्य्यतात्वात् तस्य धर्म्मस्य जातित्वे लाघवमिति लाघवज्ञानसहकारेण च तस्य जातित्वमायाति। परे तु निरुक्त-कार्य्यकारणभावे प्रमाणविरहेण नादृष्टत्वस्य जातित्वसिद्धिः, अत एव किरणावल्याम् 'नन्वदृष्टत्वं नाम सामान्यमस्ति, कार्य्यकारणलक्षणानां तद्व्यवस्थापकानामभावा'दित्युदयनाचार्य्याः प्राहुः।

गुणत्वसाक्षाद्व्याप्येति—गुणत्वव्याप्याव्याप्यत्वे सति गुणत्वव्याप्यत्वं तदर्थः। वेगत्वादिभिरेवेति—इदञ्च सत्यन्तदलघटकीभूतस्य प्रथमव्याप्यत्वस्य समवायसम्बन्धावच्छिन्नत्वमभिप्रेत्य, अन्यथा संस्कारत्वस्यापि गुणत्वव्याप्यतया तद्व्याप्यवेगत्वादेः गुणत्वसाक्षाद्व्याप्यत्वं जगदीशोक्तमनुपपन्नं स्यादिति। गुणत्वव्याप्यजात्यव्याप्यत्वं वा सत्यन्तदले प्रवेश्यम्, अतो न क्षतिः।

निष्प्रमाणकत्वादिति—अदृष्टत्वजाताविव कार्य्यकारणभावलक्षणमूलकानुमानादिरूपप्रमाणशून्यत्वादित्यर्थः। प्रत्यक्षस्य तु सुतरामसम्भवोऽयोग्यत्वात्। शब्दादीनामपि पृथक्प्रमाणत्वानभ्युपगमाच्च।

तदत्रायं निष्कर्षो यथा, अदृष्टत्वस्य निरुक्तरीत्या जातित्वेऽपि गुणत्वसाक्षाद्व्याप्यजातिभिरेव गुणानां विभागनियमाभावेन धर्म्मत्वाधर्म्मत्वाभ्यामपि विभागस्य निर्द्दोषतया संस्कारत्वस्य वेगादित्रितयानुगतजातित्वविरहेऽपि तेन रूपेण वेगादीनां विभागेनैव च न मुन्यभिप्रेत-नव्यानिरुक्तचतुर्विंशतिसंख्याकत्वस्य गुणेषु व्याघात इति।

ভাষ্যতাৎপর্য্য

কণাদ মুনি নিজ সূত্রে রূপ, রস, গন্ধ, স্পর্শ, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ, বিভাগ, পরত্ব, অপরত্ব, বুদ্ধি, সুখ, দুঃখ, ইচ্ছা, দ্বেষ ও প্রযত্ন, এই সপ্তদশটী পদার্থকে নামতঃ গুণ বলিয়া উল্লেখ করিয়াছেন এবং 'প্রযত্নাশ্চ' এই চ শব্দ দ্বারা গুরুত্ব দ্রবত্ব, স্নেহ, সংস্কার, অদৃষ্ট, অর্থাৎ ধর্ম্ম ও অধর্ম্ম, এবং শব্দ, এই সাতটী গুণ বলিয়া প্রতিপাদন করিয়া সমষ্টিতে চতুর্ব্বিংশতি গুণ বলিয়াছেন। প্রকৃত স্থলে অদৃষ্টপদে ধর্ম্ম ও অধর্ম্ম। উক্ত ধর্ম্ম ও অধর্ম্মরূপে দ্বিবিধ অদৃষ্ট না লইলে প্রাচীনসম্মত গুণের চতুর্ব্বিংশতি সংখ্যা পূরণ হয় না। অদৃষ্টত্বের জাতিত্বমতে অদৃষ্টত্ব গুণত্ব-

সাক্ষাদ্ব্যাপ্য জাতি হইলেও গুণত্বসাক্ষাদ্ব্যাপ্য জাতি দ্বারাই গুণের বিভাগ করিতে হইবে এরূপ যুক্তি তর্কাদি না থাকায় ধর্ম্মত্ব ও অধর্ম্মত্বরূপে অদৃষ্টের বিভাগ দোষাবহ নহে, তাহা না হইলে বেগাদি ত্রিবিধ সংস্কারে সংস্কারত্ব অনুগত জাতি না থাকায় বেগত্ব প্রভৃতি ধর্ম্মত্রয়ই গুণত্বসাক্ষাদ্ব্যাপ্য জাতি হয়, অতএব তদ্রূপে বিভাগ করিলে গুণ ষড়্‌বিংশতিসংখ্যক হইয়া পড়ে। ইত্যাদি।

প্রশস্তপাদভাষ্যম্

উত্‌ক্ষেপণাপক্ষেপণাকুঞ্চনপ্রসারণগমনানি পঞ্চৈব কর্ম্মাণি। গমনগ্রহণাৎ ভ্রমণরেচনস্যন্দনোর্দ্ধ্বজ্বলনতির্য্যক্‌পতননমনোন্নমনাদয়ো গমনবিশেষা এব, ন তু জাত্যন্তরাণি।

[উৎক্ষেপণমপক্ষেপণমাকুঞ্চনং প্রসারণং গমনমিতি কর্ম্মাণি। ১ অ—১ আ—৭ সূত্রমালম্বনম্]।

জগদীশসূক্তিঃ

কর্ম্মাণি কতিবিধানীত্যত্র উত্তরয়তি উত্‌ক্ষেপণেত্যাদিনা। ননু ভ্রমণাদেরপি কর্ম্মান্তরস্য সত্ত্বাৎ পঞ্চৈবেতি বিভাগো ব্যাহত ইত্যত আহ গমনগ্রহণাদিতি। ন তু জাত্যন্তরাণীতি ন তু গমনাবৃত্তিজাতিমন্তীত্যর্থঃ।

সূক্তিদীপিকা

চলতীত্যনুগতপ্রতীতিসিদ্ধা হি কর্ম্মত্বজাতিঃ সকলকর্ম্মসাধারণী। এবমুৎক্ষেপণত্বাদিজাতিরপি তদ্ব্যাপ্যা।

গমনগ্রহণাদিতি—ননু ভ্রমণাদীনাং গমনবিশেষত্বেন গমনপদেন লাভবৎ উৎক্ষেপণাদীনামপি গতিবিশেষতয়া গমনপদেনৈব লাভসম্ভবে কথমুৎক্ষেপ-

णादीनां पृथगुपादानं सङ्गच्छत इति चेन्न उत्क्षेपणादयो हि न गतिविशेषाः, किन्तु गतिविशेषानुकूलव्यापारविशेषा एव ; तथाहि लोष्टमुत्क्षिपतीत्यादौ ऊर्द्ध्वदेशसंयोगानुकूलव्यापारानुकूलचेतनव्यापारादय उत्क्षिपत्यादेरर्थाः, गतिस्तु संयोगविशेषानुकूलव्यापारविशेषरूपा। भ्रमणादयोऽपि तत्स्वरूपा एवेति भ्रमणादीनां ततो लाभेऽपि नोत्क्षेपणादेस्ततः संग्रह इति नोत्क्षेपणादीनां पृथगुपादानं दुष्यतीति भावः। तदुक्तं कारिकावलीव्याख्याने रामरुद्रीये—'उत्क्षिपतीति व्यवहारो हि चेतनेष्वेवानुभूयते, नत्वचेतने लोष्टादौ, तस्मात् लोष्टादिनिष्ठगत्यनुकूलचेतनव्यापार एव उत्पूर्व्वक्षिपधातोरर्थः' इति।

केचित्तु ऊर्द्ध्वं गच्छति अधोगच्छतीत्यादिप्रतीत्या उत्क्षेपणादौ गमनत्वस्य आनुभविकत्वेऽपि स्वतन्त्रेच्छस्य मुनेः पर्य्यनुयोगानर्हतया उत्क्षेपणादीनां गमनात् पृथगुपादानं नासमञ्जसम्। तदुक्तं सिद्धान्तमुक्तावलीव्याख्याने दिनकरीये—'स्वतन्त्रेच्छस्य मुनेर्नियोगपर्य्यनुयोगानर्हत्वादिति' वदन्ति।

उत्क्षेपणत्वापक्षेपणत्वयोर्विषमक्षेपणत्वव्याप्यतया उत्क्षेपणापक्षेपणपदाभ्यां विषमक्षेपणस्य कर्म्मत्वोपपत्तावपि समक्षेपणस्य कर्म्मत्वोपपत्तिश्चिन्त्या।

तदेतेषां कर्म्मणां विहितयागस्नानदानादिषु धर्म्मानुकूलप्रयत्नवदात्मसंयोगजन्यत्वं निषिद्धदेशगमनहिंसाकलञ्जभक्षणादिषु च अधर्म्मानुकूलप्रयत्नवदात्मसंयोगजन्यत्वमध्यवसेयमिति वैशेषिकसूत्रोपस्कारकारा व्याचक्षते।

ननु गमनस्य कर्म्मपर्य्यायतया कर्म्मसामान्येष्वेव गच्छतीति प्रयोगस्य दृष्टत्वेन कर्म्मवृत्तिजातिमात्रैरेव गमनत्वस्य विरोधाभावात् कथं सामान्यधर्म्मावच्छिन्नानां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण धर्म्मिप्रतिपादनरूपो विभागः प्रकृते सङ्गच्छते उत्क्षेपणत्वादीनां चतसृणामेव जातीनां परस्परविरुद्धतया चतुर्द्धैव विभागस्य सम्भवादिति चेन्न विभिन्नबुद्धिव्यपदेशभाजाम् भ्रमणरेचनादीनामेकेन शब्देन संग्रहार्थमेव गमनस्य पृथगभिधानात्। अथवा गमनत्वमिदं न कर्म्मत्वव्यापिका जातिः, किन्तु कर्म्मत्वव्याप्या पञ्चमी जातिः, सा च न कर्म्मसामान्यवृत्तिः, परं उत्क्षेपणादिचतुष्टयभिन्नवृत्तिरेव, अतो नोक्तदोषः। यश्च कर्म्मसामान्य एव गच्छतीति व्यवहारः, स तु गौण एव,

भ्रमणादिष्वेव तत्प्रयोगस्य मुख्यत्वात्। निष्क्रमणत्वप्रवेशनत्वादिकन्तु परस्परं साङ्कर्य्यान्न जातिरिति।

अत एव निष्क्रमणत्वप्रवेशनत्वादिका तु न जातिः, एकस्मिन्नेव कर्म्मणि गृहाद् गृहान्तरं गच्छति पुरुषे कस्यचिद् द्रष्टुः प्रविशतीति प्रत्ययः, कस्यचित्तु निष्क्रामतीति, तत्र जातिसङ्करः स्यात्। तथा भ्रमणादेरेकस्या जलप्रणाल्या निष्क्रम्यापरां प्रविशति निष्क्रामति प्रविशतीति प्रत्ययद्वयदर्शनादुपाधिसामान्य-भेदतदध्यवसेयमिति शङ्करमिश्राः प्रवदन्ति।

'आकुञ्चनं नाम सत्स्वेव अवयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं वस्त्राद्यवयविकौटिल्योत्पादकं कर्म्म, यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः। एवमवयवानां पूर्व्वोत्पन्नानारम्भकसंयोगविनाशकं कर्म्म प्रसारणं, यतो भवति प्रसरति वस्त्रं प्रसरति चर्म्म प्रविकसति पद्ममित्यादिप्रत्ययः' इति वैशेषिकसूत्रोपस्कारे शङ्करमिश्राः प्राहुः।

तिर्य्यक्पतनेति मूलं वक्रगमनार्थकं, न तु गुरुत्वजन्यतावच्छेदकपतनत्व-जात्यवच्छिन्नपरं नमनपदेनैव तल्लाभात् नमनोन्नमनशब्दयोः प्रकृते अधोगमनोर्द्धगमनार्थकत्वादिति ध्येयम्।

सर्व्वत्रैव कर्म्मसु गच्छतीति व्यवहारनियामको गौणमुख्यसाधारणो धर्म्मस्तु स्वाश्रयसंयोगविभागासमवायिकारणत्वमेव। तमेव धर्म्ममुपादाय तुल्यतया मुख्ये गौणे च गमने गमनत्वव्यवहार इति समासः।

ভাষ্যতাৎপর্য্য

চলনপ্রতীতিতে যে কর্ম্মত্বজাতি প্রত্যক্ষত উপলব্ধ হয়, উহাই কর্ম্মের সামান্য লক্ষণ। কেহ কেহ বলেন যে, সংযোগভিন্ন হইয়া যে সংযোগের অসমবায়ি কারণ হয়, তাহাকে কর্ম্ম কহে। এ স্থলে বুঝিতে হইবে এই যে, সংযোগের অসমবায়ি কারণ কোনও স্থানে কর্ম্ম ও কোনও স্থানে সংযোগ হইয়া থাকে, অন্য কোনও পদার্থ সংযোগের অসমবায়ি কারণ হয় না; অতএব সংযোগকে বাদ দিয়া সংযোগের অসমবায়ি কারণ বলিতে একমাত্র কর্ম্মকেই পাওয়া যাইবে। বস্তুতঃ কর্ম্মত্বজাতিরূপ

লঘুধর্ম্মের কর্ম্মলক্ষণত্ব সম্ভবসত্ত্বে উক্ত গুরুতর লক্ষণ করা ন্যায্য নহে ; এই জন্য পূর্ব্বকল্পই উত্তম।

উক্ত কর্ম্ম উৎক্ষেপণ অপক্ষেপণ আকুঞ্চন প্রসারণ গমন এই পাঁচ প্রকার। ভ্রমণ রেচন স্যন্দন উর্দ্ধজ্বলন বক্রগমন নমন ও উন্নমন এই পঞ্চপদার্থ গতিবিশেষ বলিয়া গমন পদদ্বারাই উহার লাভ হওয়ায় আর উহা অতিরিক্তরূপে নির্দ্দেশ করা হয় নাই।

এখন আশঙ্কা হয় এই যে, যেমন ভ্রমণ রেচন প্রভৃতি পদার্থ গতিবিশেষ বলিয়া উহার পৃথক্‌রূপে নির্দ্দেশ করা হয় নাই, ঐরূপ উৎক্ষেপণাদিও উর্দ্ধগতি প্রভৃতি-স্বরূপ বলিয়া তাহার পৃথক্ নির্দ্দেশ অসঙ্গত হয়, তাহার উত্তর এই যে, উৎক্ষেপণাদি গতিবিশেষ নহে, কিন্তু গতির অনুকূলব্যাপারবিশেষ। যেমন 'লোষ্ট্রমুৎক্ষিপতি' এই স্থলে যে লোষ্ট্রের উর্দ্ধে গতি হইতেছে, উহাই গতির আশ্রয় এবং সেই গতির অনুকূলব্যাপার হস্তচালনাদি চেতনে রহিয়াছে ; উক্ত চেতনব্যাপারই উৎক্ষেপণ ; উর্দ্ধে গতিমাত্র নহে। এইরূপ অপক্ষেপণ অধঃসংযোগানুকূলব্যাপারানুকূলব্যাপার। আকুঞ্চন প্রসৃতবস্তুর সঙ্কোচসাধন, উহাও সংযোগবিশেষানুকূলব্যাপারানুকূল-ব্যাপার। প্রসারণ সঙ্কুচিতবস্তুর প্রসারসাধন অর্থাৎ সংযোগবিশেষানুকূলব্যাপারানু-কূলব্যাপার। কাজেই ঐ সকল পদার্থ গমনপদে লাভ করা যায় না বলিয়াই উহার পৃথক্ উপাদান করা হইয়াছে।

কেহ কেহ বলেন যে উৎক্ষেপণপ্রভৃতি উর্দ্ধগমনাদিভিন্ন আর অতিরিক্ত কিছুই নহে, অতএব উহা গমনপদে লাভ করা যাইলেও মুনিগণ স্বতন্ত্রেচ্ছাপ্রণোদিত হইয়া বিভাগাদি করিয়া থাকেন, তাহাদের কথার উপর তদ্বিষয়ে প্রশ্ন অসঙ্গত। ইহা উত্তম উত্তর নহে. বাস্তবিক অনুভবসিদ্ধ বস্তুদ্বারা নিষ্পাদিত পূর্ব্ববর্ত্তী উত্তরই সমীচীন।

प्रशस्तपादभाष्यम्

सामान्यं द्विविधं परमपरञ्चेति। तच्च अनुवृत्ति-प्रत्ययकारणम्। तत्र परं सत्ता महाविषयत्वात्, सा

च अनुवृत्तेरेव हेतुत्वात् सामान्यमेव। द्रव्यत्वाद्यपरमल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सत् विशेषाख्यामपि लभते।

[सामान्यं विशेष इति बुद्ध्यपेक्षम्—१ अ—२ आ—३ सू। भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव—१ अ—२ आ—३ सू। द्रव्यत्वं गुणत्वं कर्म्मत्वञ्च सामान्यानि विशेषाश्च—१ अ—२ आ—५ सूत्राणि आलम्बनानि।]

जगदीशसूक्तिः

सामान्यं कतिविधमित्यत्रोत्तरयति सामान्यमिति। द्विविधे (१) दर्शयति परमपरञ्चेति (२) ननु व्यक्तिभिन्नस्य सामान्यस्य अलोकत्वात् तद्विभागोऽनुपपन्न इत्यत आह तच्चेति। अनुगतप्रत्ययोऽनुगतबुद्धिः कारणं युक्तियँच(३) तादृशम्। तथाच व्यक्तिभिर्नानाधर्म्मिकानुगतबुद्ध्यसम्भवात् तन्निर्व्वाहकमवश्यं सामान्यमुपेयम्। यद्वा (४) ननु लक्षणतः सामान्यरूपेणावगतस्यैव विशेषतो विभागौचित्यात् प्रथमतः सामान्यस्य विभागोऽनुचित इत्यत आह तच्चेति। अनुवृत्तिप्रत्ययकारणं(५) नानाधर्म्मिण्येकप्रकारकप्रमाप्रकारीभूतो धर्म्मः (६) सामान्यमिति तदर्थः।

प्रकारत्वञ्च समवायेन ग्राह्यम्, अतोऽभावत्वादेरखण्डत्वेऽपि न तत्रातिव्याप्तिः। अभावत्वादिकमपि सामान्यमेव। जातित्वं पुनस्तस्य

---

(१) द्वैविध्यं (ख) पुस्तके।

(२) परमपरमिति (ख) पुस्तके।

(३) तत्कारणं शक्तियँच (ख) पुस्तके।

(४) यद्वेति पाठः (ख) पुस्तके नास्ति।

(५) अनुवृत्तिप्रत्ययकारणम् इति पाठः (ख) पुस्तके नास्ति।

(६) यो धर्म्मः सः इति (ख) पुस्तके पाठः।

नास्ति समवेतसामान्यस्यैव जातित्वादित्यपि केचित् (७)। तत्र परापरसामान्ययोर्मध्ये। महेति-महान् सकलसामान्याश्रयः विषय आश्रयो यस्य तत्त्वादित्यर्थः।

ननु द्रव्यत्वादिरिव सत्तापि सामान्यविशेषतया (८) कथं न व्यवह्रियत इत्यत आह सा चेति। सा सत्ता अनुवृत्तेरनुगतबुद्धेरेव हेतुत्वात् सामान्यमेव सामान्यपदाभिलप्यमानैव, न तु सामान्यविशेषपदाभिलप्यमाना। स्वानाश्रयसामान्यवद्व्यावृत्तत्वधीजनकस्य (९) सामान्यविशेषत्वादिति सम्प्रदायः।

वस्तुतो ननु (१०) घटः सन्नित्यादिप्रतीतेर्वर्त्तमानत्व(११)रूपसत्तावगाहित्वेनैवोपपत्तेः सत्तारूप(१२)सामान्ये प्रमाणाभाव इत्यत आह सा चेति। अनुवृत्तेरिति भावो भूतो वर्त्तमानश्च सर्व्व एव घटः सन्, न तु सदन्य (१३) इत्याकारकानुगतप्रतीतेर्हेतुत्वात् नियामकत्वात् सामान्यमेव, (१४) न तु वर्त्तमानत्वरूपा भाविन्यतीते वा वर्त्तमानत्ववाधेन तादृशप्रतीतेर्भ्रमत्वापातादिति तु नव्याः।

द्रव्यत्वादीति—सामान्यमित्यनुषज्यते। अल्पेति—अल्पः विषयः आश्रयो यस्य तत्त्वात् सामान्यवन्निष्ठाभावप्रतियोगिसामान्यत्वादिति यावत्।

ननु द्रव्यत्वं जातिविशेष इत्यादिकः कथं व्यवहारः सामान्यत्व-

---

(७) कश्चित् इति (ख) पुस्तके।

(८) विशेषात्मतया इति (ख) पुस्तके।

(९) स्वनाश्रयसामान्यवद्व्यावृत्तिधीजनकेति (ख) पुस्तके।

(१०) ननु इति पाठः (ख) पुस्तके नास्ति।

(११) वर्त्तमानत्वादि इति (ख) पुस्तके।

(१२) सत्तारूपेति (ख) पुस्तके।

(१३) असन् इति (ख) पुस्तके।

(१४) सामान्यवत्त्वादिति (ख) पुस्तके।

विशेषत्वयोर्मिथोविरोधादत आह तच्चेति। तत् द्रव्यत्वादि। (१५) व्यावृत्तेः स्वानाश्रयसामान्यवद्व्यावृत्तत्वबुद्धेः हेतुत्वात् जनकत्वात्। विशेषाख्यां विशेषसंज्ञां लभते, न तु नित्यद्रव्यवृत्त्यन्त्यविशेषत्वमित्यर्थः।

सूक्तिदीपिका

सामान्यमिति—समानानां भावः स्वाभाविकोऽनागन्तुको वहूनां धर्म्मः सामान्यमिति किरणावली। अत्र धर्म्मत्वं वृत्तित्वं, तच्च समवायसम्बन्धावच्छिन्नमिति नित्यत्वे सति अनेकसमवेतत्वं जातित्वमिति लक्षणं परिप्राप्तं भवति। अत एव शङ्करमिश्रा अपि 'नित्यमनेकव्यक्तिवृत्ति सामान्यं नित्यत्वे सति स्वाश्रयान्योन्याभावसमानाधिकरणं वा।' इति प्राहुरुपस्कारे। संयोगविभागयोरनेकसमवेतत्वसत्त्वादतिव्याप्तिवारणाय सत्यन्तम् ध्वंसाप्रतियोगित्त्वे सति प्रागभावाप्रतियोगित्वसमानाधिकरणार्थकम्। वस्तुतस्तु प्रकृतलक्षणे नित्यत्वं ध्वंसाप्रतियोगित्वं प्रागभावाप्रतियोगित्वं वा वाच्यम् विशेषणान्तरनिवार्य्यप्रागभावध्वंसान्यतरातिव्याप्तेः समवेतत्वदलेनैव वारयितुं शक्यत्वात्। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्ति अतोऽनेकेति। नित्यत्वे सति अनेकवृत्तित्वं घटात्यन्ताभावादीनामप्यस्ति अतः वृत्तित्वसामान्यं विहाय समवेतत्वमिति। ननु अनेकत्वं एकभिन्नत्वं तच्च द्रव्यादावसम्भवि एकत्वस्य तत्र सर्व्वत्र सत्त्वादिति चेन्न अनेकपदेन समवेतत्वे भेदविशिष्टत्वस्य विवक्षितत्वात्। वैशिष्ट्यञ्च स्वानुयोगिनिरूपितत्व-स्वप्रतियोगिनिरूपितत्वोभयसम्बन्धेन। अनेकवृत्तित्वञ्च स्वाश्रयान्योन्याभावसामानाधिकरण्यमिति किरणावलीप्रकाशे वर्द्धमानोपाध्यायाः।

अनुवृत्तिप्रत्ययकारणमिति—तथाहि नह्यनुगतं धर्म्ममन्तरेण विभिन्नव्यक्तीनामनुगतप्रतीतेः सम्भव इत्यनुगतप्रतीतिरेव सामान्यसाधिकेति भावः। न च लवणघोटकादिनानाविभिन्नजातीयानामपि सैन्धवादिशब्दवाच्यत्वेनेव तत्र तत्र घटादिशब्दवाच्यत्वेनैव अनुगतप्रतीतिरास्तामिति किं वा तदर्थं

---

(१५) तद्व्यावृत्तेरिति (ख) पुस्तके।

सामान्याङ्गीकारेणेति वाच्यम् वाच्यतावच्छेदकतया सुतरामेव जातेरभ्युपगन्तव्यत्वात् अनधिगतशब्दशक्तीनामपि सर्व्वघट गोचर तुल्याकारप्रतीतिदर्शनाच्चेत्यादिकमूह्यम्।

परमपरञ्चेतीति—परत्वमधिकदेशवृत्तित्वं व्यापकत्वमिति यावत्। तच्च यदपेक्षया परत्वं स्वभिन्नत्वे सति तद्वन्निष्ठात्यन्ताभावप्रतियोगित्वम्। स्वस्मिन् स्वापेक्षया परत्ववारणाय स्वभिन्नत्वे सतीति सत्यन्तम्। अधिकदेशवृत्तित्वमिति यथाश्रुतार्थस्मरणे तु स्वव्यभिचारित्वे सति व्यापकत्वमिति वाच्यम्; तेन स्वस्य स्वव्यभिचारित्वाभावात् नातिप्रसङ्गः। ईदृशार्थानुसरणे तु 'एकव्यक्तिसमावेशे सती'ति किरणावलीसूचितं सामानाधिकरण्यविशेषणमप्यनुपादेयम्, विरुद्धजात्योर्न्यूनातिरिक्तवृत्तित्वस्थल एव अतिप्रसङ्गवारणाय तदुपादानस्य कर्त्तव्यतया प्रकृतव्यापकत्वविरहादेव तद्वारणस्य शक्यसाधनत्वात्। अपरत्वमल्पदेशवृत्तित्वं व्याप्यत्वमिति यावत्। तच्च स्वभिन्नत्वे सति स्वाभाववदवृत्तित्वम्। स्वस्मिन् स्वापेक्षया अपरत्ववारणाय सत्यन्तम्। अल्पदेशवृत्तित्वमिति यथाश्रुतार्थरक्षापक्षपातिनस्तु स्वाधिकरणवृत्तित्वे सति स्वाधिकरणवृत्त्यभावप्रतियोगित्वमित्यर्थमाहुः। विरुद्धजात्योरन्योन्यं परत्वापरत्ववारणाय सत्यन्तम्। अत एव किरणावल्यामुदयनाचार्य्याः 'परं व्यापकमपरं व्याप्यमित्यर्थ' इत्याहुः।

लक्षणत इत्यादि—एतच्च तद्धर्म्मावान्तरधर्म्मप्रकारकज्ञानगोचरेच्छारूपजिज्ञासायां लक्षणतस्तद्धर्म्मप्रत्ययस्य हेतुतामभ्युपगम्य। अत एव सव्यभिचारादौ 'लक्षणतः सामान्यमप्रतीतवतो विशेषजिज्ञासानुदया'दित्यादिग्रन्थोक्तिरुपलभ्यते।

फलानुसन्धानेन प्राञ्चः षट् जातिबाधकान् कल्पयन्ति,—यथा—

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः।" इति।

अत एव किरणावल्यां—'नैकव्यक्तिकं सामान्यमस्तीति आकाशादौ वक्ष्यते। नान्यूनानतिरिक्तव्यक्तिकमिति' इत्यादि श्रीमदुदयनाचार्य्याः प्राहुः। अस्य विशेषतो विस्तरस्तु अस्मत्कृतजातिबाधकविचारप्रकरणे समनुसन्धेयः, अत्र ग्रन्थगौरवभयादेव तस्य नोपादानमिति। संक्षेपतस्तु

व्यक्तेरभेदः स्वाश्रयैकमात्रव्यक्तिकत्वं; तच्च गगनत्वादेर्जातित्वे बाधकम्। तुल्यत्वं तुल्यव्यक्तिवृत्तिकत्वं स्वभिन्नजातिसमनियतत्वमिति यावत्। तच्च घटत्वकलशत्वयोरुभयोर्जातित्वबाधकम्. तथाहि तयोरेकतरमेव सामान्यं न तु द्वयमिति भावः। सांकर्य्यं परस्पराभावसामानाधिकरण्ये सति सामानाधिकरण्यं, तच्च भूतत्वमूर्त्तत्वादीनां परस्परं जातित्वबाधकम्। अनवस्थितिरनवस्था, सा च जातीनां जातिमत्त्वे बाधिका। रूपहानिः स्वतोव्यावर्त्तकत्वादिरूपलक्षणहानिः विशेषाणां जातिमत्त्वे बाधिका। तथाहि सामान्याश्रयस्य सामान्यरूपेणैव व्यावर्त्तकताया नियमात् विशेषाणां जातिमत्त्वे न स्वतोव्यावर्त्तकत्वसम्भव इति भावः। असम्बन्धस्तु समवायाभावः। स च समवायादीनां जातित्वबाधक इति। समवायेनेति—तृतीयार्थोऽवच्छिन्नत्वं; तच्च प्रकारतानिरूपकत्वरूपप्रकारकत्वैकदेशप्रकारतान्वयि, तेन समवायसम्बन्धावच्छिन्नप्रकारताकमित्यर्थः।

न तत्रातिव्याप्तिरिति—अभावत्वप्रकारकाभावविशेष्यकप्रमाप्रकारतायाः स्वरूपसम्बन्धेनैव प्रमानिरूपिततया समवायसम्बन्धावच्छिन्नत्वविरहात्। प्रमापदस्यापि समवायसम्बन्धेन अभावत्वप्रकारकभ्रममादाय व्यावृत्तिर्बोध्या। एकगगनधर्म्मिकगगनपरिमाणादिप्रकारकप्रमाप्रकारीभूतगगनपरिमाणाद्यतिप्रसङ्गवारणाय धर्म्मांशे नानेति। नानाधर्म्मिकनानाप्रकारकसमूहालम्बनमुपादाय तथैवातिप्रसङ्गवारणाय प्रकारांशे एकेति। भेदविशिष्टविशेष्यतानिरूपितभेदविशिष्टान्यप्रमीयसमवायसम्बन्धावच्छिन्नप्रकारत्वाश्रयो धर्म्म इति निष्कृष्टार्थः। वैशिष्ट्यञ्च स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वैतदुभयसम्बन्धेन।

सकलेति—साकल्यम् आश्रये विशेषणम्, नतु सामान्ये, यावतां सामान्यानामेकस्याश्रयस्याप्रसिद्धेः।

स्वानाश्रयेत्यादि—अत्र स्वपदं सामान्यविशेषत्वेनाभिमतपरम्, तथाहि सत्तायाः सकलसामान्याश्रयवृत्तित्वात् स्वानाश्रयो न कश्चित् सामान्यवान् यतो व्यावृत्तिबुद्धिजनकतया सापि सामान्यविशेषः स्यादिति। द्रव्यत्वादेस्तु गुणत्वादिसामान्याश्रयावृत्तित्वेन स्वानाश्रयः सामान्यवान् गुणादिरेव ततो व्यावृत्तत्वधीजनकतया द्रव्यत्वादिकं सामान्यमिव विशेषोऽपि इति भावः।

न तु नित्येत्यादि— तथाहि प्रकृतविशेषत्वं स्वानाश्रयसामान्यवद्व्या वृत्तता-धीजनकत्वमेव, नतु नित्यद्रव्यवृत्त्यन्त्यविशेषत्वम्, अत एव तादृशविशेषस्य द्रव्यत्वादावसत्त्वेऽपि नासङ्गतिः।

ভাষ্যতাৎপর্য্য

কোনও কোনও ধর্ম্মের দ্বারা পদার্থের অনুগতরূপে প্রতীতি হইয়া থাকে, যেমন দ্রব্য বলিলে দ্রব্যত্বরূপে সকল দ্রব্যের বা গুণ বলিলে গুণত্বরূপে সকল গুণের প্রতীতি হয়। এইরূপ আবার অভাব বলিলে অভাবত্বরূপে সকল অভাবের বা ভেদ বলিলে ভেদত্বরূপে সকল ভেদের প্রতীতি হইয়া থাকে। উক্ত অনুগত প্রতীতির হেতু কতিপয় ধর্ম্ম উপাধিনামে ও কতিপয় ধর্ম্ম জাতি নামে আখ্যাত হইয়া থাকে। তন্মধ্যে জাতিনামক ধর্ম্ম নিজ আশ্রয়ে সমবায় সম্বন্ধে থাকে ও উপাধিগুলি স্বাশ্রয়ে সাধারণতঃ স্বরূপসম্বন্ধে থাকে। এবং একব্যক্তিবৃত্তি গগনত্ব প্রভৃতি ধর্ম্মকেও উপাধি বলা হইয়া থাকে, জাতিনামক ধর্ম্ম একমাত্রব্যক্তি-বৃত্তি হয় না। এই সকল অনুসন্ধান করিয়া প্রাচীন দার্শনিকগণ জাতির এই লক্ষণ বলিয়া থাকেন, যথা—যে ধর্ম্ম স্বয়ং নিত্য অর্থাৎ ধ্বংসপ্রাগভাবশূন্য এবং বহু ব্যক্তিতে সমবায় সম্বন্ধে বর্ত্তমান থাকে, তাহাকে জাতি কহে।

সংযোগ ও বিভাগ প্রভৃতি অনেকে সমবেত হইলেও উহা নিত্য নহে। গগনপরিমাণাদি নিত্য ও সমবেত হইলেও অনেকে সমবেত নহে। অত্যন্তাভাবাদি নিত্য ও অনেকবৃত্তি হইলেও সমবায় সম্বন্ধে বৃত্তি নহে। এই জন্যই সংযোগ বিভাগ প্রভৃতিতে জাতিলক্ষণের অতিব্যাপ্তি হইল না। উক্ত জাতির সিদ্ধি অনুগত প্রতীতিমূলক, অর্থাৎ যদি ঐরূপ বহুবস্তুগত সামান্য ধর্ম্ম কল্পিত না হয়, তবে পূর্ব্বোক্ত অনুগত প্রতীতি অসম্ভব হইয়া উঠে। কেবল মাত্র ব্যক্তি স্বীকার করিলে প্রতি ব্যক্তির পরস্পর ভেদ থাকায় কোনও রূপে নানা ধর্ম্মীতে একাকার অনুগত প্রতীতি হইতে পারে না। অতএব ব্যক্তির আশ্রিত জাতিও স্বীকার করিতে হয়। নানা ধর্ম্মীতে যে ধর্ম্মের সমবায় সম্বন্ধে প্রমাজ্ঞান হয়, উহাই সামান্য ইহাই জগদীশের মত। এ স্থলে সামান্য পদের অর্থ জাতি হইলে নিত্য বিশেষণও দিতে হইবে; তাহা না হইলে সংযোগ ও বিভাগে অতিব্যাপ্তি হয়। অভাবত্বাদির

সমবায় সম্বন্ধে প্রমাজ্ঞান হয় না বলিয়াই উহা সামান্য নহে। কেহ বলেন যে অভাবত্বাদি সামান্য বটে অর্থাৎ অনুগত প্রতীতির কারণ বটে, কিন্তু উহা জাতি নহে, এই মতে সামান্যলক্ষণে সমবায় সম্বন্ধে প্রমাজ্ঞান বলিবার প্রয়োজন নাই। উক্ত সামান্য দুই প্রকার পর ও অপর। সকল সামান্যাশ্রয়ে যাহার বর্ত্তমানতা আছে, উহাই পর সামান্য। উহা কেবল অনুবৃত্তি বা অনুগত প্রতীতির হেতু বলিয়া কেবল সামান্য। দ্রব্যত্বাদি অপর সামান্য, কারণ উহা সকল সামান্যাশ্রয়ে থাকে না। দ্রব্যত্ব গুণে থাকে না বা গুণত্ব দ্রব্যে থাকে না। কর্ম্মত্ব দ্রব্যাদিতে থাকে না। অতএব দ্রব্যত্বাদি জাতির আশ্রয় সত্তা জাতির আশ্রয় অপেক্ষা অল্প। উহা যেমন অনুগত প্রতীতির হেতু বলিয়া সামান্য ঐরূপ ব্যাবৃত্তিবুদ্ধির হেতু বলিয়া বিশেষ সংজ্ঞায়ও অভিহিত হইয়া থাকে। যে জাতির অভাবাশ্রয়ে অপর কোনও জাতি আছে এবং উহা উক্ত অভাবাশ্রয় হইতে ব্যাবৃত্তি বুদ্ধির হেতু, তাহাই সামান্য অথচ বিশেষ। এই বিশেষপদ উক্ত অর্থেই ব্যবহৃত হইয়াছে। নিত্যদ্রব্যবৃত্তি অন্ত্য বিশেষ অর্থে নহে। সত্তার অনাশ্রয় কোনও সামান্যবান্ প্রসিদ্ধ না থাকায় সত্তা কেবল সামান্য, বিশেষ নহে। দ্রব্যত্বাদির অনাশ্রয়ে গুণাদিতে গুণত্বাদি জাতি:আছে এবং উহা যেমন অনুগত প্রতীতির হেতু, ঐরূপ গুণাদি হইতে ব্যাবৃত্তিবুদ্ধিরও হেতু, এই জন্যই উহা সামান্য এবং বিশেষ।

এখন আপত্তি হইতেছে এই যে, সত্তা নামে দ্রব্য গুণ ও কর্ম্মগত একটী জাতি স্বীকার না করিয়া উহা বর্ত্তমানত্বরূপ স্বীকার করিলেই সত্তা প্রতীতির উপপত্তি হইতে পারে, তবে আর অতিরিক্ত পদার্থ স্বীকার করিতে যাইব কেন? তাহার উত্তর এই যে, যখন ভাবী ভূত ও বর্ত্তমান সর্ব্ববিধ দ্রব্যাদিতেই তুল্যরূপে সত্তার প্রতীতি হয়, তখন উহাকে কিরূপে বর্ত্তমানত্বরূপ স্বীকার করা যায়? বর্ত্তমানত্ব কেবল বর্ত্তমান পদার্থেই থাকে, ভাবী ও ভূত পদার্থে উহা থাকিতে পারে না। অথচ ভাবী ও ভূত ঘটাদিতে যে সত্তার প্রতীতি হয়, উহা ভ্রমরূপ হইয়া ওঠে। বাস্তবিক উহা শাস্ত্রসম্মত প্রমাজ্ঞানই বটে। অতএব সকল জাতি অপেক্ষা অধিকদেশবৃত্তি বা সকল জাতির ব্যাপক সত্তা নামে যে জাতি আছে, তাহা শুদ্ধ পর সামান্য। কারণ উহা কোনও জাতি অপেক্ষা অল্পদেশবৃত্তি নহে। দ্রব্যত্বাদি জাতি সত্তা জাতি অপেক্ষা যেমন অল্পদেশবৃত্তি বলিয়া অপর সামান্য, ঐরূপ ঘটত্বাদি জাতি অপেক্ষা অধিকদেশবৃত্তি বলিয়া পর সামান্য; এই জন্য পরত্ব ও অপরত্বের

একত্র সমাবেশে উহা পরাপর সামান্য। আর ঘটত্বাদি জাতি কোনও জাতি অপেক্ষা অধিকদেশবৃত্তি হয় না বলিয়া এবং দ্রব্যত্বাদি অপেক্ষা অল্পদেশবৃত্তি হয় বলিয়া উহা শুদ্ধ অপর সামান্য। এই তত্ত্ব অনুসন্ধান করিয়াই ন্যায়পঞ্চানন বিশ্বনাথ কারিকাবলী গ্রন্থে ঐরূপ নির্ণয় করিয়াছেন।

प्रशस्तपादभाष्यम्

नित्यद्रव्यवृत्तयो ह्यन्त्या (१) विशेषाः। ते च खल्वत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद्विशेषा एव (२)।

[अन्यत्र अन्त्येभ्यो विशेषेभ्यः—१अ—२आ—६ सूत्रमालम्बनम्।]

जगदीशसूक्तिः

विशेषत्वं यदि व्यावर्त्तकत्वमात्रं तदा सामान्यादावतिप्रसक्तिरतो विशेष(३)मभिदधान एव बहुवचनेन तदाश्रयस्यानेकविधत्वं दर्शयति नित्येति। नित्यं सर्वदा द्रव्यवृत्तयो द्रव्यसमवेता इत्यर्थः। तेन द्रव्यकर्म्मणोर्घटत्वगुणत्वादेश्च व्युदासः। तावन्मात्रञ्च (४) नित्यगुणद्रव्यत्वाद्यतिव्याप्त(५)मत उक्तम् अन्त्या इति। अन्तो विरतिः नित्यद्रव्यवृत्तिजातिगुणयोर्विच्छेद इति यावत्। तद्वदित्यर्थः। तेन सर्वदा नित्य(६)-द्रव्यसमवेतत्वे सति नित्यद्रव्यवृत्तिजातिगुणाभ्यां भिन्नत्वमेव प्रकृते विशेषत्वमिति फलितार्थः। [जातिजातिमद्भिन्नत्वे सति नित्यद्रव्य-

---

(१) ऽन्त्या इति (ख) पुस्तके।

(२) एव विशेषा इति (ग) पुस्तके।

(३) विशेषत्व-(ख) पुस्तके।

(४) तावन्मात्रं-(ख) पुस्तके।

(५) द्रव्यत्वाद्यतिप्रसक्त इति (ख) पुस्तके।

(६) नित्येति (ख) पुस्तके नास्ति

समवेतत्वं विशेषत्वमित्यपि केचित्।] यद्वा अन्ते अन्तकाले महाप्रलये वर्त्तमाना अन्त्यास्तेन कर्म्मव्यक्तीनां व्युदासः। तस्मात्तत्र घटत्वादौ ध्वंसे च गतमत उक्तं नित्यद्रव्यवृत्तय इति। नित्यद्रव्यमात्रसमवेता इति तदर्थः।

नचैवं नित्यगुणेष्वात्मत्वजातौ चातिप्रसङ्गः कर्म्मवृत्तिसामान्यशून्यत्वे सति नित्यद्वयसमवेतान्यत्वेनापि विशेषणीयत्वादिति भावः।

ननु द्रव्यत्वादिसामान्यानामिव अन्त्यविशेषाणामपि कुतो न सामान्यविशेषत्वमत आह ते च (७) खल्विति। अत्यन्तव्यावृत्ति-बुद्धिहेतुत्वात् अनुगत(८)बुद्ध्यजनकत्वे सति व्यावृत्तिबुद्धिजनकत्वात् विशेषा एव विशेषपदवाच्या (९) एव, नतु सामान्यपदवाच्या (१०) अपीत्यर्थः।

सूक्तिदीपिका

विशेषत्वमित्यादि—व्यावर्त्तकत्वमात्रम् इतरव्यवच्छेदकत्वम् इतरभेदसाधकत्वमिति यावत्। सामान्यादादित्यादि द्रव्यत्वादिजातीनामपि इतरेभ्यो द्रव्यादिव्यावर्त्तकत्वेन तल्लक्षणस्य विशेषस्य तत्रापि सत्त्वादतिव्याप्तिरिति भावः। तदाश्रयस्य विशेषाश्रयस्य अनेकविधत्वं तत्तद्विशेषाणामाश्रयिणां भिन्नतया तत्तत्पुरस्कारेणाश्रयाणामनेकप्रकारत्वमित्यर्थः। अत एव किरणावल्यां "विशेषा इति बहुवचनेनानन्त्यं विवक्षितम्" इत्युदयनाचार्य्याः। सेतु-टीकायामपि-"अत्र विशेषा इति बहुवचनेन विना बाधकमसङ्कुचितेनानन्त्यं विवक्षितम्।" इति पद्मनाभमिश्राः प्राहुः।

तेनेति—नित्यमित्यादिरीत्या व्याख्यानोपक्षेपेणेत्यर्थः। तथाहि द्रव्यकर्म्मणो

---

(७) ते च इति (ख) पुस्तके।

(८) अनुवृत्तीति (ख) पुस्तके।

(९) पदाभिलप्या इति (ख) पुस्तके।

(१०) पदाभिलप्या इति (ख) पुस्तके।

घटत्वगुणत्वादिकञ्च न नित्यं द्रव्यसमवेतानि द्रव्यकर्म्मघटत्वानां द्रव्यसमवेतत्वेऽपि सर्गादौ महाप्रलये च जन्यद्रव्यकर्म्मघटाद्यभावेन गुणत्वादेश्च गुणादावेव समवायेन द्रव्यसमवेतत्वाभावेन च निरुक्तलक्षणास्पर्शात्। तावन्मात्रमिति नित्यद्रव्यसमवेतत्वमात्रमित्यर्थः। नित्यगुणा गगनपरिमाणादयः। ते च नियतमेव द्रव्यसमवेताः स्वेषामाश्रयाणाञ्च चिरस्थिरत्वात्। द्रव्यत्वमपि गगनादिनित्यद्रव्यवृत्तितया स्वस्यापि नित्यतया नित्यद्रव्यसमवेता एवेति तावन्मात्रेण भवत्यतिव्याप्तिरिति भावः। एकद्रव्याः स्वरूपसन्त इति लक्षणमित्युदयनाचार्य्याः। तदर्थश्च "एकद्रव्या इति एकमात्रद्रव्याश्रया इत्यर्थः। स्वरूपेति स्वरूपेणैव सन्तो नतु सत्तायोगेनेत्यर्थः। निःसामान्यत्वे सति एकद्रव्यमात्रवृत्तित्वमिति लक्षणार्थः" इति किरणावलीप्रकाशे वर्द्धमानोपाध्यायाः। एतन्मते विशेषस्य जातिमत्त्वबाधिका रूपहानिरपि अन्यथैव व्याख्येया स्वतोव्यावर्त्तकत्वस्य तत्र लक्षणत्वानभ्युपगमात्। परं तस्य सामान्यवत्त्वे निःसामान्यत्वघटितलक्षणहानिरित्यर्थः।

तेन सर्व्वदेत्यादि—गगनादौ अतिव्याप्तिवारणाय सत्यन्तम्। नित्यगुणद्रव्यत्वाद्यतिव्याप्तिवारणाय विशेष्यदलम्। नित्यद्रव्यवृत्तीति जातिगुणविशेषणं प्रकृतातिव्याप्तिस्थलमभिप्रेत्य, निष्कर्षे तु जातिगुणभिन्नत्वमात्रमेव निवेश्यम्। द्रव्यत्वातिव्याप्तिवारणाय जातीति। नित्यगुणातिव्याप्तिवारणाय गुणेति

जातीत्यादि—जातिभिन्नत्वे सति जातिमद्भिन्नत्वे च सति नित्यद्रव्यसमवेतत्वमित्यर्थः। द्रव्यत्वाद्यतिव्याप्तिवारणाय प्रथमसत्यन्तम्। नित्यगुणातिव्याप्तिवारणाय द्वितीयसत्यन्तम्। समवायादौ अतिव्याप्तिवारणाय विशेष्यम्। जातिभिन्नत्वं जातित्वमात्रावच्छिन्नप्रतियोगिताकभेदः जातिमद्भिन्नत्वञ्च जातित्वावच्छिन्नावच्छेदकत्वभिन्नावच्छेदकत्वानिरूपकप्रतियोगिताकभेद इत्यर्थो वाच्यः, तेन व्यासज्यवृत्तिधर्म्मावच्छिन्नभेदादिकमादाय न द्रव्यत्वादावतिव्याप्तिस्तदवस्थेति ध्येयम्।

तन्मात्रञ्चेति—निरुक्तार्थकमन्त्यत्वम्। घटत्वादाविति—महाप्रलये घटत्वादेराश्रयविरहेऽपि तस्य नित्यतया विनाशासम्भवेन काले घटत्वादेः कालिकेन सत्त्वमभ्युपेयते, अत एव घटत्वादेरन्त्यत्वम्।

नित्यद्रव्येत्यादि—ननु कालस्य नित्यद्रव्यतया तत्र महाप्रलये घटत्वादेः सत्ताभ्युपगमेन तावतापि नातिव्याप्तिनिरास इत्यत आह नित्यद्रव्यमात्रसमवेता इति तदर्थं इति। तत्वञ्च नित्यद्रव्येतरासमवेतत्वे सति समवेतत्वम्। विशेषस्यापि कालिकेन नित्यद्रव्यभिन्नवृत्तित्वात् सत्यन्तदले समवायनिवेशः। अत्यन्ताभावादौ अतिप्रसङ्गवारणाय च विशेष्यदले इत्यनुसन्धेयम्। तथा च घटत्वादेः कालिकेन नित्यद्रव्यवृत्तित्वेऽपि न तस्य तत्र समवेतत्वमिति निरस्तातिव्याप्तिः।

अतिप्रसङ्ग इति—नित्यगुणानां आत्मत्वजातेश्च अन्त्यत्वे सति नित्यद्रव्यमात्रसमवेतत्वादिति भावः। कर्म्मेत्यादि—नित्यगुणेषु अतिव्याप्तिवारणाय सत्यन्तम्। तत्रापि अन्त्येतिदलस्य कर्म्मव्यक्तिव्युदासकस्य वैयर्थ्यशङ्कानिराकरणाय कर्म्मावृत्तीति सामान्यविशेषणम्। आत्मत्वजातावतिप्रसङ्गवारणाय नित्यद्वयसमवेतान्यत्वदलम्। तथाहि नित्यगुणानां कर्म्मावृत्तिगुणत्वादिजातिशून्यत्वाभावात् अनेकात्मसमवेतस्य चात्मत्वस्य जातेर्नित्यद्वयसमवेतान्यत्वासम्भवात् न क्षतिः। न च अन्त्यत्वविशेषणमुपादाय सामान्यांशे कर्म्मावृत्तित्वविशेषणमपि नोपादेयं। तदत्र लाघवानुरोधेन तथैव लक्षणमस्त्विति वाच्यम्, कर्म्मावृत्तित्वस्य प्रकृते अभावघटकतया अखण्डाभावघटकत्वेन स्वसमानाधिकरणसाध्यव्याप्यतावच्छेदकधर्म्मान्तरघटितत्वरूपस्य वैयर्थ्यस्य तत्र अभावात्। विशेषाभावसामान्याभावयोः प्रतियोगितावच्छेदकभेदेन भेदात् प्रकृतसामान्याभावत्वविशेषाभावत्वयोर्वैयर्थ्यलक्षणघटकसामानाधिकरण्यस्य असम्भवादित्यवदातम्।

केचित्तु अन्ते अवसाने वर्त्तत इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थकरणात् स्वतोव्यावृत्तत्वमेव विशेषलक्षणमुपक्षिपन्ति। तच्च स्वतोव्यावृत्तत्वं स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसजातीयेतरभेदानुमित्यविषयत्वम्। साजात्यञ्च पदार्थविभाजकोपाधिरूपेण इत्याद्याहुः। लिङ्गांशे स्वभिन्नत्वनिवेशात् विशेषमात्रस्यैव स्वलिङ्गकस्वसजातीयविशेषान्तरभेदानुमितिविषयत्वेऽपि नासम्भवः। अनुमितौ स्वविशेष्यकत्वनिवेशात् 'घटो विशेषाद् भिद्यते कपालसमवेतत्वादित्याद्यनुमितेरपि स्वभिन्नलिङ्गकत्वात् विशेषप्रतियोगिकभेदविधेयकत्वाच्च तादृशानुमितिविषयतायाः स्वस्मिन् सत्त्वेन नासम्भवतादवस्थ्यम्

इत्यादिकमूह्यम्। एतन्मते अन्त्यत्वमेव विशेषलक्षणं, नित्यद्रव्यवृत्तय इति तु स्थानकथनमात्रम्; न तु लक्षणे प्रविष्टं प्रयोजनाभावात्। नव्यास्तु विशेषस्य अनवस्थाप्रसङ्गेन स्वतोव्यावर्त्तकत्वमङ्गीकृत्य अतिरिक्तपदार्थकल्पने गौरवात् निरवयवानां द्रव्याणामेव स्वतोव्यावर्त्तकत्वं वक्तुमुचितं, न तु कल्पितविशेषाणामित्याहुः। अत एव कारिकावलीदिनकरीये 'नवीनास्तु विशेषेऽतिरिक्ते मानाभावः, यथैव विशेषाणां स्ववृत्तिधर्मं विना व्यावृत्तत्वं तथैव नित्यद्रव्याणामपीत्याहु'रिति। नव्यमतादिविलक्षणतया निरुक्तविशेषपदार्थाङ्गीकार एव कणादमतस्य वैशेषिकसंज्ञाबीजमित्यनुसन्धेयम्।

ভাষ্যতাৎপর্য্য

অন্ত্য অথচ নিত্যদ্রব্যবৃত্তিপদার্থকে বিশেষ কহে। ইতঃপূর্ব্বে অনুবৃত্তির হেতু ধর্ম্মকে সামান্য এবং ব্যাবৃত্তির হেতু ধর্ম্মকে বিশেষ বলা হইয়াছে। যদি প্রকৃত বিশেষত্বও ব্যাবর্ত্তকত্বমাত্রই হয়, তবে সামান্য দ্রব্যত্বাদি ধর্ম্মও উক্ত বিশেষলক্ষণাক্রান্ত হইয়া পড়ে; তাহাতে বিশেষত্ব ও সামান্যত্ব বিরুদ্ধ ধর্ম্ম না হওয়ায় উক্ত দুই রূপে বিভাগ অসম্ভব হয়। এই জন্য বিশেষ বলিতে যাইয়া ভাষ্যকার যে বহুবচন নির্দ্দিষ্ট করিয়াছেন, উহা দ্বারা বিশেষের নানাত্ব লাভ করায় বিশেষের প্রত্যেক ব্যক্তিতে ভেদনিবন্ধন সামান্যতা খণ্ডন করিয়াছেন।

নিত্যদ্রব্যবৃত্তি এই শব্দের জগদীশমতে অর্থ এই যে, যাহা সর্ব্বদা দ্রব্যে সমবেত। কেবলমাত্র দ্রব্যসমবেত বলিলে দ্রব্য কর্ম্ম ও ঘটত্বাদিতে অতিব্যাপ্তি হয়, এই জন্য 'সর্ব্বদা' বলা হইয়াছে। সমবেত দ্রব্যমাত্রই জন্য, উৎপত্তির পূর্ব্বে তাহা দ্রব্যে সমবেত থাকে না এবং বিনাশের পরেও উহা দ্রব্যসমবেত নহে। কর্ম্ম জন্য ও বিনশ্বর, তাহাও সর্ব্বদা দ্রব্যে সমবেত থাকে না। ঘটত্ব ঘটেই সমবায় সম্বন্ধে থাকে, উক্ত ঘটের সৃষ্টির আদি ও প্রলয়কালে সত্তা না থাকায় ঘটত্ব সর্ব্বদা দ্রব্যসমবেত হইতে পারে না। অতএব ঐ সকল পদার্থে অতিব্যাপ্তি হইবে না। গুণত্ব দ্রব্যে সমবেতই হয় না, গুণেই উহা সমবায় সম্বন্ধে থাকে; অতএব দ্রব্যপদ দ্বারা গুণত্বের ব্যাবর্ত্তন করা হইয়াছে।

সর্ব্বদা যাহা দ্রব্যে সমবেত, তাহাকে বিশেষ বলিলে গগনপরিমাণাদি নিত্য

धर्मैर्विना उद्देशो द्रव्यादिपदेनोल्लेखः कृतः। द्रव्यत्वादीनान्तु पञ्चतावच्छेदकत्वेनोपन्नयात् न स्वावच्छिन्नेषु इतरभेदकमतस्तेषाम् उद्दिष्टत्वेऽपि न क्षतिरित्यभिप्रायः।

सूक्तिदीपिका

अपृथग्भूतानामिति—पृथक्तया अनवस्थितानामित्यर्थः। नहि कदाचिद्व्यक्तिमन्तरेण समवेतानां जात्यादीनां समवायेनावस्थितिरिति भावः। कालिकेन तु जात्यादीनां व्यक्तिमन्तरेणापि अवस्थितिरस्त्येवेति निरुक्तमधस्तात्।

अयुतसिद्धानामिति—युतसिद्धिः पृथक्सिद्धिः पृथगवस्थितिः, उभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं, सा येषां नास्ति तेषाम्। न च तन्त्वादिपरिहारेण पटादेः असत्त्वेऽपि पटादिपरिहारेण तन्त्वादीनां सत्त्वात् कथं निरुक्तपरस्परपरिहारेण उभयोरनवस्थितिकथनं सङ्गच्छत इति वाच्यं, परस्परपरिहारेण उभयोः पृथगाश्रयाश्रयिभावविरहस्य तदर्थत्वात्। युतसिद्धिस्तादृशाश्रयाश्रयित्वं, तद् यत्र, तत्र संयोगो न समवायः सम्बन्धः, यथा त्वगिन्द्रियशरीरायोः; शरीरादिकं हि त्वगिन्द्रियादिपरिहारेण पृथगाश्रये स्वावयवादौ समाश्रितमिति भावः। सेतुकारास्तु—"अत्रायुतसिद्धयोः सम्बन्धः समवायः, अयुतसिद्धिश्च उभयोरसम्बद्धयोरविद्यमानता। संयोगस्थले च संयोगोत्पत्तेः पूर्व्वम् उभावसम्बद्धावपि तिष्ठतः, समवायस्थले तु नित्यसम्बन्धिनो नित्यं सम्बद्धावेव"। इति व्याचक्षते। न च घटरूपादौ तत्समवायिकारणस्य घटादेरुत्पत्त्यनन्तरमेव रूपाद्युत्पत्तेस्तदसङ्गतिरिति वाच्यं, तत्रापि द्वयोरसम्बद्धभावेन युगपदवस्थित्यभावात्, उत्पत्तिक्षणे यदा घटादिस्तदा तदसम्बद्धरूपादेरभावात्, यदा च द्वयोः सत्त्वं, तदा तौ सम्बद्धावेव नासम्बद्धावित्यादिकमूहनीयम्।

युतसिद्धानां सम्बन्ध इत्येतन्मात्रोक्तौ धर्म्मसुखाद्योः कार्य्यकारणभावादिलक्षणसम्बन्धेष्वतिप्रसङ्ग इति आधार्य्याधारभूतानामित्युक्तम्। आधार्य्याधारभूतानामित्यनेन धर्म्मधर्म्मिणोरेव समवायो, न तु संयोगन्यायेन धर्म्मधर्म्मि-

भावानापन्नयोरपि क्वचिदिति समवायस्वरूपं दर्शितमित्यपि सेतुकाराणामाशयः।

आकाशाकाशपदादीनां वाच्यवाचकभावलक्षणसम्बन्धातिव्याप्तिवारणाय इहप्रत्ययहेतुरिति। नहि वाच्यवाचकभावलक्षणसम्बन्धेन वृत्त्यनियामकेन कदाचिदिहेति प्रत्ययो जन्यत इति। आधार्य्याधारभूतानामित्येतन्मात्रोक्तौ कुण्डवदरसंयोगादावतिप्रसङ्ग इति अयुतसिद्धानामित्युक्तम्। विशेषस्तु न्यायकन्दलीग्रन्थादावनुसन्धेयः।

वस्तुतस्तु नित्यसम्बन्धत्वं समवायत्वम्, अयुतसिद्धानामित्यादिकन्तु स्वरूप परिचायकमात्रम्। संयोगे अतिव्याप्तिवारणाय नित्येति। आकाशादावतिव्याप्तिवारणाय सम्बन्धेति। अत्र सम्बन्धांशे नित्यत्ववत् सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वपर्य्यवसितं सम्बन्धिभिन्नत्वविशेषणमप्युपादेयम्, तेन नित्याभावादिस्वरूपसम्बन्धे नातिव्याप्तिः, तादृशस्वरूपसम्बन्धादीनां लाघवतः प्रतियोग्यनुयोग्यन्यतररूपत्वस्य सिद्धत्वादिति, अत एव हि नित्या प्राप्तिः समवाय इति लक्षणं सूचितं भवतीति' किरणावल्यामुदयनः प्राह।

समवायस्य संसर्गत्वे 'गुणक्रियादिविशिष्टबुद्धिर्विशेष्यविशेषणसंसर्गविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवदि'त्यनुमानं प्रमाणमाहुः। नहि तत्र संयोगसम्बन्धः शक्यकल्पन इति वाच्यं संयोगस्य द्विष्ठतया प्रतियोग्यनुयोग्युभयवृत्तित्वस्य स्वीकर्त्तव्यत्वेन निर्गुणे गुणादौ संयोगस्य वाधादसङ्गतेः। संसर्गसत्त्वस्य संसर्गिसत्त्वनियामकत्वेन गुणादौ गुणत्वादिविशिष्ट बुद्धीनां संयोगे एकनिष्ठत्वाङ्गीकारेऽपि दोषापत्तेश्च। 'न चासौ संयोग एव; अन्यतरकर्म्मादीनां तदुत्पादकानामभावात् विभागपर्य्यवसानाभावाच्च सम्बन्धिनामयुतासिद्धत्वाच्च नियताधिकरणतयैवोन्नेयत्वात् अप्रत्यक्षत्वादेकत्वाच्च' इति सूत्रोपस्कारकाराणामभिप्रायः। स्वरूपसंसर्गानान्तु प्रतियोग्यनुयोगिस्वरूपभेदेन भेदस्य अपोहितुमशक्यतया महागौरवापेक्षया लाघवादेकस्यैव समवायस्य सिद्धेः। समवायस्यैकत्वादिति—ननु यदि लाघवादेकः समबायस्तदा य एव वायौ स्पर्शप्रतियोगिकः समवायः तस्यैव रूपप्रतियोगिकतया स्पर्शप्रतियोगिकसमवायस्य वायौ स्पर्शवत्त्वप्रतीत्यनुरोधेन आवश्यकत्वात् रूपवत्ताप्रतीतिरपि तत्र प्रमा स्यात् सम्बन्धसत्त्वस्य सम्बन्धिसत्त्वनियामकतायाः

सर्वतन्त्र-सिद्धान्तत्वात् इति चेन्न तत्तत्प्रतियोगिनिरूपितत्वविशिष्टसमवायत्वेन समवायस्य संसर्गतास्वीकारेण समवायस्य एकत्वेऽपि तथाविधातिप्रसङ्गस्य वारयितुं शक्यत्वात्, वायौ रूपाभावेन रूपवद्वस्त्वन्तर्भावेणैव समवायस्य रूपप्रतियोगिकत्ववैशिष्ट्येन तदितरत्र तद्दृशविशिष्टसमवायाभावात्। विस्तरस्तु अन्यत्र ज्ञातव्यः। तादृशप्रत्यय इति प्रत्यक्षात्मक इत्यर्थः। इदञ्च प्रत्यक्षे विषयस्य कारणत्वमिति सिद्धान्तमुपजीव्योक्तम्। कणादनय इति—न तु नैयायिकनये तन्मते समवायस्य प्रत्यक्षत्वात्; अत एव कारिकावलीग्रन्थे विश्वनाथः 'क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशं गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः'। इति प्राह। समवायस्य प्रकृतसिद्धान्ते अप्रत्यक्षतया च तत्र अनुमानमेव मानमपि सङ्गतम्, अन्यथा सति ज्येष्ठप्रमाणे प्रत्यक्षे अनुमानप्रदर्शनमसङ्गतं स्यादिति ध्येयम्। वैशेषिकमते समवायस्य अतीन्द्रियत्वसाधकानुमानप्रयोगो यथा—समवायोऽतीन्द्रियः नित्यत्वे सति चेतनान्यासमवेतभावत्वादाकाशादिवदित्यादिः। नैयायिकास्तु इन्द्रियसम्बद्धविशेषणतासन्निकर्षेण समवायस्य प्रत्यक्षं भवत्येव, वैशेषिकमतालम्बितातीन्द्रियत्वसाधकनिरुक्तानुमानस्य अप्रयोजकत्वात्। तथा च समवायो लौकिकप्रत्यक्षविषयः योग्यप्रतियोगिकत्वे सति विशेषणतया योग्यवृत्तित्वात् भूतलादिवृत्तिघटात्यन्ताभावादिवदित्यादेः प्रत्यक्षत्वसाधकानुमानस्य सत्त्वाच्च इति वदन्ति। अत एव किरणावल्यामुदयनाचार्य्याः 'इह तन्तुषु पट इह पटे शुक्लत्वं इह गवि गोत्वमित्यादयः प्रत्ययाः सम्बन्धमन्तरेणानुपपद्यमानास्तं व्यवस्थापयन्तीत्याहुः।

जातिशून्यत्वे सति सामान्यत्वविशेषत्वशून्यभावत्वं तल्लक्षणमिति किरणावलीप्रकाशे वर्द्धमानोपाध्यायाः प्राहुः। तत्र द्रव्यादावतिव्याप्तिवारणाय सत्यन्तं। सामान्ये विशेषे च अतिव्याप्तिवारणाय विशेष्यदले शून्यान्तम्। शक्तिसादृश्यादीनामुक्तपदार्थेषु यथायथमन्तर्भाव उपपादनीय इति नातिरिक्तपदार्थशङ्केति। दीधितिकृतस्तु—पदार्थतत्त्वनिरूपणाख्ये प्रकरणे कणादप्रोक्तानां कतिपयपदार्थानां खण्डनोपक्रमे समवायोऽपि च नैको जलादेर्गन्धादिमत्त्वप्रसङ्गात्, परन्तु नानैव, समवायत्वं पुनरनुगतमखण्डोपाधिरिति प्रतिपादयन्ति। तद्दोषसमुद्धरणन्तु कृतमस्माभिरधस्तादिति संक्षेपः।

ভাষ্যতাৎপর্য্য

দুইটী বিভিন্ন পদার্থ একসঙ্গে মিলিত হইয়া থাকিতে গেলে উভয়ের মধ্যে একটী সম্বন্ধ থাকা প্রয়োজন হয়, যেমন বৃক্ষ ও পক্ষী দুইটী বিভিন্ন বস্তু, ঐ দুইটী বস্তু যখন মিলিত হইল, অর্থাৎ আকাশমার্গে উড়িয়া আসিয়া যখন পক্ষী বৃক্ষের উপর বসিল, তখন উভয়ের সংযোগনামে একটী সম্বন্ধ উৎপন্ন হইল। তাহা না হইলে বৃক্ষস্থিত পক্ষী ও অপর পক্ষীর সম্বন্ধে কোনও বৈলক্ষণ্য না থাকায় অন্য পক্ষীর সহিতও বৃক্ষের মিলন প্রতীতি হইতে পারিত। বাস্তবিক ত তাহা হয় না। অতএব উভয় বস্তুর মিলনের প্রতীতির বিষয়ীভূত উভয়ের একটী সম্বন্ধ স্বীকার করিতে হয়। উহা স্থানবিশেষে সমবায় স্বরূপাদি বিভিন্ন সংজ্ঞায় আখ্যাত হইয়া থাকে। যথা ঘট ও ভূতল প্রভৃতির পরস্পর মিলনকে সংযোগ, কপাল কপালিকা প্রভৃতি ঘটাবয়বে ঘটের মিলন ও গুণক্রিয়া প্রভৃতির সহিত দ্রব্যের মিলন দ্রব্যগুণ ও ক্রিয়ার সহিত জাতির মিলন ও নিত্যদ্রব্যে বিশেষের মিলনকে সমবায়, আবার কালে সমস্ত পদার্থের ও জন্য বস্তুতে সমানকালীন বস্তুর মিলনবিশেষকে কালিক, ঘটাভাবাদির ভূতলাদিতে মিলনকে দৈশিকস্বরূপ প্রভৃতি বলা হইয়া থাকে। ঐরূপ আবার তুল্য অধিকরণে দুইটী বস্তু থাকিলে তাহাদের পরস্পর সামানাধিকরণ্য সম্বন্ধ বলা হয়। এই প্রকার আরও বহু সম্বন্ধ আছে স্থানবিশেষে উহা জ্ঞাতব্য।

সমবায় বলিয়া যে সম্বন্ধের কথা উল্লেখ করা হইয়াছে, উহার সম্বন্ধী দুইটী পৃথক্ভাবে থাকে না, যেমন ঘট থাকিতে গেলেই তাহার অবয়বকে ছাড়িয়া বা ঘটের রূপাদি কখনও ঘটকে ছাড়িয়া অন্যত্র থাকিতে পারে না। এই জন্যই ভাষ্যকার বলিয়াছেন যে, আশ্রয় ও আশ্রয়িভাবে অবস্থিত যে বস্তুগুলি পরস্পর পৃথক্রূপে থাকিতে পারে না, তাহাদের বৈশিষ্ট্যপ্রতীতির হেতুভূত সম্বন্ধবিশেষই সমবায়। যথা গুণ ও ক্রিয়া প্রভৃতি দ্রব্যে আশ্রয়াশ্রয়িভাবে অবস্থিত ও উভয়ের পৃথক্রূপে কখনও স্থিতি নাই, এবং উভয়ের মিলনে দ্রব্যে গুণ বা ক্রিয়া আছে এইরূপ প্রতীতি হয়, অতএব ঐ উভয়ের সম্বন্ধ সমবায়। সংযুক্ত ঘট ও ভূতলাদির আশ্রয়াশ্রয়িভাবে অবস্থান ও ভূতলে ঘট আছে এইরূপ প্রতীতি হইলেও উহা পরস্পর অপৃথক্ভাবে অবস্থিত নহে, ঘট ও ভূতলের সংযোগের পূর্ব্বে

তাহাদের পৃথক্‌ভাবে স্থিতি প্রত্যক্ষতই উপলব্ধ হইয়া থাকে। অতএব উক্ত সংযোগসম্বন্ধ প্রভৃতিতে সমবায়ের লক্ষণের অতিব্যাপ্তি হইবে না।

ধর্ম্ম ও সুখ, অধর্ম্ম ও দুঃখ, ইহারা পরস্পর এককে ছাড়িয়া অপরে না থাকিলেও পরস্পর আধারাধেয়ভাবে ধর্ম্মে সুখ আছে বা অধর্ম্মে দুঃখ আছে এরূপ বৈশিষ্ট্যের প্রতীতি হয় না, কাজেই ধর্ম্ম ও সুখাদির পরস্পর সামানাধিকরণ্য সম্বন্ধে অতিব্যাপ্তি হইল না।

বাস্তবিক নিত্যসম্বন্ধত্বই সমবায়ের লক্ষণ। বিশ্বনাথন্যায়পঞ্চানন মুক্তাবলী-গ্রন্থে স্পষ্টরূপে ঐ লক্ষণই প্রতিপাদন করিয়াছেন। নৈয়ায়িকচূড়ামণি উদয়নাচার্য্যও কিরণাবলীগ্রন্থে 'নিত্যা প্রাপ্তিঃ সমবায়ঃ' অর্থাৎ 'নিত্যসম্বন্ধ সমবায়' এইরূপ লক্ষণের প্রতিপাদন করিয়াছেন।

এ স্থলে আপাততই এই আশঙ্কা হয় যে, ঘটের রূপ প্রভৃতির উৎপত্তি ও বিনাশ প্রত্যক্ষসিদ্ধ, অতএব রূপাদির সহিতই তদীয় সম্বন্ধেরও উৎপত্তি ও বিনাশ যুক্তিসিদ্ধ, সম্বন্ধী না থাকিলে কিরূপে তদীয় সম্বন্ধের স্থিতি কল্পনা করা সম্ভব। তাহার উত্তর এই যে, সমবায় বলিয়া যে সম্বন্ধ কল্পনা করা হয়, উহা ব্যক্তিভেদে পৃথক্ নহে, সমবায় একমাত্র; অতএব ঘটের রূপাদি বিনশ্বর হইলেও গগনাদি নিত্যবস্তুতে যে গগনপরিমাণাদি নিত্যবস্তু বর্ত্তমান আছে, উহার সম্বন্ধ সমবায় এবং উহা চিরন্তন বলিয়াই সমবায়ের নিত্যতাকথন দোষগ্রস্ত নহে।

উক্ত সমবায় নৈয়ায়িক মতে প্রত্যক্ষসিদ্ধ হইলেও কণাদ মতে উহা অতীন্দ্রিয় বা অপ্রত্যক্ষ। কণাদের অভিপ্রায় এই যে, যাহা নিত্য অথচ চেতন ভিন্ন অন্য বস্তুতে সমবায় সম্বন্ধে থাকে না, তাহা প্রত্যক্ষ নহে, যেমন আকাশ প্রভৃতি। সমবায় নিত্য অথচ চেতন ভিন্ন বস্তুতে সমবেত নহে, অতএব তাহাও অপ্রত্যক্ষ। নৈয়ায়িকগণ ঐ ব্যাপ্তির কোনও প্রযোজক না থাকায় উহা স্বীকার করেন না, অতএব তাহাদের মতে সমবায় অতীন্দ্রিয় বলিয়া সিদ্ধ হইতে পারে না। পরন্তু তাহারা বলেন যে, যাহার প্রতিযোগী ও অনুযোগী প্রত্যক্ষের যোগ্য, উহা নিশ্চয়ই লৌকিক প্রত্যক্ষের বিষয় হইয়া থাকে, যথা ভূতলবৃত্তি ঘটাত্যন্তাভাবাদি। সমবায়েরও প্রতিযোগী ঘটাদি ও অনুযোগী কপালাদি যোগ্য, অতএব সমবায় লৌকিকপ্রত্যক্ষবিষয়। তাহা হইলে ন্যায়মতে সমবায় প্রত্যক্ষ, কণাদ মতে প্রত্যক্ষ নহে, পরন্তু অনুমানগম্য। উক্ত অনুমান এইরূপ যথা দ্রব্যাদিতে যে

গুণক্রিয়াদিবিশিষ্ট বুদ্ধি হয়, উহা বিশেষ্য ও বিশেষণের সম্বন্ধকে বিষয় করিয়া থাকে; কারণ উহা বিশিষ্টবুদ্ধি। এস্থলে বিশিষ্টবুদ্ধিত্ব হেতু, বিশেষ্যবিশেষণসম্বন্ধবিষয়কত্ব সাধ্য ও গুণক্রিয়াদিবিশিষ্টবুদ্ধি পক্ষ। গুণক্রিয়াদিবিশিষ্টবুদ্ধিস্থলে সংযোগসম্বন্ধ তাহার বিষয় হইতে পারে না, কারণ সংযোগসম্বন্ধ দ্বিষ্ঠ বলিয়া প্রতিযোগী ও অনুযোগী উভয়েই সংযোগ থাকিতে হয়, অথচ গুণাদি নির্গুণ বলিয়া গুণাদিতে উহার সত্তা একান্ত অসম্ভব। স্বরূপসম্বন্ধও গুণাদির সম্বন্ধ নহে, অতএব তদতিরিক্ত যে সম্বন্ধের সিদ্ধি হয়, উহাই সমবায় বুঝিতে হইবে।

এখন আশঙ্কা হইতেছে এই যে, যদি সমবায় একই হয়, তবে স্পর্শের ও রূপের সমবায়ের কোনও পার্থক্য না থাকায় সমবায়সম্বন্ধে স্পর্শবৎ রূপশূন্য বায়ুতে সমবায়সম্বন্ধে রূপবত্তাপ্রতীতি যথার্থ হইতে পারে। তাহার উত্তর এই যে, সমবায় এক হইলেও রূপপ্রতিযোগিকত্ববিশিষ্টসমবায়ত্বরূপেই সমবায় রূপের সংসর্গ। সমবায়ে বায়ু অন্তর্ভাবে উক্ত বিশিষ্টসমবায়ত্ব স্বীকৃত নহে, অতএব ঐ আপত্তি বারিত হয়। এই রূপ অন্যত্রও বুঝিতে হইবে।

প্রশস্তপাদভাষ্যম্

ষণ্ণামপি পদার্থানাং সাধর্ম্ম্যমস্তিত্বা(১)ভিধেয়ত্ব-জ্ঞেয়ত্বানি। আশ্রিতত্ব- (২) ঞ্চান্যত্র নিত্যদ্রব্যেভ্যঃ। দ্রব্যাদীনাং পঞ্চানামপি (৩) সমবায়িত্বমনেকত্বঞ্চ। গুণাদীনাং পঞ্চানামপি (৪) নির্গুণত্বনিষ্ক্রিয়ত্বে। দ্রব্যাদীনাং ত্রয়াণাং সত্তাসম্বন্ধঃ সামান্যবিশেষবত্ত্বং স্বসময়ার্থশব্দাভিধেয়ত্বং ধর্ম্মাধর্ম্মকর্ত্তৃত্বঞ্চ।

---

(১) সাধর্ম্ম্যমিতি—(ঘ) পুস্তকে নাস্তি।

(২) আশ্রিতত্বঞ্চান্যত্র—(গ) (ঘ) পুস্তকে।

(৩) অপীতি—(ঘ) পুস্তকে নাস্তি।

(৪) অপীতি—(ঘ) পুস্তকে নাস্তি।

कार्य्यत्वानित्यत्वे कारणवतामेव। कारणत्वञ्चान्यत्र पारिमाण्डल्या(५)दिभ्यः। द्रव्याश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्यः। सामान्यादीनां त्रयाणामपि(६) स्वात्मवत्त्वं बुद्धिलक्षणत्वमकार्य्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वञ्चेति।

[द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्—१अ—१आ—१६ सू। एकद्रव्यगुणं संयोगविभागे—१अ—१आ—१७सू। गुणकर्म्मसु च भावान्न कर्म्म न गुणः—१ अ—२आ—९सू। कर्म्मभिः कर्म्माणि गुणैश्च गुणा व्याख्याताः—७अ—१आ—१५सू। सदनित्यं द्रव्यवत् कार्य्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्म्मणामविशेषः—१अ—१आ—८सू। अर्थ इति द्रव्यगुणकर्म्मसु—८अ—२आ—३सू। सदिति यतो द्रव्यगुणकर्म्मसु सा सत्ता—१अ—२आ—७सू। सामान्यविशेषाभावेन च—१अ—२आ—१०-१२-१४-१६सू। सामान्यं विशेष इति बुद्ध्यपेक्षम्—१अ—२आ—३सू। इहेदमिति यतः कार्य्यकारणयोः स समवायः—७अ—२आ २६सू। एतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

षण्णां द्रव्यादीनां, अपिशब्देन अभावस्याप्युपग्रहः। अस्तित्वं स्वरूपसत्त्वं तच्चोभयावृत्तिधर्मवत्त्वम्। अभावस्य अलक्ष्यत्वे तु तादृशभावत्वं वाच्यम्। एवमग्रेऽपि। अस्तित्वं विधिमुखप्रतीति(७)विषयत्वं, तच्च प्रतियोग्यनपेक्षनिरूपणत्वमित्याचार्य्यव्याख्यानन्तु चिन्त्यम्। निरूपणं हि तत्र यदि साक्षात्कारः, तदा अतीन्द्रिये द्रव्यादावव्याप्तेः।

---

(५) माण्डिल्येति क्वचित् पाठः।

(६) अपीति (घ)—पुस्तके नास्ति।

(७) प्रत्ययेति क्वचित् पाठः।

यदि च ज्ञानमात्रं तर्हि अभावे अतिव्याप्तेः। अनपेक्षपदवैयर्थ्यञ्च स्यादिति। अभिधेयत्वं पदशक्यत्वं, ज्ञेयत्वं ज्ञानविषयत्वम्। आश्रितत्वञ्चेति चोऽवधारणे। तथा च षण्णामपि पदार्थानां नित्यद्रव्येभ्योऽन्यत्रैव आश्रितत्वम् आधेयत्वं साधर्म्यमिति पूर्वेणान्वयः। तेन नित्यानां परमाणूनामनाश्रितत्वेऽपि न क्षतिः तेषामलक्ष्यत्वात्।

द्रव्यादीनां पञ्चानां समवायित्वं समवायप्रतियोगित्वं समवेतवृत्तिभावविभाजकधर्म्मवत्त्वं समवायावृत्तिधर्म्मवद्भावत्वं वा फलितम्। तेन सामान्यविशेषयोः समवायित्वस्य नित्यद्रव्ये च समवेतत्वस्य असत्त्वेऽपि न तेष्वव्याप्तिः।

निष्क्रियत्वं क्रियावदवृत्तिभावविभाजकधर्म्मवत्त्वं नातो विभुष्वतिव्याप्तिः। द्रव्येति—द्रव्यगुणकर्म्मणां सत्तासम्बन्धः सत्तासमवायः। सामान्यविशेषवत्त्वं सत्ताव्याप्यजातिमत्त्वम्। स्वसमयेति—वैशेषिकाणां स्वसङ्केतेनार्थशब्दाभिलप्यमानत्वमित्यर्थः। धर्म्माधर्म्मकर्त्तृत्वम् अदृष्टजनकभावत्वं, तेन धर्म्माधर्म्मयोरेकमात्रजनके नाव्याप्तिः।

भावत्वोपादानाच्च नाशौचाद्यभावे अतिप्रसङ्गः। न च सुवर्णादिद्रव्य-तदीयगुरुत्वादिगुण-तद्ग्रहणादिकर्म्मणाम् यथा धर्म्मजनकत्वं यथा वा पुरीषादिद्रव्य-तत्संयोगरूपगुण-तद्ग्रहणादिकर्म्मणामधर्म्मजनकत्वं तथा तादृशद्रव्यादिगतानां सुवर्णत्वादिजातीनामपि परम्परया धर्म्माधर्म्मजनकत्वं सुवचमतस्तत्रातिव्याप्तिरिति वाच्यं, सुवर्णत्वादिजातिधर्म्मादिजनकतावच्छेदकत्वेनैवोपक्षयात्तीर्थादिदेशस्य तत्संयोग-तदनुसरणादेर्धर्म्माधर्म्मजनकतायाः श्रुतिसिद्धत्वादिति भावः।

कारणवतामेवेति—द्रव्यादीनां त्रयाणामित्यनुषज्यते। कार्य्यत्वं-समवायावच्छिन्नजन्यत्वं, अनित्यत्वं विनाशिभावत्वं, नातो ध्वंसे प्रागभावे चातिव्याप्तिः। पारिमाण्डल्यं परमाणुपरिमाणं, आदिपदेन द्व्यणुकपरिमाणं परममहत्त्वम् आत्मविशेषगुणाश्च गृह्यन्ते। तथा च

तेभ्योऽन्यत्र द्रव्यादीनां त्रयाणां कारणत्वं निमित्तान्यकारणतावच्छेदकजातिमत्त्वं। ज्ञानादिकमिच्छादौ निमित्तकारणमेव। परिमाणस्य च अणुत्वमहत्त्वत्वादिना न परिमाणहेतुत्वं, किन्तु वितस्तित्व-हस्तत्वादिवैजात्यैरेवेति न परमाणुत्वादावतिव्याप्तिः। किरणावल्यान्तु पारिमाण्डल्यादिभ्य इत्यत्रादिपदेन परममहत्त्वान्त्यावयविगत-रूपरसगन्धस्पर्शपरिमाणानि द्वित्वद्विपृथक्त्वपरत्वापरत्वानि विनश्यद्वस्थद्रव्यगतसंयोगविभागकर्म्माणि शब्दाजनकशब्दश्चरमसंस्कारस्तादृशज्ञानञ्च परिगृहीतानि। कारणत्वञ्च ज्ञातधर्म्मेतरभावं प्रति फलोपधायकत्वमिति व्याख्यातम्; तन्मते सुखदुःखादेरजनितरूपादेः पाकनष्टपरमाणुरूपादिकस्य च लक्ष्यत्वात्तत्राव्याप्तिप्रकारश्चिन्तनीयः।

द्रव्याश्रितत्वं द्रव्यसमवेतसत्त्वं समवेतत्वसम्बन्धेन द्रव्यवत्सत्त्वं वा द्रव्यादीनां त्रयाणां मध्ये नित्यद्रव्येभ्योऽन्यत्रेत्यर्थः। संयोगिनाश्रितोऽपि परमाणुर्न समवेत, समवेतावपि सामान्यविशेषौ न सन्तौ इति तद्व्युदासः। चकारान्नित्यद्रव्यान्यजातीयत्वस्योपग्रहः। द्रव्याश्रितत्वं द्रव्यसमवायिकारणकत्वं नित्यद्रव्येभ्यो नित्यगुणेभ्यश्चान्यत्र द्रव्यादित्रयाणां साधर्म्म्यं, चकारेण नित्यगुणस्यापि समुच्चयादित्यपि वदन्ति।

सामान्येति—सामान्यविशेषसमवायानां स्वात्मकमेव सत्त्वं, न तु सत्ता जातिरित्यर्थः। बुद्धिलक्षणत्वं बुद्धिं प्रत्येव जनकत्वं बुद्ध्यन्यभाव-जनकावृत्तिभावविभाजकधर्म्मवत्त्वमिति यावत्। सामान्यमनुगतबुद्धौ विषयविधया, विशेषो लिङ्गविधया व्यावृत्तबुद्धौ, समवायः सन्निकर्ष-विधया प्रत्यक्षबुद्धौ कारणम्। द्रव्यादित्रिकन्तु बुद्धिभिन्नेऽपि द्रव्यादौ कारणमिति न तत्रातिप्रसङ्ग।

यद्वा बुद्धेर्बुद्धिविशेषस्य सामान्यशून्यभावत्वप्रकारकयथार्थज्ञानस्य लक्षणत्वं विशेष्यत्वमित्यर्थः। अकार्य्यत्वं प्रागभावप्रतियोग्यवृत्ति-भावविभाजकधर्म्मवत्त्वं। अकारणत्वं निमित्तकारणतान्यकारणता-

शून्यभावत्वं। असामान्येति सत्तावान्तरजातिशून्यभावत्वमित्यर्थः। नित्यत्वं विनाश्यवृत्तिभावविभाजकधर्म्मवत्त्वं। नातो नित्यद्रव्यादावत्यन्ताभावादौ च प्रसङ्गः। अर्थेति—स्वसमयार्थशब्दाप्रतिपाद्यत्वमित्यर्थः। चकारेण जन्यावृत्तिभावविभाजकधर्म्मवत्त्वाद्युपग्रहः। इतिः दिगुपदर्शनार्थः, तेन द्रव्यगुणयोः कर्म्मान्यसत्त्वं सामान्यविशेषयोः निःसामान्यसमवेतत्वमित्यादिकमपि द्रष्टव्यम् ॥

सूक्तिदीपिका।

अभावस्यापीति—स्वमते विशेषतोऽभावस्य अनुल्लेखेऽपि यथा न तुच्छत्वं तथोक्तमधस्तात्, अत एव अभावसप्तमानां सर्व्वपदार्थानामेव अस्तित्वादीनि साधर्म्म्याणीति सङ्गच्छते।

उभयावृत्तीति—तत्त्वञ्च स्वप्रतियोगिनिरूपितत्व-स्वानुयोगिनिरूपितत्वैतदुभयसम्बन्धेन भेदविशिष्टवृत्तित्वाभाववत्त्वं, स चायं धर्म्मस्तत्तद्व्यक्तित्वादिः।

ननु समुद्दिष्टपूर्व्वाणामेव साधर्म्म्यकथनं सङ्गच्छते नानुद्दिष्टपूर्व्वाणामिति अपिशब्देन अभावस्योपग्रहो न युक्त इत्यत आह अभावस्येत्यादि। अलक्ष्यत्वे त्विति—प्रकृतसाधर्म्म्यवत्तया अनभिमतत्वे त्वित्यर्थः। तादृशीति—उभयावृत्तिधर्म्मवदित्यर्थः। अग्रेऽपीति—अभिधेयत्वादिरूपसाधर्म्म्यस्थलेऽपि भावत्वपर्य्यन्तमनुसृत्य अभावव्यावृत्तिः कर्त्तव्येति भावः।

प्रतियोग्यनपेक्षेति—प्रतियोगिनिरूपणानधीनेत्यर्थः। एतेन अभावो व्यावृत्तः अभावानां प्रतियोगिनिरूपणाधीननिरूपणत्वस्य प्रागुपपादितत्वात्। नित्यद्रव्येभ्योऽन्यत्वैवेति—तदुक्तं विश्वनाथेन 'अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते' इति। आधेयत्वमिति- तच्च सर्व्वाधारताप्रयोजककालिकातिरिक्तसम्बन्धावच्छिन्नमनुसर्त्तव्यं तादृशकालिकसम्बन्धेन नित्यस्यापि द्रव्यस्य काले वर्त्तमानत्वात्, अन्यथा कालस्य सर्व्वाधारत्वानुपपत्तेः।

द्रव्यादीनामिति—द्रव्यगुणकर्म्मसामान्यविशेषाणामित्यर्थः। समवायप्रतियोगित्वमिति—ननु समवायप्रतियोगित्वं समवायसम्बन्धावच्छिन्नाधेयत्वं तच्चात्मगगनपरमाण्वादावव्याप्तमित्यत आह समवेतेत्यादि। तथाहि आत्म-

गगनादीनां समवायप्रतियोगिताशून्यत्वेऽपि समवेतघटादिवृत्तिभावविभाजकद्रव्यत्वधर्म्मवत्त्वेन नाव्याप्तिशङ्केति भावः। समवेतवृत्तित्वं तादृशधर्म्मवत्त्वञ्च तादृशभावविभाजकतावच्छेदकसमवायस्वरूपान्यतरसम्बन्धेन नातः कालिकविशेषणतया द्रव्यत्वादिमत्त्वस्य ध्वंसे वर्त्तमानत्वेऽपि तत्रातिप्रसङ्गः। ननु समवेतपदस्य समवायप्रतियोग्यर्थकतया समवायप्रतियोगिकस्वरूपस्यापि समवायानतिरिक्तत्वेन समवायस्यापि समवेतत्वं प्राप्तं, तथा च सति समवायत्वस्यापि समवेतवृत्तिभावविभाजकतया समवायातिप्रसङ्गो दुर्वार इत्यत आह समवायावृत्तीत्यादि। तथाहि समवायस्य समवायावृत्तिधर्म्मवत्त्वाभावात् नातिप्रसङ्गः।

तेनेति—समवायित्वमित्यस्य यथाश्रुतसमवायानुयोगित्वरूपार्थपरिहारात् समवायप्रतियोगित्वाद्यर्थानुसरणेनेत्यर्थः। समवायित्वस्य समवायानुयोगित्वस्य। समवेतत्वस्य समवायप्रतियोगित्वस्य। तेषु सामान्यविशेषनित्यद्रव्येषु। अव्याप्तिरित्युपलक्षणं, तृतीयकल्पानुसरणेन समवायातिव्याप्त्यादिपरिहारोऽपि बोध्यः।

क्रियावद्वृत्तीत्यादि—तथाहि विभुष्वात्मादिषु भावविभाजकधर्म्मो द्रव्यत्वमेव, तस्य सक्रिये घटादावपि वर्त्तमानतया न तत् क्रियावद्वृत्तीति नातिव्याप्तिरिति भावः।

सत्ताव्याप्यजातिमत्त्वं—सत्तावान्तरजातिमत्त्वं, द्रव्यादिषु त्रिषु द्रव्यत्वादेः सत्त्वात् तस्य च सत्ताव्याप्यत्वात्। स्वसङ्केतेनेति—तदुक्तं कणादेन 'अर्थ इति द्रव्यगुणकर्म्मसु' इति।

तेनेत्यादि—तथाहि धर्म्माधर्म्मयोरुभयोरेवादृष्टतया एकमात्रजनकस्यापि अदृष्टजनकत्वाच्चतेर्नाव्याप्तिरिति भावः।

समवायेत्यादि—यथाश्रुतजन्यत्वमात्रपरिग्रहे तु ध्वंसातिप्रसङ्गः स्यात्। द्रव्यादीनां त्रयाणामित्यस्याननुषङ्गादिपक्षे तु यथाश्रुतं जन्यत्वमात्रमेव सम्यक्।

यथाश्रुतमनित्यत्वन्तु ध्वंसाप्रतियोगित्वसमानाधिकरणप्रागभावाप्रतियोगित्वशून्यत्वं, तच्च ध्वंसे प्रागभावाप्रतियोगित्वशून्यतया प्रागभावे च ध्वंसाप्रतियोगित्वशून्यतया अतिप्रसक्तमिति विनाशीत्यादिपारिभाषिकार्थविशेषसमाश्रयणम्। तथाहि ध्वंसे विनाशित्वस्य भावत्वस्य च द्वयोरेव समं

विरहात् प्रागभावे च विनाशित्वे सत्यपि भावत्वस्याभावात् न निरुक्तानित्यत्वमिति भावः। निमित्ततान्येति—इच्छादिनिमित्ते ज्ञानादावतिप्रसङ्गनिराकरणाय। निमित्तकारणमेवेति—अत एव सिद्धान्तमुक्तावल्यां विश्वनाथः—'आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति, तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेवे'ति प्राह। समवायिकारणत्वन्तु द्रव्यान्यत्वादेव निरस्तम्।

ज्ञातृधर्म्मान्तरेत्यादि—ज्ञातृधर्म्मा इच्छादयः, तद्भिन्नभावं प्रतीति तदर्थः। एतत्कल्पे निमित्ततान्येति कारणताविशेषणमनुपादेयम्, ज्ञानादीनां ज्ञातृधर्म्मान्तरभावं प्रति जनकताशून्यत्वादेवातिप्रसङ्गाभावात्। एतन्मते योगिप्रत्यक्षादौ विषयादेः कारणत्वे सत्यपि नातिप्रसङ्गः, प्रत्यक्षस्य ज्ञातृधर्म्मत्वात्। पूर्व्वकल्पेऽपि निमित्ततान्यत्वस्य कारणताविशेषणतया अतिव्याप्तिनिरासस्य दर्शितत्वादिति।

न तु सत्तेति—सत्ताजातेः द्रव्यगुणकर्म्मत्रितयमात्रवृत्तित्वादिति भावः। बुद्धिं प्रत्येव जनकत्वमित्यत्र एवशब्दस्य इतरव्यवच्छेदार्थतया बुद्धिमात्रजनकत्वं बुद्ध्यन्याजनकत्वे सति बुद्धिजनकत्वमित्यर्थः। तदेव स्पष्टयति बुद्ध्यन्येत्यादिना। अत्र अवृत्तित्वं धर्म्मवत्त्वञ्च भावविभाजकतावच्छेदकसम्बन्धेन बोध्यम्। तेन सम्बन्धान्तरमादाय न द्रव्याद्यतिव्याप्तिः। आचार्य्यास्तु 'बुद्धिलक्षणत्वं, बुद्धिमात्रममीषां लक्षणं प्रमाणं, न तु द्रव्यादिवत् प्रमाणान्तरमस्तीत्यर्थः। अनुवृत्तबुद्धिर्व्यावृत्तबुद्धिरिहेति बुद्धिरित्येव हि सामान्यादित्रये प्रमाण'मित्याहुः। तदयुक्तं सामान्यसिद्धौ चक्षुरादेरपि प्रमाणत्वादिति।

विषयविधयेति इदमुपलक्षणं, सामान्यस्य अलौकिकप्रत्यासत्तिरूपत्वेनापि बुद्धिं प्रति कारणत्वं बोध्यम्।

प्रागभावेत्यादि—अत्रापि अवृत्तित्वं धर्म्मवत्त्वञ्च भावविभाजकताघटकसंसर्गेण, नातः पूर्ववदतिप्रसङ्गः। प्रागभावप्रतियोग्यवृत्तिधर्म्मवत्त्वमात्रस्य गगनादावतिप्रसङ्गवारणाय भावविभाजकेति। उक्तमेवार्थमभिसन्धाय 'अकार्य्यत्वमनादित्व'मित्याचार्य्यैर्व्याख्यातम्।

निमित्तेत्यादि—सामान्यादीनां विषयत्वादिना कारणत्वस्य स्वयमेवोपदर्शिततया असम्भववारणाय कारणतायां निमित्तकारणतान्येति। 'अका-

দ্রব্যাদি পঞ্চ পদার্থের সমবায়িত্ব অর্থাৎ সমবেতবৃত্তি ভাববিভাজক ধর্ম্মবত্ত্ব সাধর্ম্ম্য। দ্রব্য গুণ কর্ম্ম সামান্য ও বিশেষ এই পাঁচটী পদার্থ সমবেত অর্থাৎ সমবায় সম্বন্ধে বৃত্তিমৎ, তাহাতে বর্ত্তমান ভাববিভাজক ধর্ম্ম দ্রব্যত্ব গুণত্ব কর্ম্মত্ব সামান্যত্ব ও বিশেষত্ব। সমবায়পদার্থ সমবেত নহে, অতএব সমবায়ত্ব সমবেতবৃত্তি ভাববিভাজক ধর্ম্মও নহে, এইহেতু অব্যাপ্তি বা অতিব্যাপ্তির আশঙ্কা নাই। সমবায়িত্বপদের যথাশ্রুত অর্থ সমবায়ানুযোগিত্ব, উক্ত অর্থ থাকিলে উহা সামান্য ও বিশেষের সাধর্ম্ম্য হইতে পারে না, কারণ সামান্য ও বিশেষ পদার্থে কোনও বস্তু সমবায় সম্বন্ধে না থাকায় উহাতে সমবায় সম্বন্ধের অনুযোগিত্ব নাই। সমবায়ের প্রতিযোগিত্ব অর্থ করিলেও নিত্যদ্রব্য কোথায়ও সমবায় সম্বন্ধে না থাকায় সমবায়ের প্রতিযোগিত্ব উহাতে অসম্ভব হওয়ায় উহা নিত্যদ্রব্যের সাধর্ম্ম্য হইতে পারে না, কিন্তু উক্তরূপ বিশিষ্ট অর্থ আশ্রয় করায় কোনও স্থলেই ক্ষতি হইল না। কেহ বলেন যে উহার অর্থ সমবায়ে অবৃত্তিধর্ম্মবদ্‌ভাবত্ব। সমবায়ে সমবায়াবৃত্তি ধর্ম্ম থাকে না ও অভাবে ভাবত্ব থাকে না কাজেই সমবায় ও অভাবে অতিব্যাপ্তি নাই।

দ্রব্যাদি পঞ্চ পদার্থের আবার অনেকত্ব অর্থাৎ অনেকবৃত্তি ভাববিভাজকধর্ম্মবত্ত্ব সাধর্ম্ম্য। যথাশ্রুত অনেকত্ব সাধর্ম্ম্য বলা যায় না, কারণ দ্রব্যাদি ব্যক্তিভেদে পৃথক্ পৃথক্ বলিয়া কোনও ব্যক্তিতেই অনেকত্ব থাকে না, অতএব অসম্ভব দোষই হইয়া পড়ে। কিন্তু অনেকবৃত্তিভাববিভাজক ধর্ম্ম অর্থ করায় যে ভাববিভাজক ধর্ম্ম একাতিরিক্ত বস্তুতে থাকে তদ্বত্ত্ব ইহাই পর্য্যবসিত অর্থ পাওয়া যায়, তাহাতে প্রকৃতস্থলে দ্রব্যত্বাদিরূপ অনেকবৃত্তি ভাববিভাজক ধর্ম্ম লইয়াই প্রত্যেকের সাধর্ম্ম্য সঙ্গত হয়। সমবায়ত্ব ভাববিভাজক ধর্ম্ম হইলেও উহা একমাত্র সমবায়ে থাকে বলিয়া সমবায়ে অতিব্যাপ্তি হইল না। অভাবত্ব অনেকবৃত্তি ধর্ম্ম হইলেও উহা ভাববিভাজক নহে বলিয়াই অভাবে অতিব্যাপ্তি হইল না।

গুণাদিপদার্থের নির্গুণত্ব ও নিষ্ক্রিয়ত্ব সাধর্ম্ম্য। নির্গুণত্ব অর্থাৎ গুণবদবৃত্তিধর্ম্মবত্ত্ব, যে ধর্ম্ম গুণবান্ পদার্থে বর্ত্তমান হয় না তদ্বত্ত্ব। উক্ত অর্থের অনুসরণ করায় দ্রব্যে উৎপত্তি ক্ষণে গুণ না থাকিলেও দ্রব্যে অতিব্যাপ্তি হইল না। কারণ পরক্ষণেই দ্রব্যে গুণ উৎপন্ন হয় বলিয়া দ্রব্যে যে সকল ধর্ম্ম থাকে সকলই গুণবদ্‌বৃত্তি গুণবদবৃত্তি কোন ধর্ম্মই নহে। নিষ্ক্রিয়ত্ব অর্থ ক্রিয়াবদবৃত্তি ভাব-

বিভাজক ধর্ম্মবত্ত্ব, অর্থাৎ যে ধর্ম্ম ক্রিয়াবান্ পদার্থে অর্থাৎ দ্রব্যে বর্ত্তমান হয় না তদ্বত্ত্ব। উক্ত অর্থের অনুসরণ করায় বিভুদ্রব্য ক্রিয়াশূন্য হইলেও ক্ষতি হইল না, কারণ উহাতে ক্রিয়া না থাকিলেও ক্রিয়াবতে অবৃত্তি কোনও ভাববিভাজক ধর্ম্ম নাই। ভাববিভাজক ধর্ম্মের মধ্যে একমাত্র দ্রব্যত্বই বিভুদ্রব্যে থাকে, উহা মূর্ত্ত দ্রব্যেও থাকে বলিয়া ক্রিয়াবতে অবৃত্তি হয় না। ক্রিয়াবতে অবৃত্তি ভাববিভাজক ধর্ম্ম গুণত্বাদি, উহা বিভুদ্রব্যে নাই, অতএব উক্ত অতিব্যাপ্তি বারিত হইল।

দ্রব্য গুণ ও কর্ম্ম এই তিন পদার্থে সত্তানামক জাতির সম্বন্ধ থাকে এবং উহাতেই বৈশেষিকদর্শনের মতানুসারে অর্থশব্দবাচ্যত্ব থাকে। বৈশেষিক মতে কণাদ ঋষি দ্রব্য গুণ ও কর্ম্ম এই তিন পদার্থেরই অর্থশব্দপরিভাষা করিয়াছেন।

সামান্যবিশেষবত্ত্ব, অর্থাৎ দ্রব্যত্বাদিরূপ সামান্য ও বিশেষাত্মক ধর্ম্মবত্ত্বও উহার সাধর্ম্ম্য। অদৃষ্টজনকভাবত্বও উক্ত ত্রিতয়ের সাধর্ম্ম্য। ভাষ্যোক্ত ধর্ম্মাধর্ম্মপদ সামান্যতঃ অদৃষ্ট অর্থে উক্ত হইয়াছে, অন্যথা একমাত্র ধর্ম্ম বা অধর্ম্মের জনক পদার্থে ধর্ম্মাধর্ম্ম উভয়জনকতা না থাকায় অব্যাপ্তি হইয়া পড়ে। অদৃষ্টরূপ অর্থ গ্রহণ করিলে ধর্ম্ম বা অধর্ম্ম যে কোনও একটী মাত্র অদৃষ্টের জনকপদার্থেও অদৃষ্টজনকত্ব থাকায় দোষ হইল না। জগদীশটীকা প্রভৃতি বিশদভাবে আলোচনা করিলে এতৎসম্বন্ধে আরও রহস্য জানা যাইবে।

দ্রব্যাদি তিনটী পদার্থের মধ্যে যে যে দ্রব্য গুণ ও কর্ম্মের কারণ আছে, তাহাদের কার্য্যত্ব ও অনিত্যত্ব সাধর্ম্ম্য। জগদীশ উক্ত কার্য্যত্ব সমবায়সম্বন্ধাবচ্ছিন্ন জন্যত্ব বলিয়া ব্যাখ্যা করিয়াছেন। তাহা না হইলে ধ্বংসরূপ অভাবেও কার্য্যত্ব থাকায় অতিপ্রসঙ্গ হইয়া পড়ে। অনিত্যত্ব অর্থ বিনাশিভাবত্ব। কেবল বিনাশিত্ব বলিলে প্রাগভাবে অতিব্যাপ্তি হয়, অথবা কেবল ভাবত্ব বলিলেও নিত্যদ্রব্যাদিতে অতিব্যাপ্তি হইতে পারে।

পারিমাণ্ডল্যাদিভিন্ন অপর পদার্থের নিমিত্তকারণভিন্নকারণত্ব সাধর্ম্ম্য। পারিমাণ্ডল্যাদি এই স্থলে আদিপদে দ্ব্যণুকপরিমাণ পরমমহৎপরিমাণ ও আত্মবিশেষগুণের গ্রহণ করা হইয়াছে। ইচ্ছাদি কার্য্যের প্রতি জ্ঞানাদি নিমিত্তকারণ, নিমিত্তকারণভিন্নকারণ নহে; অতএব তাহাতে কারণত্বরূপ সামান্য ধর্ম্ম থাকিলেও, ক্ষতি হয় নাই। কিরণাবলীগ্রন্থে উদয়নাচার্য্য কারণত্বপদে জ্ঞাতা বা আত্মার ধর্ম্মভিন্ন অপর কার্য্যের প্রতি কারণত্ব এই অর্থ করিয়া উক্ত দোষ বারণ করেন।

নিত্যদ্রব্যভিন্নের দ্রব্যাশ্রিতত্ব সাধর্ম্ম্য। উক্ত দ্রব্যাশ্রিতত্ব সমবায়সম্বন্ধে দ্রব্যবৃত্তিসত্ত্ব। পরমাণুরূপ নিত্যদ্রব্য সংযোগসম্বন্ধে আশ্রিত এই মতেও তাহার সমবায় সম্বন্ধে আশ্রিতত্ব না থাকায় ক্ষতি হইল না। সামান্য ও বিশেষ সমবায়-সম্বন্ধে দ্রব্যাশ্রিত হইলেও তাহাতে সত্তা নামক জাতি না থাকায় অতিব্যাপ্তি হইল না।

সামান্যাদি ত্রিতয়পদার্থের স্বাত্মবত্ত্ব অর্থাৎ স্বরূপসত্ত্ব সাধর্ম্ম্য। কেহ বলেন যে, স্বাত্মবত্ত্ব ইহার অভিপ্রায় সত্তাজাতিশূন্যত্ব। দ্রব্যাদি ছয়টী ভাব পদার্থের মধ্যে প্রথম দ্রব্যাদি তিনটী পদার্থে সত্তা জাতি আছে, অপর তিনটী পদার্থে সত্তা জাতি নাই।

ঐরূপ বুদ্ধিলক্ষণত্ব বুদ্ধিমাত্রজনকত্ব বা বুদ্ধ্যন্যভাবজনকাবৃত্তি ভাববিভাজক-ধর্ম্মবত্ত্ব, অর্থাৎ যে ভাববিভাজকধর্ম্ম জ্ঞানভিন্ন কোনও ভাবপদার্থের কারণে বর্ত্তমান হয় না, তাদৃশধর্ম্মবত্ত্বও উক্ত সামান্যাদিত্রিতয়ের সাধর্ম্ম্য।

সামান্যাদি বুদ্ধির প্রতি কারণ হইলেও উহা বুদ্ধিভিন্নভাব কার্য্যের জনক নহে, অতএব অসম্ভব হইল না। দ্রব্যাদিতে দ্রব্যত্বাদিরূপ ভাববিভাজক ধর্ম্ম থাকিলেও উহা বুদ্ধ্যন্যভাবজনকাবৃত্তি নহে, কাজেই দ্রব্যাদিতে অতিব্যাপ্তি হয় না।

সামান্য অনুগত বুদ্ধির প্রতি বিষয়রূপে, বিশেষপদার্থ ব্যাবৃত্তবুদ্ধির প্রতি লিঙ্গ-রূপে ও সমবায় প্রত্যক্ষবুদ্ধির প্রতিই সন্নিকর্ষরূপে কারণ হয়। কিন্তু দ্রব্যাদি বুদ্ধি-ভিন্ন দ্রব্যাদির প্রতিও কারণ হইয়া থাকে।

অকার্য্যত্বও উহার সাধর্ম্ম্য। অকার্য্যত্ব অর্থ প্রাগভাবের প্রতিযোগী পদার্থে অবৃত্তি ভাববিভাজক ধর্ম্মবত্ত্ব। উক্ত অর্থের অনুসরণ করায় নিত্য দ্রব্য বা নিত্য-গুণে অকার্য্যত্ব অর্থাৎ কার্য্যত্বাভাব থাকিলেও উক্ত পদার্থে যে দ্রব্যত্ব ও গুণত্বরূপ ভাববিভাজক ধর্ম্ম আছে, তাহা প্রাগভাবের প্রতিযোগী অনিত্য দ্রব্য ও গুণেও বৃত্তি হওয়ায় অতিব্যাপ্তি হইল না।

ঐরূপ অকারণত্বও উহার সাধর্ম্ম্য। অকারণত্ব অর্থ নিমিত্তকারণতাভিন্ন-কারণতাশূন্যভাবত্ব। উক্ত অর্থের অনুসরণ করায় সামান্যাদিতে জ্ঞানাদির নিমিত্ত-কারণতা থাকিলেও ক্ষতি হইল না। প্রাগভাব প্রতিযোগীর নিমিত্ত কারণ, সমবায়ি বা অসমবায়ি কারণ নহে, তাহা হইলেও উহাতে ভাবত্ব না থাকায় অতিব্যাপ্তি হয় না।

ঐরূপ অসামান্যবিশেষবত্ত্বও উহার সাধর্ম্ম্য। অসামান্যবিশেষবত্ত্ব অর্থ সত্তার ন্যূনবৃত্তিজাতিশূন্যত্ব। পূর্ব্বেই সত্তাজাতিশূন্যত্বের কথা বলা হইয়াছে, সম্প্রতি সত্তা জাতির ন্যায় উহাতে যে সত্তার অবান্তর জাতিও নাই ইহাই বলা হইতেছে।

নিত্যত্বও উহার সাধর্ম্ম্য। নিত্যত্ব অর্থাৎ বিনাশী পদার্থে অবৃত্তি ভাববিভাজকধর্ম্মবত্ত্ব। উক্ত অর্থের অনুসরণ করায় নিত্যদ্রব্যাদিতে অতিব্যাপ্তি হইবে না, কারণ দ্রব্যত্বাদিরূপ ভাববিভাজক নিত্যদ্রব্যাদিবৃত্তি ধর্ম্ম বিনাশী দ্রব্যাদিতে অবৃত্তি নহে। অত্যন্তাভাবত্বাদি বিনাশ্যবৃত্তি হইলেও উহা ভাববিভাজক নহে।

এই রূপ সামান্যাদির অর্থশব্দানভিধেয়ত্ব সাধর্ম্ম্য। বৈশেষিক মতে অর্থশব্দ দ্রব্য গুণ ও কর্ম্ম এই তিন অর্থেই পরিভাষিত, সামান্যাদি তাহার বাচ্য নহে। অতএব বৈশেষিকনিয়মেই উহাতে অর্থশব্দানভিধেয়ত্ব থাকে, উহা মতান্তরসাধারণ নহে।

ভাষ্যস্থিত চকারদ্বারা জন্যাবৃত্তি ভাববিভাজক ধর্ম্মবত্ত্ব প্রভৃতি ধর্ম্মেরও গ্রহণ করা হইয়াছে।

ঐরূপ কর্ম্মভিন্নসত্ত্ব দ্রব্য ও গুণের সাধর্ম্ম্য, সামান্য ও বিশেষের জাতিশূন্যসমবেতত্ব, কর্ম্মের দ্রব্যগুণভিন্নসত্ত্ব, দ্রব্যের গুণকর্ম্মভিন্নসত্ত্ব ইত্যাদি সাধর্ম্ম্যও বলা যাইতে পারে।

प्रशस्तपादभाष्यम्

पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्मन्यारम्भकत्वं गुणवत्त्वं कार्य्यकारणाविरोधित्वम्। अन्त्यविशेषवत्त्वम् अनाश्रितत्वनित्यत्वे चान्यत्र अवयविद्रव्येभ्यः। पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वे। क्षितिजलज्योतिरनिल-

मनसां क्रियावत्त्वमूर्त्तत्वपरत्वापरत्ववेगवत्त्वानि। आकाशकालदिगात्मनां सर्व्वगतत्वं परममहत्त्वं सर्व्वसंयोगिसमानदेशत्वञ्चेति।

[द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम्—१अ—१आ—९सू। द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्—१अ—१आ—१०सू। न द्रव्यं कार्य्यं कारणञ्च बधति—१अ—१आ—१२सू। क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्—१अ—१आ—१५सू। द्रव्यगुणकर्म्मणां द्रव्यं कारणं सामान्यम्—१अ—१अ—१८सू। पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति द्रव्याणि—१अ—१आ—५सू। कारणमिति द्रव्ये कार्य्यसमवायात्—१०अ—२आ—१सू। संयोगाद्वा—१०—२आ—२सू। नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्म—५अ—२आ—१सू। तद्विशेषेणादृष्टकारितम्—५अ—२आ—२सू। अपां संयोगाभावे गुरुत्वात् पतनम्—५अ—२आ—३सू। द्रवत्वात् स्यन्दनम्—५अ—२आ—४सू। नाड्यो वायुसंयोगादारोहणम्—५अ—२आ—५सू। नोदनापीड़नात् संयुक्तसंयोगाच्च—५अ—२आ—६सू। वृक्षाभिसर्पणमित्यदृष्टकारितम् ५अ—२आ—७सू। पृथिवीकर्म्मणा तेजःकर्म्म वायुकर्म्म च व्याख्यातम्—५अ—२आ—१२सू। अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यक्पवनमणूनां मनसश्चाद्यं कर्म्मादृष्टकारितम्—५अ—२आ—१३सू। हस्तकर्म्मणा मनसः कर्म्म व्याख्यातम्—५अ—२आ—१४सू। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चेत्यदृष्टकारितानि—५अ—२आ—१७सू। एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च—७अ—२आ—२१सू। कारणपरत्वात् कारणापरत्वाच्च—७अ—२आ—२२सू। कर्म्मभिः कर्म्माणि—७अ—२आ—२४सू। गुणैर्गुणाः—७अ २आ—२५सू। इत्येतान्यालम्बनसूत्राणि]।

जगदीशसूक्तिः

सम्प्रति द्रव्याणामेव वैधर्म्यमाह पृथिव्यादीनामिति। द्रव्यत्वयोगो द्रव्यत्वसमवायः। द्रव्यत्वस्य पक्षतावच्छेदकत्वेनोपक्षयात् न तस्य स्वातन्त्र्येणोल्लेखः। स्वात्मन्यारम्भकत्वं स्वसमवेतकार्य्यजनकत्वम्। गुणवत्त्वं गुणसमवायित्वं नातः स्पन्दादावतिव्याप्तिः। कार्य्यकारणाविरोधित्वं स्वजन्यसंयोगकारणकविभागजनकत्वम्। संयोगविभागकर्म्मणां वारणाय कारणकान्तम्। अन्त्येति पृथिव्यादीनां नवानाम् अवयविद्रव्येभ्योऽन्यत्र अन्त्यविशेषवत्त्वम् उभयासमवेतनिःसामान्यधर्म्मसमवायित्वमित्यर्थः। अनाश्रितत्वम् असमवेतद्रव्यत्वम्। नित्यत्वमविनाशिद्रव्यत्वम्। चकारात् नित्यपरिमाणवत्त्वाद्युपग्रहः।

पृथिव्यदकेति—ज्वलनोऽत्र तेजोमात्रं, न तु वह्निरेव। अनेकत्वं बहुसमवेतद्रव्यविभाजकधर्म्मवत्त्वम्। अपरजातिमत्त्वं द्रव्यत्वन्यूनवृत्तिजातिमत्त्वम्। क्षितीत्यादि—क्रियावत्त्वं क्रियावद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वम्। नातो निष्क्रियनष्टघटाद्यव्याप्तिः। मूर्त्तत्वं परिच्छिन्नपरिमाणवत्त्वम्, स्पन्दसमवायिकारणतावच्छेदकतया सिद्धो जातिप्रभेदो वा। परत्वं परत्ववद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वम्। एवमपरत्ववेगयोरपि अर्थो बोध्यः। आकाशेत्यादि—स्वावयवावच्छेद्यावयविसंयोगाश्रयत्वं परममहत्त्वं स्वानाश्रययावन्महत्त्वापेक्षिकोत्कर्षवन्महत्त्वम्। परममहत्त्वत्वस्य जातित्वपक्षे तु तादृशजातिमन्महत्त्वमित्यर्थः। सर्व्वेति—सर्व्वेषां मूर्त्तानां संयोगिसंयुक्तत्वमित्यर्थः।

सूक्तिदीपिका

द्रव्यत्वसमवाय इति—ननु द्रव्यत्वस्यैव पृथिव्यादिनवद्रव्य-साधर्म्यात्व-सम्भवे किमिति द्रव्यत्वयोग इत्यस्य द्रव्यत्वसमवाय इत्यर्थानुसन्धानमित्याकाङ्क्षायामाह द्रव्यत्वस्येत्यादि। तथाहि पक्षतावच्छेदकतयैव द्रव्यत्वस्य लाभेन द्रव्यत्ववत्त्वं तत एव साधर्म्यं लब्धमत एव द्रव्यत्ववत्त्वस्य पुनः साधर्म्यत्वकथनं निराकाङ्क्षं स्यादित्यर्थान्तरानुसरणमिति भावः।

स्वसमवेतेत्यादि—जनकत्वमिति समवायिकारणत्वमिति वस्तुगतिः, स्वसमवेतकार्यं प्रति स्वस्य तदितरकारणत्वाभावात्।

गुणसमवायित्वमिति गुणसमवायानुयोगित्वमित्यर्थः। समवायसम्बन्धेन गुणाधिकरणत्वं वा। अन्यथा कालिकसम्बन्धेन स्पन्दस्य गुणवत्त्वादतिव्याप्तिः स्यादिति।

अवयविद्रव्येभ्योऽन्यत्रेति—निरवयवद्रव्याणामेव अन्त्यविशेषवत्त्वमित्यर्थः। उभयेत्यादि—उभयासमवेतो यो निःसामान्यो धर्म्मः 'तत्समवायित्वमित्यर्थः। उभयासमवेतत्वञ्च स्वप्रतियोगिसमवेतत्व-स्वानुयोगिसमवेतत्वोभयसम्बन्धेन भेदविशिष्टान्यत्वम्। निःसामान्यत्वञ्च सामान्यशून्यत्वम्, अन्त्यविशेषाणां प्रतिव्यक्ति भिन्नतया कस्याश्चिदपि जातेस्तद्वृत्तित्वाभावेन च तेषां उभयासमवेतत्वं निःसामान्यधर्म्मत्वञ्चेति तादृशधर्म्मसमवायित्वं निरवयवद्रव्याणामव्याहतमेव। असमवेतेत्यादि—वृत्तित्वसामान्याभावार्थकस्य अनाश्रितत्वमात्रस्योपग्रहे कालिकेन निरवयवद्रव्याणामपि सर्व्वाधारभूतकालवृत्तितया अव्याप्त्यापत्तिरिति प्रतियोगिविधया समवायसम्बन्धावच्छिन्नवृत्तित्वानुसरणम्, तेन निरवयवद्रव्याणां कालिकसम्बन्धावच्छिन्नवृत्तित्वसत्त्वेऽपि निरुक्तसंसर्गकवृत्तित्वाभावान्न क्षतिः।

नित्यत्वमित्यादि—प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वस्य नित्यलक्षणत्वप्रसिद्धावपि सत्यन्तदलनिवेशे प्रयोजनविरहात् गौरवाच्च अविनाशीत्येतन्मात्रमुपात्तम्। ध्वंसे अतिव्याप्तिवारणाय द्रव्येति। चकारादित्यादि—अनित्यद्रव्ये अतिव्याप्तिवारणाय नित्येति परिमाणविशेषणम्।

ज्वलनोऽन्तेत्यादि—ज्वलनशब्दस्य योगमुपादाय मुख्यार्थो वह्निरेव, स्ववृत्ति-

तेजस्त्ववत्त्वादिसम्बन्धेन पुनर्लक्ष्यार्थः तेजोमात्रम्, तथाविधार्थानुसरणे निरुक्तानेकत्वादिधर्म्माणां वह्न्यतिरिक्ततेजसि सुवर्णादावपि सत्त्वेन पृथिव्यादिभिन्नावृत्तित्वरूपपृथिव्यादिवैधर्म्यत्वानुपपत्तेरिति भावः (१)। सिद्धान्ते तु ज्वलनपदेन सुवर्णादीनामपि लाभात् न क्षतिशङ्कापि।

अनेकत्वमित्यादि—अनेकत्वस्य बहुसमवेतधर्म्मवत्त्वरूपत्वे द्रव्यत्वादिकमादाय आकाशादित्रये गुणादौ चातिव्याप्तिरिति द्रव्यविभाजकत्वं धर्म्मविशेषणम्। द्रव्यवृत्तित्वमात्रानुसरणे पदार्थत्वादिकमादायातिव्याप्तितादवस्थ्यं, द्रव्यसमवेतत्वानुसरणेऽपि द्रव्यसमवेतसत्ताख्यसामान्यमादाय तथा। आकाशकालदिशां प्रत्येकमाकाशत्वाद्येकैकमात्रवृत्तिद्रव्यविभाजकधर्म्मवत्त्वेन द्रव्यविभाजकधर्म्मवत्त्वमात्रोक्तौ तत्रातिव्याप्तिरिति बहुसमवेतत्वं धर्म्मविशेषणम्। यद्यपि तादृशधर्म्मवत्त्वस्य समवायसम्बन्धेन विवक्षणे न निरुक्तातिव्याप्तिः द्रव्यविभाजकानामाकाशत्वकालत्वदिक्त्वानाम् उपाधिविशेषरूपाणां समवायसम्बन्धावच्छिन्नवृत्तित्वविरहादिति विभाव्यते, तथापि तादृशवृत्तित्वलाभायैव तदिति ध्येयम्।

द्रव्यत्वन्यूनवृत्तीति—द्रव्यत्वसामानाधिकरण्ये सति द्रव्यत्ववद्वृत्त्यभावप्रतियोगित्वमित्यर्थः। गुणत्वादिकमादाय गुणादावतिव्याप्तिवारणाय सत्यन्तम्। सत्तान्यूनवृत्तिद्रव्यत्वगुणत्वादिकमादाय आकाशादौ गुणादौ च अतिव्याप्तितादवस्थ्यमिति न्यूनवृत्तित्वे द्रव्यत्वनिरूपितत्वविशेषणम्। अत्र सामानाधिकरण्यघटकीभूतं वृत्तित्वं विशेष्यदलीय-प्रतियोगित्वञ्च समवायेन वक्तव्यं; नातः गुणत्वादेरपि सम्बन्धविशेषेण द्रव्यत्वसामानाधिकरण्यस्य सम्बन्धान्तरेण च तादृशप्रतियोगित्वस्य सत्त्वेऽपि अतिप्रसङ्गस्तदवस्थ इति ध्येयम्।

क्रियावदित्यादि—द्रव्यत्ववद्वृत्तिभेदप्रतियोगितावच्छेदकत्वादिपर्य्यवसितस्य द्रव्यत्वाव्यापकत्वस्य गुणत्वादावपि सत्त्वेन अतिप्रसङ्गवारणाय क्रिया-

---

(१) जगदीशेन तदितरावृत्तित्वरूपमेव वैधर्म्यत्वं प्रकृते अभिप्रेतं, न तु 'यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्' इति विश्वनाथाद्यभिमतं तदवृत्तित्वरूपं, तथात्वे द्रव्यत्वयोगादेः जगदीशोक्तद्रव्यवैधर्म्यतासूचनासङ्गतेः। वक्ष्यते चैवं स्वयमेवाग्रे।

वद्वृत्तीति जातिविशेषणम्। वृत्तित्वञ्च समवायसम्बन्धावच्छिन्नं विवक्षितम्, अन्यथा गुणत्वादेरपि कालिकेन क्रियावद्वृत्तितया तथैवातिप्रसङ्गापातात्।

निष्क्रियेत्यादि—उत्पन्नविनष्टघटादावित्यर्थः। अव्याप्तिरिति घटवृत्ति-गुणक्रियादौ घटादेः समवायिकारणत्वेन गुणक्रियाद्युत्पत्तिपूर्व्ववर्त्तित्वस्य अवश्यमुपगन्तव्यतया आद्यक्षणे घटादौ गुणक्रियाद्युत्पत्तेरभ्युपगन्तुमशक्य-त्वात्, अनन्तरक्षणे च आश्रयस्यैव अभावेन क्रियावत्त्वलक्षणस्य तत्र विरहा-दिति भावः।

जातिप्रभेदो वेति—वाकारोऽनास्थायां, तद्वीजन्तु साङ्कर्य्यस्य जाति-बाधकताया अभ्युपगमात् भूतत्वनिरूपितसाङ्कर्य्यस्य मूर्त्तत्वे सत्त्वेन जातित्वस्य स्वीकर्त्तुमशक्यत्वादिति भावः।

परत्वेत्यादि—अत्रापि पूर्ववद्व्यावृत्तिरनुसन्धेया। एवमिति—अत्रापि पूर्ववत् अपरत्ववद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वाव्यापक-जातिमत्त्वञ्च अर्थौ बोध्य इत्यर्थः। व्यावृत्तिरपि पूर्ववदेव।

ভাষ্যতাৎপর্য্য

সম্প্রতি দ্রব্য সমূহের বৈধর্ম্ম্য বলা হইতেছে। [ইতরাবৃত্তিধর্ম্মকেই প্রকৃত-স্থলে জগদীশ বৈধর্ম্ম্য বলিয়া গ্রহণ করিয়াছেন। উহা ফলতঃ সাধর্ম্ম্য অর্থেই পর্য্যবসিত হয়।] যথা—পৃথিবী প্রভৃতি নয়টী দ্রব্যের দ্রব্যত্বযোগ বা দ্রব্যত্ব-সমবায় আছে, অন্য বস্তুতে দ্রব্যত্বসমবায় থাকে না। পক্ষরূপে দ্রব্যের নির্দ্দেশ করাতেই দ্রব্যত্ব তাহার বৈধর্ম্ম্য পাওয়া গিয়াছে, এই জন্যই এস্থলে দ্রব্যত্বকে বৈধর্ম্ম্য না বলিয়া দ্রব্যত্বের সমবায়কে বৈধর্ম্ম্য বলা হইয়াছে। ঐরূপ স্বসমবেতকার্য্যের কারণত্ব অর্থাৎ সমবায়িকারণত্ব নয়টী দ্রব্যেরই বৈধর্ম্ম্য। সমবায় সম্বন্ধে গুণাশ্রয়ত্ব বা গুণসমবায়ানুযোগিত্ব উহার বৈধর্ম্ম্য, স্পন্দাত্মক কালাদিতে কালিক সম্বন্ধে গুণ থাকে, সমবায় সম্বন্ধে থাকে না, অতএব কালিকসম্বন্ধে গুণাশ্রয়ত্ব ধরিয়া অতিপ্রসঙ্গ হইল না। এইরূপ কার্য্যকারণাবিরোধিত্ব অর্থাৎ স্বজন্যসংযোগজন্যবিভাগের জনকত্ব উহার বৈধর্ম্ম্য। কেবলমাত্র বিভাগ-

জনকত্ব বলিলে সংযোগ বিভাগ ও কর্ম্মে অতিব্যাপ্তি হয়, এই জন্য অপর অংশ বিশেষণরূপে সন্নিবেশ করা হইয়াছে।

পৃথিব্যাদি নয়টী দ্রব্যের মধ্যে যে যে দ্রব্য নিরবয়ব, তাহাতে অন্ত্যবিশেষবত্ত্ব অনাশ্রিতত্ব ও নিত্যত্বরূপ ধর্ম্ম থাকে। অন্ত্যবিশেষবত্ত্ব অর্থ উভয়ে অসমবেত যে ধর্ম্ম সামান্যশূন্য সমবায়সম্বন্ধে তদ্বত্ত্ব। অন্ত্যবিশেষপদার্থ প্রতিব্যক্তিতে পৃথক্ পৃথক্, উহা উভয়ে সমবেত নহে ও উহাতে কোনও জাতি নাই, এবং উহা নিরবয়ব দ্রব্যে সমবায় সম্বন্ধে থাকে, অতএব নিরবয়ব দ্রব্যে তাদৃশ ধর্ম্মের সমবায়িত্ব আছে, উহা অন্য পদার্থে নাই। অনাশ্রিতত্ব অর্থ অসমবেত-দ্রব্যত্ব, সামান্যতঃ আশ্রিতত্বের অভাব নহে, কারণ তাহা হইলে কালিক সম্বন্ধে কালে সর্ব্ববস্তু থাকে বলিয়া কালিকসম্বন্ধে আশ্রিতত্ব নিরবয়ব দ্রব্যেও আছে, এই জন্য সামান্যতঃ আশ্রিতত্বের অভাব তাহাতে কোনও মতেই থাকিতে না পারায় অসম্ভব হয়। অভাব ও সমবায়াদিতেও অসমবেতত্ব থাকে, এই জন্য অসমবেত দ্রব্যত্ব পর্য্যন্ত অর্থ করা হইয়াছে। নিত্যত্ব অর্থ অবিনাশিদ্রব্যত্ব। কেবল অবিনাশিত্ব উহার অর্থ করিলে ধ্বংসাভাবাদিতে অতিব্যাপ্তি হয়, এই জন্য অবিনাশিদ্রব্যত্ব পর্য্যন্ত বলা হইয়াছে। যদিও প্রাগভাবের অপ্রতিযোগী হইয়া যাহা বিনাশের অপ্রতিযোগী হয়, তাহাকেই নিত্য বলিয়া শাস্ত্রকারগণ বলিয়া থাকেন, তথাপি প্রকৃত স্থলে দ্রব্যত্ব অংশ নিবিষ্ট থাকায় দুইটী অংশ না লইলেও দোষ হয় না। উক্ত অনুভব অনুসারে অবিনাশিদ্রব্যত্বের ন্যায় অনুৎপন্নদ্রব্যত্বও বৈধর্ম্ম্য বলা যাইতে পারে। ভাষ্যগ্রন্থে চকার দ্বারা ঐ সকল ধর্ম্ম ও নিত্যপরিমাণবত্ত্ব প্রভৃতি বৈধর্ম্ম্য সূচনা করা হইয়াছে।

উক্ত নয়টী দ্রব্যের মধ্যে আবার ক্ষিতি অপ্ তেজ মরুৎ আত্মা ও মন এই কয়টী দ্রব্যের অনেকত্ব ও অপরজাতিমত্ত্বরূপ ধর্ম্ম বৈধর্ম্ম্য। অনেকত্বপদের অর্থ বহু বস্তুতে সমবায় সম্বন্ধে বর্ত্তমান দ্রব্যবিভাজক ধর্ম্মবত্ত্ব। অনেকত্ব পদের যথাশ্রুত অর্থ থাকিলে বিশেষাদিপদার্থেও অনেকত্ব থাকায় অতিব্যাপ্তি হয়। উক্ত অর্থ অনুসরণ করায় যেমন বিশেষ পদার্থ বহুসমবেত ধর্ম্মবান্ নহে ঐরূপ বিশেষ পদার্থে দ্রব্যবিভাজক ধর্ম্ম নাই বলিয়া অতিব্যাপ্তি হইল না। গুণত্বাদি ধর্ম্মও বহুবস্তুতে সমবায় সম্বন্ধে থাকে, কিন্তু উহা দ্রব্যবিভাজক ধর্ম্ম নহে, এই জন্য গুণাদিতে অতিব্যাপ্তি বারণার্থ দ্রব্যবিভাজক এই অংশ দেওয়া হইয়াছে। আকাশত্বাদি

ধর্ম্ম দ্রব্যবিভাজক হইলেও উহা বহু বস্তুতে বর্ত্তমান বা সমবেত নহে, এই জন্য বহু সমবেত এই অংশের উপাদান করা হইয়াছে। দ্রব্যবিভাজকধর্ম্মবত্ত্ব সমবায় সম্বন্ধে দ্রব্যবিভাজকধর্ম্মাধিকরণত্ব এইরূপ অর্থ করিলে আকাশাদিতে অতিব্যাপ্তি হয় না, অতএব উক্ত অর্থ লাভের জন্যই বহুসমবেত এই অংশ দেওয়া হইয়াছে বুঝিতে হইবে।

অপরজাতিমত্ত্বপদের অর্থ দ্রব্যত্ববদ্‌বৃত্তি দ্রব্যত্বাব্যাপকজাতিমত্ত্ব। গুণত্বাদি জাতিও দ্রব্যত্বের অব্যাপক বলিয়া উক্ত জাতি আদান করিয়া গুণাদিতে অতি-ব্যাপ্তি হয়, এই জন্য জাতি অংশে দ্রব্যত্ববদ্‌বৃত্তি এই বিশেষণ দেওয়া হইয়াছে। উক্ত দ্রব্যত্ববত্ত্ব ও দ্রব্যত্ববদ্‌বৃত্তিত্ব উভয়ই সমবায় সম্বন্ধে বলিতে হইবে, কাজেই কালিকসম্বন্ধে দ্রব্যত্ববত্ত্ব বা দ্রব্যত্ববদ্‌বৃত্তিত্ব ধরিয়া পূর্ব্ববৎ অতিব্যাপ্তি হইল না।

ক্রিয়াবত্ত্ব, মূর্ত্তত্ব, পরত্ববত্ত্ব, অপরত্ববত্ত্ব ও বেগবত্ত্ব; ক্ষিতি, জল, তেজ, পবন ও মন এই পঞ্চ দ্রব্যের বৈধর্ম্ম্য। ক্রিয়াবত্ত্ব পদের যথাশ্রুত অর্থ আদান করিলে প্রথম ক্ষণে উৎপন্ন হইয়া যে ঘটাদি দ্বিতীয়ক্ষণেই নষ্ট হইয়া যায়, তাহাতে ক্রিয়া উৎপন্ন না হওয়ায় ক্রিয়াবত্ত্বলক্ষণের অব্যাপ্তি হয়, তদ্বারণার্থ উক্ত বিশেষ অর্থের অনুসরণ করা হইয়াছে। দ্রব্যত্বাব্যাপকজাতিমত্ত্বমাত্র বলিলে গুণত্বাদি জাতি আদান করিয়া গুণাদিতে অতিব্যাপ্তি হয়, এই জন্য উক্ত জাতিতে ক্রিয়াবদ্‌বৃত্তি বিশেষণ দেওয়া হইয়াছে। উক্ত স্থলেও পূর্ব্ববৎ অতিব্যাপ্তি বারণের জন্য সমবায় সম্বন্ধেই ক্রিয়া-বত্ত্ব ও ক্রিয়াবদ্‌বৃত্তিত্ব প্রভৃতি বলিতে হইবে।

মূর্ত্তত্ব পদের অর্থ পরিচ্ছিন্নপরিমাণবত্ত্ব বা নিকৃষ্টপরিমাণবত্ত্ব। নয়টী দ্রব্যের মধ্যে আকাশ কাল দিক্ ও আত্মা এই চারিটী দ্রব্যের পরিমাণ পরম মহৎ অর্থাৎ সর্ব্বপরিমাণ অপেক্ষা বৃহৎ, তদ্‌ভিন্ন পাঁচটী দ্রব্যের পরিমাণ তদপেক্ষা নিকৃষ্ট,অতএব আকাশাদি চারিটী দ্রব্য ভিন্ন অপর সকল দ্রব্যেই নিকৃষ্টপরিমাণবত্ত্ব আছে। কেহ বলেন যে, মূর্ত্তত্ব স্পন্দের সমবায়িকারণতাবচ্ছেদক জাতিবিশেষ। বাস্তবিক উক্ত মত সমীচীন নহে, কারণ পূর্ব্বেই সাঙ্কর্য্যের জাতিবাধকতা বলা হইয়াছে, মূর্ত্তত্বে ভূতত্বনিরূপিত সাঙ্কর্য্য থাকায় উহা জাতি হইতে পারে না।

পরত্ববত্ত্ব অপরত্ববত্ত্ব ও বেগবত্ত্বপদের অর্থ যথাক্রমে পরত্ববদ্‌বৃত্তিদ্রব্যত্বাব্যাপক-জাতিমত্ত্ব অপরত্ববদ্‌বৃত্তিদ্রব্যত্বাব্যাপকজাতিমত্ত্ব ও বেগবদ্‌বৃত্তি দ্রব্যত্বাব্যাপক জাতিমত্ত্ব। ব্যাবৃত্তি পূর্ব্ববৎ অনুসন্ধেয়।

আকাশ, কাল, দিক্ ও আত্মা, এই চারিটী দ্রব্যের সর্ব্বগতত্ব অর্থাৎ সকলমূর্ত্ত বস্তুর সংযোগাশ্রয়ত্ব। এবং পরমমহত্ত্ব ও সর্ব্বসংযোগিসংযুক্তত্ব ইত্যাদি বৈধর্ম্ম্য।

प्रशस्तपादभाष्यम्

पृथिव्यादीनां पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्व-बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि। चतुर्णां द्रव्यारम्भकत्व-स्पर्शवत्त्वे। त्रयाणां प्रत्यक्षत्व-रूपवत्त्वद्रवत्व-(१) वत्त्वानि। द्वयोर्गुरुत्वं रसवत्त्व(२)ञ्चेति।

[भूयस्त्वात् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः—८अ—२आ—५सू। तथापस्तेजोवायुश्च रसरूपस्पर्शाविशेषात्—८अ—२आ—६सू। रूपरसगन्धस्पर्शवती पृथिवी—२अ—१आ—१सू। रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः—२अ—१आ—२सू। तेजो रूपस्पर्शवत्—२अ—१आ—३सू। स्पर्शवान् वायुः—२अ—१आ—४सू। द्रव्याणां द्रव्यं कार्य्यं सामान्यम्—१अ—१आ—२३सू। सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम्—२अ—१आ ६सू। त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम्—२अ—१आ—७सू। संयोगाभावे गुरुत्वात् पतनम्—५अ—१आ—७सू। संस्काराभावे गुरुत्वात् पतनम्—५अ—१आ—१८सू। अपां संयोगाभावे गुरुत्वात् पतनम्—५अ—२आ—३सू। एतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

पृथिव्यादीनामिति—भूतत्वम् आत्मेतरवृत्तिविशेषगुणवत्त्वम्। इन्द्रियप्रकृतित्वं साक्षात्कारकारणवृत्तिद्रव्यविभाजकवत्त्वम्, नतु

---

(१) द्रव्यत्वानि (घ) पुस्तके।

(२) रसवत्त्वञ्च (घ) पुस्तके।

इन्द्रियसमवायिकारणवृत्तिद्रव्यविभाजकवत्त्वम् गगनाव्याप्तिप्रसङ्गात्, वाह्येति—वहिरिन्द्रियद्वयाग्राह्यवहिरिन्द्रिय-ग्राह्यजातिमद्विशेषगुण-वत्त्वम् दर्शनस्पर्शनोभयाग्राह्यवहिरिन्द्रियग्राह्यजातिमद्विशेषगुणवत्त्वं वार्थः। तेन घ्राणपिशाचादौ नाव्याप्तिः।

चतुर्णामिति—पृथिव्यादीनामित्यनुषज्यते। द्रव्यारम्भकत्वं द्रव्य-समवायिकारणवृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं नातो घटाद्यव्याप्तिः। स्पर्शवत्त्वं स्पर्शसमवायित्वम् धूमपिशाचादेरनुद्भूतस्पर्शवत्त्वान्न तत्र अव्याप्तिः। स्पर्शवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वे वा तात्पर्य्यम्। त्रयाणां पृथिव्यादीनामिति पूर्व्वेणान्वयः। प्रत्यक्षत्वं वहिरिन्द्रिय-ग्राह्यवृत्तिद्रव्यत्वन्यूनवृत्तिजातिमत्त्वं नातः परमाण्वाद्यव्याप्तिरात्म-न्यतिव्याप्तिर्व्वा।

रूपवत्त्वं रूपसमवायित्वं रूपसमवायिवृत्तिद्रव्यत्वाव्यापकजाति-मत्त्वं वार्थः। तेनानुद्भूतरूपासत्त्वेऽपि न क्षतिः। द्रवत्वं द्रुत[द्रव]-वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं नातो घटकरकावङ्गाद्यव्याप्तिः। द्वयोः रसवत्त्वं रससमवायित्वं रसवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वार्थः। चकाराद्भास्वरान्यरूपवत्त्वाद्युपग्रहः।

सूक्तिदीपिका।

मूर्त्तत्वेन सह साङ्कर्य्याद् भूतत्वे जातित्वं न शक्यमुपगन्तुम्, अत एव तत्-स्वरूपमाह आत्मेतरेत्यादिना। भगवदुदयनाचार्य्यास्तु भूतत्वमौपाधिकं सामान्यमाहुः। साङ्कर्य्यस्य जातिवाधकतामनङ्गीकुर्व्वन्तस्तु भूतत्वं जातिमेव वदन्ति। आत्मनि ज्ञानादिलक्षणविशेषगुणसत्त्वादतिप्रसङ्गवारणाय आत्मे-तरवृत्तीति। अत्र वृत्तित्वं समवायेन विवक्षणीयम्, अन्यथा आत्मवृत्तिविशेष-गुणानामपि कालिकादिसम्बन्धेन आत्मेतरवृत्तितया तद्वत्त्वेनात्मनि अति-प्रसङ्गतादवस्थ्यात्। कालादावतिव्याप्तिवारणाय विशेषगुणवत्त्वमपि

समवायसम्बन्धेन विवक्षणीयम्। विशेषस्तु मत्कृत'जातिबाधकविचार'ग्रन्थे द्रष्टव्यः।

साक्षात्कारेति—बहिरिन्द्रियजन्यसाक्षात्कारेत्यर्थः। अन्यथा मनस्त्वस्यापि तादृशद्रव्यविभाजकतया तद्वत्त्वेन मनस्यतिप्रसङ्गात्। कारणत्वञ्च विषयत्वसम्बन्धावच्छिन्नकार्य्यताकं तादात्म्यसम्बन्धानवच्छिन्नं समवायिकारणताभिन्नं वा वाच्यं, तेन साक्षात्कारं प्रति आत्मनः कारणत्वेऽपि न क्षतिः, आत्मत्वावच्छिन्नकारणताया विषयत्वसम्बन्धावच्छिन्नकार्य्यताकत्वविरहात् तादात्म्यसम्बन्धावच्छिन्नत्वात् समवायिकारणताभिन्नत्वाभावाच्च।

इन्द्रियेत्यादि—उक्तं हि भगवता उदयनेन 'इन्द्रियप्रकृतित्वं इन्द्रियोपादानत्व'मिति। तादृशार्थपरिग्रहे गगनाव्याप्तिस्तु श्रोत्ररूपस्य इन्द्रियस्य गगनात्मकतया नित्यत्वेन गगने तत्प्रकृतित्वासम्भवादिति। उदयनाचार्य्यास्तु विशेषणस्य अवच्छिन्नविशिष्टस्य वा जन्यतया नभसः कर्णशष्कुल्यवच्छिन्नस्य जन्यत्वमुपपादयन्ति, तदुक्तं—'तच्च नभसोऽवच्छिन्नानवच्छिन्नभेदकल्पनयोपपादनीयम्, अन्यथा भूतेभ्य इति पञ्चमी समानतन्त्रे स्वतन्त्रे च मनस एतद्वैधर्म्यं न स्यादिति'।

बहिरिन्द्रियेत्यादि—विशेषगुणवत्त्वं जातिमद्विशेषगुणवत्त्वं इन्द्रियग्राह्यजातिमद्विशेषगुणवत्त्वं वा सममेवात्मन्यतिप्रसक्तमतो बहिरिन्द्रियेति। जातिमत्त्वं विशेषगुणवत्त्वञ्च समवायेन, नातः कालिकादिसम्बन्धमादायातिप्रसङ्गस्तदवस्थः।

मूले वाह्यपदमपहाय एकैकेन्द्रियग्राह्यविशेषगुणवत्त्वमात्रनिवेशे रूपादीनां अन्तःकरणेनापि ग्रहात् एकैकेन्द्रियग्राह्यत्वस्य असिद्धा अव्याप्तिः स्यादिति वाह्यपदम्। दर्शनस्पर्शनोभयेति यथाश्रुतभाष्यानुगतिरक्षणार्थं बहिरिन्द्रियेत्याद्यर्थस्यैव पर्य्याप्तत्वादिति।

द्रव्यारम्भकत्वं यदि द्रव्यसमवायिकारणत्वं तदा घटादेर्द्रव्यसमवायिकारणत्वाभावादव्याप्तिरिति द्रव्यसमवायीत्यादि विशेषार्थानुसरणम्। बहिरिन्द्रियेत्यादि—अव्याप्तिरिति परमाणुषु प्रत्यक्षविषयत्वाभावात्। अतिव्याप्तिरिति सुखाद्युपरागेण मानसप्रत्यक्षविषयत्वस्य आत्मनि वर्त्तमानत्वादिति भावः। बहिरिन्द्रियेत्याद्यर्थानुसरणे तु परमाणुषु बहिरिन्द्रियग्राह्यघटादि-

বৃত্তিপৃথিবীত্বাদিরূপদ্রব্যত্বন্যূনবৃত্তিজাতিসত্ত্বাৎ নাব্যাপ্তিঃ। আত্মনি চ বহিরিন্দ্রিয়গ্রাহ্যবৃত্তিতাদৃশজাতিসত্ত্বাভাবাৎ নাতিব্যাপ্তিরিতি ধ্যেয়ম্।

অত ইতি ঘটাদৌ তাদৃশপৃথিবীত্বস্য করকাদৌ তাদৃশজলত্বস্য বহ্ন্যাদৌ চ তাদৃশতেজস্ত্বস্য সত্ত্বাদিত্যর্থঃ।

চক্রাদিত্যাদি—আদিপদাৎ আলোকপ্রকাশ্যত্বাদীনামুপগ্রহঃ। অত-এবোক্তমাচার্য্যৈঃ—"আলোকপ্রকাশ্যত্বং অভাস্বররূপবত্ত্বঞ্চেতি চার্থঃ" ইতি। অন্যৎ স্বয়মূহ্যম্।

ভাষ্যতাৎপর্য্য

ক্ষিতি, অপ্, তেজ, মরুৎ ও ব্যোম; এই পাঁচটী দ্রব্যে ভূতত্ব আছে। আত্ম-ভিন্নপদার্থে যে বিশেষগুণ থাকে তদ্বত্বই ভূতত্ব। বিশেষগুণের মধ্যে বুদ্ধপ্রভৃতি কতিপয় বিশেষগুণ আত্মার ধর্ম্ম ও কতিপয় বিশেষগুণ ক্ষিতিপ্রভৃতি পঞ্চভূতের ধর্ম্ম। অতএব কেবল বিশেষগুণবান্‌কে ভূত বলিলে আত্মাও উক্ত লক্ষণাক্রান্ত হইয়া পড়ে, এইজন্য আত্মেতরবৃত্তি বিশেষগুণবত্ত্ব বলা হইয়াছে। আত্মার ইতর যে বস্তুতে বিশেষগুণ থাকে, উহা পঞ্চভূতের অন্যতম, অতএব তাহাতে কোনও দোষ নাই।

ঐরূপ ক্ষিতি প্রভৃতি পঞ্চ পদার্থে ইন্দ্রিয়প্রকৃতিত্ব বা সাক্ষাৎকারকারণে বর্ত্তমান দ্রব্যবিভাজক ধর্ম্ম আছে। অর্থাৎ চক্ষুঃ, কর্ণ, নাসিকা, জিহ্বা ও ত্বক্ এই পাঁচটী ইন্দ্রিয় একটী একটী ভূতাত্মক বা ভূতজন্য। তন্মধ্যে চক্ষুঃ তৈজস, কর্ণ ব্যোমাত্মক, নাসিকা পার্থিব, জিহ্বা জলীয়, ত্বক্ বায়বীয়। এই পাঁচটী ইন্দ্রিয় দ্বারাই সাক্ষাৎকার হয় বলিয়া পাঁচটী ইন্দ্রিয়ই সাক্ষাৎকারের কারণ, উহাতে পৃথিবীত্ব প্রভৃতি এক একটী দ্রব্যবিভাজক ধর্ম্ম আছে, উক্ত এক একটী ধর্ম্ম লইয়াই সকল পৃথিব্যাদিতে লক্ষণ সমন্বয় হয়। ইন্দ্রিয়প্রকৃতিত্বপদের যথাশ্রুত অর্থ আদান করিয়া ইন্দ্রিয়সমবায়িকারণে বর্ত্তমান দ্রব্যবিভাজকধর্ম্মবত্ত্ব এইরূপ অর্থ করিলে গগনে অব্যাপ্তি হয়, কারণ শ্রোত্ররূপ ইন্দ্রিয় অবলম্বন করিয়াই গগনে ইন্দ্রিয়প্রকৃতিত্ব রাখিতে হইবে, অথচ শ্রোত্র নিত্য গগনস্বরূপ বলিয়া উহার সমবায়িকারণরূপে যখন গগনকে ধরা যায় না, তখন কিরূপে গগনে ইন্দ্রিয়প্রকৃতিত্ব রাখা যায়। অপর ঘ্রাণাদি ইন্দ্রিয়ের প্রকৃতি ক্ষিত্যাদি, গগন নহে, অতএব অপর ইন্দ্রিয় ধরিয়াও

গগনে ইন্দ্রিয়প্রকৃতিত্ব রাখা অসম্ভব, এই জন্যই প্রথম কল্পের অনুসরণ করা হইয়াছে।

ঐরূপ যে বিশেষগুণবৃত্তি জাতি বহিরিন্দ্রিয় দ্বারা গৃহীত হয়, উক্ত বিশেষগুণবত্বও ক্ষিত্যাদি পঞ্চদ্রব্যের ধর্ম্ম। ঘ্রাণ ও পিশাচাদির গন্ধ স্পর্শাদি বহিরিন্দ্রিয়গ্রাহ্য না হইলেও তদ্গত গন্ধত্ব স্পর্শত্বাদি জাতি অপর পদার্থ অন্তর্ভাবে বহিরিন্দ্রিয় গ্রাহ্য হওয়ায় তাহাতেও অব্যাপ্তি হইল না।

পৃথিবী, অপ্, তেজ ও মরুৎ এই চারিটী পদার্থে দ্রব্যারম্ভকত্ব ধর্ম্ম আছে। দ্রব্যারম্ভকত্বপদের অর্থ দ্রব্যসমবায়িকারণে বর্ত্তমান দ্রব্যত্বাব্যাপকজাতিমত্ব। উক্ত অর্থের অনুসরণ করায় ঘটাদিদ্রব্যে দ্রব্যসমবায়িকারণত্বরূপ দ্রব্যারম্ভকত্ব না থাকিলেও দ্রব্যসমবায়িকারণ পরমাণ্বাদিবৃত্তি পৃথিবীত্বাদিরূপ দ্রব্যত্বাব্যাপকজাতিমত্ব থাকায় অব্যাপ্তি হইল না।

স্পর্শবত্ব বা স্পর্শসমবায়িত্ব ধর্ম্মও উক্ত পৃথিব্যাদি চারিটী দ্রব্যের ধর্ম্ম। ধূম ও পিশাচাদিতে স্পর্শের উপলব্ধি না হইলেও উহাতে অনুদ্ভূত স্পর্শ থাকায় অব্যাপ্তি হইবে না। অথবা স্পর্শবত্বপদের অর্থ স্পর্শবৎ পদার্থে বর্ত্তমান দ্রব্যত্বাব্যাপকজাতিমত্ব। উক্ত কল্পে পৃথিবীত্ব ও বায়ুত্ব প্রভৃতি ধরিয়াই সাধর্ম্ম্য রক্ষিত হইবে।

পৃথিব্যাদি তিনটী দ্রব্যের অর্থাৎ পৃথিবী, অপ্ ও তেজ এই তিনটীর প্রত্যক্ষত্ব রূপবত্ব ও দ্রবত্ববত্ব সাধর্ম্ম্য। প্রত্যক্ষত্বপদের অর্থ বহিরিন্দ্রিয়গ্রাহ্য বস্তুতে বর্ত্তমান দ্রব্যত্বাব্যাপকজাতিমত্ব। উক্ত অর্থের অনুসরণ না করিলে পরমাণুতে প্রত্যক্ষবিষয়ত্ব না থাকায় অব্যাপ্তি ও আত্মাতে মানসপ্রত্যক্ষের বিষয়ত্ব থাকায় অতিব্যাপ্তি হয়। কিন্তু উক্ত কল্পে পরমাণু প্রত্যক্ষ না হইলেও বহিরিন্দ্রিয় গ্রাহ্য ঘটাদিতে বর্ত্তমান দ্রব্যত্বাব্যাপক পৃথিবীত্বাদি জাতি পরমাণুতে থাকায় অব্যাপ্তি হয় না এবং আত্মা প্রত্যক্ষের বিষয় হইলেও উক্ত প্রত্যক্ষ বহিরিন্দ্রিয় জন্য না হওয়ায় আত্মাতে অতিব্যাপ্তি হইল না।

রূপবত্বপদের অর্থ রূপসমবায়িত্ব বা রূপসমবায়িবৃত্তি দ্রব্যত্বাব্যাপকজাতিমত্ব। অতএব যে মতে অনুদ্ভূতরূপ বলিয়া একটা রূপ স্বীকার করা হয় না, তন্মতে ভর্জনকপালস্থিত বহ্নি প্রভৃতিতে অব্যাপ্তি হইল না।

দ্রবত্ববত্বপদের অর্থ দ্রবত্ববদ্বৃত্তি দ্রব্যত্বাব্যাপকজাতিমত্ব। উক্ত অর্থের

অনুসরণ হেতু ঘট করকা (বরফ) ও বহ্ন্যাদিতে দ্রবত্ব না থাকিলেও দ্রবত্ববৎ পদার্থে বর্ত্তমান তাদৃশ পৃথিবীত্বাদি জাতি থাকায় অব্যাপ্তি হইল না। ক্ষিতি ও জল এই দুই পদার্থের গুরুত্ব ও রসবত্ত্ব সাধর্ম্ম্য। গুরুত্ব অর্থ গুরুত্ববদ্‌বৃত্তি দ্রব্যত্বাব্যাপকজাতিমত্ত্ব, রসবত্ত্ব অর্থ রসবদ্‌বৃত্তি দ্রব্যত্বাব্যাপকজাতিমত্ত্ব। ব্যাবৃত্তি পূর্ব্ববৎ। চকার দ্বারা অভাস্বররূপবত্ত্বাদির পরিগ্রহ করা হইয়াছে।

प्रशस्तपादभाष्यम्

भूतात्मनां वैशेषिकगुणवत्त्वम्। क्षित्युदकात्मनां चतुर्द्दशगुणवत्त्वम्। आकाशात्मनां क्षणिकैकदेश-वृत्तिविशेषगुणवत्त्वम्। दिक्कालयोः पञ्चगुणवत्त्वम्, सर्व्वोत्पत्तिमतां निमित्तकारणत्वञ्च। क्षितितेज-सोर्नैमित्तिकद्रवत्वयोगः। एवं सर्व्वत्र विपर्य्ययात् साधर्म्म्यं वैधर्म्म्यञ्च वाच्यमिति।

[रूपरसगन्धस्पर्शवती पृथिवी—२अ—१आ—१सू। रूपरसस्पर्शवत्य आपः स्निग्धाः—२अ - १आ- २सू। सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगा-द्द्रवत्वमद्भिः सामान्यम्—२अ—१आ- ६सू। संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म्म च रूपिद्रव्यसमवायात् चाक्षुषाणि—४अ—१आ—११सू। नोदनाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्काराढुत्तरं तथोत्तरमुत्तरञ्च—५अ—१आ १७सू। संस्काराभावे गुरुत्वात् पतनम्—५अ—१आ—१८सू। संयोगाभावे गुरुत्वात् पतनम्—५अ—१आ—७सू। प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेष-प्रयत्नाश्चात्मनो लिङ्गानि—३अ—२आ—४सू। व्यवस्थातो नाना—३अ—२आ—२०सू। शास्त्रसामर्थ्याच्च—३अ—२आ—२१सू। आत्मान्तरगुणाना-मात्मान्तरे अकारणत्वात्—६अ—१आ—५सू। आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः—९अ—२आ—६सू। विभवान्महानाकाशस्तथा चात्मा—

७अ—१आ—२२सू। अप्सु शीतता—२अ—२आ—५सू। व्यवस्थितः पृथिव्यां गन्धः—२अ—२आ—२सू। नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्म—५अ—२आ—१सू। अपां संयोगाभावे गुरुत्वात् पतनम्—५अ—२आ—३सू। द्रवत्वात् स्यन्दनम्—५अ—२आ—४सू। नाड्यावायु-संयोगादारोहणम्—५अ—२आ—५सू। नोदनापीड़नात् संयुक्तसंयोगाच्च—५अ—२आ—६सू। अपां संघातो विलयनञ्च तेजःसंयोगात्—५अ—२आ ८सू। अपां संयोगाद्विभागाच्च स्तनयित्नोः—५अ—२आ—११सू। तत्त्वम्भावेन—२अ—२आ—८सू। नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति—२अ—२आ—९सू। तत्त्वम्भावेन—२अ—२आ—१२सू। तदनुविधानादेक-पृथक्त्वञ्चेति—२अ—१आ—३१सू। गुणैर्दिग् व्याख्याता—७अ—१आ—२४सू। कारणे कालः—७अ—१आ—२५सू। कारणपरत्वात् कारणा-परत्वाच्च—७अ—२आ—२२सू। इत्येतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

भूतेति—भूतानां आत्मनश्च वैशेषिकगुणवत्त्वं विशेषगुणतया परि-भाषितगुणवत्त्वम्।

रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।

बुद्ध्यादिभावनान्तश्च शब्दो वैशेषिका गुणाः॥ (१)

इति प्राचीनैः परिभाषितत्वात्। यद्वा वैशेषिकः प्रत्यक्षविशेषाय उचितः प्रत्यक्षं प्रति विषयविधया हेतुरिति यावत्। तादृशगुणवत्त्व-मर्थः। तत्र प्रत्यक्षजातिमादाय गुणाद्यतिव्याप्तिवारणाय गुणेति।

चतुर्द्दशगुणवत्त्वमिति—गन्धरसरूपस्पर्शद्रवत्वगुरुत्वपरत्वापरत्व-संख्यापरिमाणपृथक्त्वसंयोगविभागसंस्कारेषु सस्नेहनिरुक्तरसादिषु निरुक्तसंख्यादिबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मेषु च यानि चतुर्द्दश-

---

(१) गुणवत्त्वस्येति (ङ) पुस्तके पाठः।

त्वानि तेषामन्यतमपर्य्याप्त्यधिकरणगुणवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वमर्थः। तेन पृथिव्यां यादृशचतुर्दशगुणाः तादृशानां जलादावसत्त्वेऽपि न क्षतिः।

न च ईश्वरात्मनि धर्म्माधर्म्मसंस्कारविरहात्तत्राव्याप्तिरात्मपदेन सुखसमवायिकारणतावच्छेदकजातिमत एव लक्ष्यत्वात्, अत एव प्राचैरपि "जलक्षितिप्राणभृतां चतुर्दश"त्युक्त्वा प्राणिनामेव लक्ष्यत्वं स्वीकृतम्। अन्ये तु चतुर्दशगुणवत्त्वमित्यस्य तेजोऽन्यत्वे सति प्रत्यक्षवृत्तिद्रव्यत्वावान्तरजातिमत्त्वे तात्पर्य्यम्। ईश्वरस्तु नात्मत्वजातिमान्, अतो न तत्र प्रसङ्ग इत्याहुः।

क्षणत्रयावृत्तिरयं: स्वध्वंसेन सह एकदेशवृत्तिर्विशेषगुणस्तद्वत्त्वमित्यर्थः। पाकनाश्यरूपादिमत्तया परमाण्वादावतिव्याप्तिवारणाय अवृत्त्यन्तम्। क्षणत्रयावृत्तिरूपादिमतो द्विक्षणस्थायिघटादेर्वारणाय वृत्त्यन्तम्। अङ्गुलीकर्म्मजनितस्य स्वसमानकालोत्पन्नशाखाकर्म्मजविभागनाश्यस्य शाखाङ्गुलीसंयोगस्य क्षणत्रयावृत्तित्वात् स्वध्वंससमानदेशत्वाच्च तद्वतः शाखादेर्वारणाय विशेषेति। न च ईश्वरात्मन्यव्याप्तिः तस्य पूर्व्ववदलक्ष्यत्वात्।

आचार्य्यास्तु क्षणिकैकदेशवृत्त्योर्वैकल्पिकोपादानात् क्षणिकविशेषगुणवत्त्वं अव्याप्यवृत्तिविशेषगुणवत्त्वञ्चेति लक्षणद्वये तात्पर्य्यमित्याहुस्तच्चिन्त्यं द्वयोरपि द्विक्षणावस्थायिद्रव्यातिव्याप्त्यापत्तेः। पञ्चगुणवत्त्वमिति—संख्यापरिमाणपृथक्त्वसंयोगविभागवत्त्वमित्यर्थः। क्वचित् रूढ़ावपि द्विगुविषये संख्यापूर्व्वककर्म्मधारयः पञ्चगव्यादिपदवत्। पञ्चगुणशब्दो वा संख्यादिपञ्चके रूढ़ः। न च पृथिव्यादावतिव्याप्तिः संख्यादिपञ्चकान्यगुणशून्यत्वे सति गुणवत्त्वमित्यस्य (१) विवक्षितत्वात्।

---

(१) "रूपस्पर्शगन्धरसस्नेहाः सांसिद्धिको द्रवः। बुद्ध्यादिनव शब्दश्च वैशेषिकगुणाः स्मृता" इति कुत्रचित् पाठान्तरं दृश्यते।

सर्व्वेति—कार्य्यमात्रं प्रति अधिकरणविधया निमित्तकारणत्व-मित्यर्थः। कार्य्यमात्रं प्रति अदृष्टद्वारा हेतुरपि आत्मा न अधिकरण-त्वेन तथा। वस्तुतः कार्य्याण्यात्मजन्यानि तज्जनिततददृष्टजन्यत्वात् तदीयसुखादिवदित्यादेरप्रयोजकत्वात् अदृष्टद्वारा आत्मनः कार्य्यमात्र-हेतुत्वे मानाभावः तत्तत् कार्य्यं प्रति तत्तत्कालदिशोर्व्विशिष्य हेतुत्वस्य आवश्यकत्वात् "यद्विशेषयोः कार्य्यकारणभाव" इति न्यायेन पुनः कार्य्यसामान्यं प्रति अनुयोगिताविशेषपर्य्यवसिताभ्यां कालत्वदिक्-त्वाभ्यां महाकालदिशोरपि हेतुत्वमतः कार्य्यसामान्यजनकतावच्छेदकी-भूतधर्म्मवद्विभुत्वं दिक्कालयोरेव साधर्म्म्यमिति ध्येयम्। चकाराद्-विशेषगुणशून्यविभुत्वादेरुपग्रहः।

नैमित्तिकेति—तेजःसंयोगजद्रवत्ववद्वृत्तिद्रव्यत्वाव्यापकजातिम-त्त्वमर्थः। घृतादेः सुवर्णादेश्च आरम्भकपरमाणावेव वह्न्यादिसंयोगे द्रव-त्वोत्पादात् घटवह्न्यादेरपि संग्रहाय निरुक्तजातिगर्भता। नन्वाश्रित-त्वञ्चान्यत्रेत्यादिना आश्रितत्वादिकं नित्यद्रव्यान्यस्य साधर्म्म्यमेवाभि-हितं, न तु वैधर्म्म्यं तद्व्यावृत्तधर्म्मस्यैव तद्वैधर्म्म्यत्वात्, तत् कुतः साध-र्म्म्यवैधर्म्म्याभ्यां पदार्थतत्त्वनिरूपणमत आह एवमिति। उक्तक्रमेण सर्व्वत्र लक्ष्येषु यत् साधर्म्म्यं, तदेव विपर्य्ययात् लक्ष्येतरव्यावृत्तत्वात् वैधर्म्म्यं वैधर्म्म्यमपि बोध्यम्। न तु यत् यस्य साधर्म्म्यं, तदेव तस्य वैधर्म्म्यतया ग्राह्यमित्यर्थः।

सूक्तिदीपिका

वैशेषिकेत्यादि –ननु वैशेषिकगुणवत्त्वं वैशेषिकमतसिद्धगुणशालित्वं, तच्च द्रव्यमात्राणामेव इति अतिप्रसक्तिरित्यत आह विशेषगुणतयेत्यादि। तथा च रूपादीनां वक्ष्यमाणानां शब्दान्तानामेव वैशेषिकनिरुक्तौ विशेषगुणतया परिभाषितत्वेन तदितरेषां तथात्वाभावात् न क्षतिरिति भावः।

तत्रेत्यादि—प्रत्यक्षजातिः रूपत्वादिः। गुणाद्यतिव्याप्तिवारणायेति—यद्वाकल्योक्तं वैशेषिकशब्दस्य प्रत्यक्षं प्रति विषयविधया हेतुस्वरूपार्थे गुणशब्दानुपादाने रूपत्वादेरपि वैशेषिकतया तद्वत्त्वेन रूपादौ गुणे अतिव्याप्तिः स्यादतस्तद्वारणाय गुणेति विशेष्यदलम्।

सस्नेहेत्यादि—गन्धस्थाने स्नेहं विनियुज्य इत्यर्थः। यानि चतुर्दशत्वानीति—तथाहि गन्धादिषु संस्कारान्तेषु चतुर्दशत्वमेकं, गन्धस्थाने स्नेहं विनिवेश्य स्नेहादिसंस्कारान्तेषु चतुर्दशत्वमपरं, संख्यादिषट्कं बुद्धिसुखदुःखेच्छाद्वेषयत्नधर्माधर्माश्चेति चतुर्दशसु चान्यत् चतुर्दशत्वमिति चतुर्दशत्वत्रयी जाता। तत्र प्रथमचतुर्दशत्वपर्याप्त्यधिकरणगुणवत्पदेन पृथिवी द्वितीयचतुर्दशत्वपर्याप्त्यधिकरणगुणवत्पदेन जलं तृतीयचतुर्दशत्वपर्याप्त्यधिकरणगुणवत्पदेन च आत्मा इति लभ्यते। तद्वृत्तिद्रव्यत्वाव्यापकजातयः पृथिवीत्वजलत्वात्मत्वानि तत्तद्वत्तया प्रकृते लक्षणसमन्वयः। न क्षतिरिति—अन्यतमपर्याप्तिनिवेशादेकैकचतुर्दशत्वमादाय लक्षणसमन्वयसम्भवादिति भावः। उक्तलक्षणे गुणवत्त्वं वृत्तित्वं जातिमत्त्वञ्चेति त्रयमेव समवायसम्बन्धेन विवक्षणीयम्, अन्यथा कालिकादिसम्बन्धमुपादाय अतिप्रसङ्गापातादिति भावः।

ईश्वरात्मनीत्यादि—धर्माधर्मसंस्कारेत्युपलक्षणं तेन आत्मगुणान्तर्गतसुखदुःखद्वेषाणामभावाकथनान्न न्यूनत्वम्।

अत एवेति—सुखसमवायिकारणतावच्छेदकात्मत्वजातिमतो जीवात्मन एव लक्ष्यत्वादित्यर्थः। प्राणिनामेवेति न प्राणिभिन्नस्य ईश्वरस्य इत्यर्थः। अत एव तस्य लक्ष्यत्वाभावात् न लक्ष्ये लक्षणागमनरूपाव्याप्तिरिति भावः।

तेज इत्यादि—तेजस्त्वस्यापि प्रत्यक्षवृत्तिद्रव्यत्वावान्तरजातितया तेजस्यतिप्रसङ्गभङ्गाय सत्यन्तम्। प्रत्यक्षत्वं प्रत्यक्षविषयत्वं तच्च आन्तरप्रत्यक्षविषयसाधारणम् अन्यथा आत्मन्यव्याप्तिप्रसङ्गात्। अत्रापि वृत्तित्वं जातिमत्त्वञ्च समवायसम्बन्धेन बोध्यम्। अन्यथा प्रागुक्तदोषापत्तेः।

ईश्वरस्त्वित्यादि—सुखसमवायिकारणतावच्छेदकतया सिद्धस्य आत्मत्वस्य जातेः सुखासमवायिनि परमात्मनि सत्त्वे मानाभावात् शक्यतावच्छेदकतया जातिसिद्धेरपसिद्धान्तत्वाच्च।

संख्यादीत्यादि—अत्र तादृशगुणशून्यत्वं प्रतियोगिव्यधिकरणतादृशगुणा-

त्यन्ताभाववत्त्वं विवक्षितम्, अन्यथा आद्यक्षणे सर्वस्यैव उत्पत्तिमतो द्रव्यस्य तादृशगुणशून्यत्वात् द्वितीयक्षणादौ च गुणवत्त्वादतिव्याप्तिप्रसङ्गात्। अथवा सतिसप्तम्याः सामानाधिकरण्यमर्थः, तच्च प्रकृते एकक्षणावच्छिन्नमेव एकाधिकरणवृत्तित्वरूपं वक्तव्यं, तेन संख्यादिपञ्चकान्यगुणात्यन्ताभावस्य एकक्षणावच्छेदेन एकस्मिन् अधिकरणे वर्त्तमानो यो गुणस्तद्वत्त्वमित्यर्थः। तथाच आद्यक्षणे संख्यादिपञ्चकान्यगुणवत् गुणान्तरस्यापि अभावात् नातिव्याप्तिः। दिशि काले च संख्यादिपञ्चकान्यगुणात्यन्ताभावक्षणावच्छिन्नवृत्तिः संख्यादिरेवेति लक्षणसमन्वयः।

कार्य्यसामान्येत्यादि—तथाहि कार्य्यत्वावच्छिन्नं प्रति कालत्वेन दिक्त्वेन च कारणत्वात् कालत्वं दिक्त्वञ्च कार्य्यसामान्यजनकतावच्छेदकधर्म्मौ तद्वत्त्वात् विभुत्वाच्च कालदिशोर्लक्षणसमन्वयः। कार्य्यत्वावच्छिन्नं प्रति अदृष्टद्वारा आत्मत्वेन कारणत्वे मानाभावात् विभुत्वेऽपि नात्मन्यतिव्याप्तिः।

तेज इत्यादि—द्रवत्ववद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं जले अतिव्याप्तमतो द्रवत्वे तेजःसंयोगजेति विशेषणम्। तथाच जलस्य द्रवत्वं सांसिद्धिकमेव, न तेजःसंयोगजन्यमिति नातिव्याप्तिः।

अधिकरणविधयेत्यादि—तदुक्तमाचार्य्यैः—"अधिकरणतया तु सर्व्वोत्पत्तिमन्निमित्तत्वं विवक्षितम्। यथाहि दिक्कालोपाध्यधिकरणा सर्व्वोत्पत्तिः नैवमात्मोपाध्यधिकरणेति" इति।

सर्वेत्यादि—अत्रोदयनाचार्य्यास्तु 'एवमनेन न्यायेन सर्व्वत्र साधर्म्म्यं यत् तदेव विपर्य्ययाद् व्यावृत्तेर्वैधर्म्म्यं वैधर्म्म्यं, यत् तदेव विपर्य्ययादनुवृत्तेः साधर्म्म्य' मित्यादिकं व्याचक्षते। तद्विस्तरेण किरणावल्यामनुसन्धेयम्। यत्साधर्म्म्यमिति ज्ञेयत्वादिधर्म्मं विहायेति बोध्यं, ज्ञेयत्वादीनां कुत्रापि विपर्य्ययाभावादिति भावः।

ভাষ্যতাৎপর্য্য

ক্ষিতি, অপ্, তেজ, মরুৎ ও ব্যোম এই পঞ্চভূত ও আত্মার বিশেষগুণবত্ব সাধর্ম্ম্য। বৈশেষিক মতে রূপ, রস, গন্ধ, স্পর্শ, স্নেহ, স্বাভাবিক দ্রবত্ব, বুদ্ধি, সুখ, দুঃখ, ইচ্ছা; দ্বেষ যত্ন, ভাবনাখ্যসংস্কার ও শব্দ এই কয়টী গুণ বিশেষগুণ নামে

কথিত। তন্মধ্যে রূপ, রস, গন্ধ, স্পর্শ, স্নেহ, স্বাভাবিক দ্রবত্ব ও শব্দ ভিন্ন ভিন্ন ভূতের গুণ ও অবশিষ্ট কয়টী আত্মার গুণ।

ক্ষিতি, জল ও আত্মার চতুর্দ্দশগুণবত্ব সাধর্ম্ম্য। উক্ত চতুর্দ্দশগুণবত্ব সর্ব্বত্র একরূপ নহে। ক্ষিতির গন্ধ, রস, রূপ, স্পর্শ, দ্রবত্ব, গুরুত্ব, পরত্ব, অপরত্ব, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ. বিভাগ ও সংস্কার (বেগ ও স্থিতিস্থাপকাখ্য) রূপ ধর্ম্ম সাধর্ম্ম্য। জলের সাধর্ম্ম্য স্নেহ ও রস হইতে আরম্ভ করিয়া অপর ত্রয়োদশটী, সমষ্টিতে চতুর্দ্দশটী। আত্মার সাধর্ম্ম্য সংখ্যা হইতে আরম্ভ করিয়া ছয়টী ও বুদ্ধি, সুখ, দুঃখ, ইচ্ছা, দ্বেষ, যত্ন, ধর্ম্ম এবং অধর্ম্ম এই আটটী, সমষ্টিতে চতুর্দ্দশটী।

উক্ত স্থলে আত্মপদে কেবল জীবাত্মাই অভিপ্রেত। অতএব ঈশ্বরের ধর্ম্ম ও অধর্ম্ম প্রভৃতি না থাকিলেও অব্যাপ্তি হইল না। এই অভিপ্রায়েই প্রাচীন শাস্ত্রকারগণ বলিয়াছেন যে "জল, ক্ষিতি ও প্রাণীর চতুর্দ্দশটী গুণ"। প্রাণীপদে জীবাত্মাই পাওয়া যায়, কারণ ঈশ্বরের প্রাণসম্বন্ধ নাই। কেহ বলেন যে তেজোভিন্ন প্রত্যক্ষবৃত্তি দ্রব্যত্বাবান্তরজাতিমত্ত্বই উক্ত পদার্থের সাধর্ম্ম্য। ক্ষিতি, অপ্ ও তেজ এই তিনটী দ্রব্য বহিরিন্দ্রিয়জন্য প্রত্যক্ষের বিষয়, আত্মা মনোজন্য প্রত্যক্ষের বিষয়, অতএব প্রত্যক্ষবিষয় ক্ষিতি প্রভৃতিতে বর্ত্তমান ক্ষিতিত্ব প্রভৃতি দ্রব্যত্বের অবান্তরধর্ম্ম তত্ত্ব ক্ষিতি প্রভৃতিতে থাকায় লক্ষণসমন্বয় হইল। বায়ু প্রভৃতি প্রত্যক্ষের বিষয় নহে বলিয়া অতিব্যাপ্তি হইল না। তেজস্ত্ব প্রত্যক্ষবৃত্তি দ্রব্যত্বাবান্তর জাতি হইলেও তাহার আশ্রয় তেজ তেজোভিন্ন হয় নাই বলিয়া সত্যন্তভাগ দ্বারা উহার বারণ হইল।

এখন আপত্তি হইতেছে এই যে, প্রকৃত স্থলে আত্মা বলিতে কেবল জীবাত্মাকেই ধরা হইয়াছে, অথচ প্রত্যক্ষবৃত্তি দ্রব্যত্বের অবান্তর ধর্ম্ম আত্মত্ব পরমাত্মা বা ঈশ্বরে থাকায় এবং উহা তেজোভিন্ন হওয়ায় উহাতে অতিব্যাপ্তিপ্রসঙ্গ হয়। তাহার সমাধান এই যে, পরমাত্মায় আত্মত্ব জাতি থাকে না, কারণ আত্মত্ব সুখসমবায়িকারণতাবচ্ছেদক জাতিবিশেষ, যাহাতে সুখ উৎপন্ন হয়, তাহাতেই উক্ত জাতি থাকে। পরমাত্মায় সুখের হেতু ধর্ম্ম না থাকায় যখন সুখ জন্মে না, তখন তাহাতে আত্মত্ব জাতি আছে এবিষয় কোন প্রমাণ নাই। কাজেই ঈশ্বরে অতিব্যাপ্তি হইবে না।

আকাশ ও আত্মার ক্ষণিকৈকদেশবৃত্তিবিশেষগুণবত্ত্ব সাধর্ম্ম্য। ক্ষণিকৈক-

দেশবৃত্তিবিশেষগুণবত্ত্বপদের অর্থ—যে বিশেষ গুণ তিন ক্ষণকাল বর্ত্তমান থাকে না এবং স্বীয় ধ্বংসের সহিত এক অধিকরণে বর্ত্তমান হয় তাদৃশবিশেষগুণবত্ত্ব। কেবল স্বীয় ধ্বংসের সহিত একাধিকরণে বর্ত্তমান বিশেষগুণবত্ত্ব বলিলে পরমাণুর রূপ অগ্নিসংযোগে নষ্ট হওয়ায় উক্ত রূপের আশ্রয়ত্ব হেতু পরমাণুতে অতিব্যাপ্তি হয়। কিন্তু অংশান্তরের উপাদান করায় উক্ত রূপ তৃতীয়ক্ষণেও বর্ত্তমান হওয়ায় ক্ষণত্রয়াবৃত্তি হয় নাই বলিয়াই অতিব্যাপ্তি হইল না। ক্ষণত্রয়াবৃত্তিরূপাদিবিশিষ্ট দ্বিক্ষণমাত্রস্থায়ী ঘটাদিতে অতিব্যাপ্তি বারণের জন্য স্বীয় ধ্বংসের সহিত এক আশ্রয়ে বর্ত্তমান এই বিশেষণ দেওয়া হইয়াছে।

পরমাত্মার জ্ঞানাদির নাশ না থাকিলেও পরমাত্মা অলক্ষ্য বলিয়াই উহাতে অব্যাপ্তি হইল না। ভগবান্ উদয়নাচার্য্য বলেন যে, উক্ত স্থলে একটী সাধর্ম্ম্য নহে, কিন্তু দুইটী সাধর্ম্ম্য, একটী ক্ষণিকবিশেষগুণবত্ত্ব ও অপরটী অব্যাপ্যবৃত্তি-বিশেষগুণবত্ত্ব। উক্ত মত ন্যায্য নহে, কারণ যে ঘটাদি দ্রব্য দ্বিক্ষণমাত্র থাকিয়া তৃতীয় ক্ষণে বিনাশ প্রাপ্ত হয়, তাহার বিশেষগুণও ক্ষণান্তরেই নষ্ট হওয়ায় ক্ষণিক বিশেষগুণবত্ত্ব ও অব্যাপ্য-বৃত্তিবিশেষগুণবত্ত্ব অতিপ্রসক্ত হইয়া পড়ে, এই জন্যই পূর্ব্বোক্ত অর্থ আশ্রয় করা হয়।

দিক্ ও কালের সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ ও বিভাগ এই পঞ্চগুণবত্ত্ব-সাধর্ম্ম্য। উক্ত পঞ্চগুণবত্ত্বপদের অর্থ—সংখ্যাদিপঞ্চগুণভিন্নগুণাভাবসমানাধি-করণগুণবত্ত্ব। অর্থাৎ যে গুণের অধিকরণে উক্ত পঞ্চগুণভিন্ন রূপাদি থাকেনা তাদৃশগুণবত্ত্ব। উক্ত অর্থের অনুসরণ করায় পৃথিবীপ্রভৃতিতে পঞ্চগুণবত্ত্ব থাকিলেও পঞ্চগুণভিন্ন গন্ধাদিগুণের অভাব না থাকায় অতিব্যাপ্তি হইল না। উক্ত গুণাভাব প্রতিযোগিব্যধিকরণ বা উক্তগুণের অনধিকরণে বর্ত্তমান গুণাভাব বলিতে হইবে, অতএব আদ্যক্ষণে ঘটাদিতে গুণের অভাব থাকিলেও অতি-ব্যাপ্তি হইল না। কারণ ঘটাদিতে আদ্যক্ষণে গুণাভাব থাকিলেও পরক্ষণেই গুণ উৎপন্ন হওয়ায় উক্ত গুণাভাব প্রতিযোগিব্যধিকরণ নহে, পরন্তু প্রতিযোগি সমানাধিকরণ।

ঐরূপ সকল জন্যবস্তুর অধিকরণরূপে নিমিত্তকারণত্ব কাল এবং দিকের সাধর্ম্ম্য। আত্মা অদৃষ্ট দ্বারা সকল জন্যবস্তুর প্রতি কারণ হইলেও উহা অধিকরণ-রূপে কারণ নহে, এইজন্য অতিব্যাপ্তি হইল না। বাস্তবিক কার্য্যমাত্রের প্রতিই

অদৃষ্ট-দ্বারা আত্মার কারণত্ববিষয়ে বিশেষ কোনও প্রমাণ না থাকায় আত্মাতে অতিব্যাপ্তির প্রসঙ্গই নাই।

চকারদ্বারা বিশেষগুণশূন্যবিভুত্বপ্রভৃতির গ্রহণ করিয়া ঐ সকল ধর্ম্মকেও কাল ও দিকের সাধর্ম্ম্য বলা হয়। আকাশ, আত্মা, কাল ও দিক এই চারিটী বিভুপদার্থ, তন্মধ্যে প্রথম দুইটী বিশেষগুণযুক্ত ও অপর দুইটী বিশেষগুণশূন্য, অতএব কোনও দোষ নাই।

ক্ষিতি ও তেজ এই দুই পদার্থের নৈমিত্তিকদ্রবত্ববত্ত্ব সাধর্ম্ম্য। নৈমিত্তিক-দ্রবত্ববত্ত্বপদের অর্থ—তেজঃসংযোগজন্য দ্রবত্বের অধিকরণে বর্ত্তমান দ্রব্যত্বের অব্যাপকজাতিমত্ত্ব। উক্ত অর্থের অনুসরণ করায় ঘট ও বহ্ন্যাদিরূপ দ্রবত্বশূন্য ক্ষিতি ও তেজে অব্যাপ্তি হইল না। কারণ তেজঃসংযোগে যে ঘৃতাদির পরমাণুতে দ্রবত্ব উৎপন্ন হয়, তাহাতে বর্ত্তমান তেজস্ত্বজাতিপ্রভৃতি বহ্ন্যাদিতে থাকায় উক্তরূপ জাতিমত্ত্ব নিবন্ধন অব্যাপ্তি বারণ হইল।

এইরূপে লক্ষ্যপদার্থে যে সকল সাধর্ম্ম্য বলা হইল, উহাই লক্ষ্যপদার্থের ইতর হইতে ব্যাবৃত্তি হেতু বৈধর্ম্ম্যনামেও কথিত হয়। অতএব উক্ত ধর্ম্মসমূহ যেমন সাধর্ম্ম্য তেমনই বৈধর্ম্ম্য বলা যাইতে পারে। কিন্তু যে ধর্ম্ম যাহার সাধর্ম্ম্য তাহা তাহারই বৈধর্ম্ম্য বা বিরুদ্ধধর্ম্ম নহে।

प्रशस्तपादभाष्यम्।

इहेदानीमेकैकशो वैधर्म्म्यमुच्यते। पृथिवीत्वाभिसम्बन्धात् पृथिवी; रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः। चाक्षुषवचनात् सप्त संख्यादयः। पतनोपदेशाद् गुरुत्वम्। अद्भिः सामान्यवचनाद् द्रवत्वम्। उत्तरकर्म्मवचनात् संस्कार इति।

[रूपरसगन्धस्पर्शवती पृथिवी २अ—१अ—१सू। सर्पिर्जतुमधूच्छिष्टाना-मग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् २अ—१आ—६सू। संख्याः परि-माणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म्म च रूपिद्रव्यसमवायात् चाक्षुषाणि ४अ—१आ—११सू। इषावयुगपत् संयोगविशेषाः कर्म्मान्यत्वे हेतुः ५अ—१आ—१६ सू। नोदनादाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च ५अ—१आ—१७ सू। संस्काराभावे गुरुत्वात् पतनम् ५अ—१आ—१८ सू। संयोगाभावे गुरुत्वात् पतनम् ५अ—१आ—७ सू। व्यवस्थितः पृथिव्यां गन्धः २अ—२आ—२सू। नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्म ५अ—२आ—१सू। इत्येतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

इह पृथिव्यादिनवसु एकैकशः प्रत्येकं वैधर्म्म्यं इतरव्यावर्त्तकम्। ननु पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्याद्यनुमाने भूभाग एव यदि पृथिवीपदार्थः, तदा तदितरभेदकत्वं न गन्धवत्त्वादेः पटादौ व्यभि-चारादत आह पृथिवीत्वाभिसम्बन्धादिति। पृथिवीत्वं नाम जातिभेदः तस्याभिसम्बन्धः समवायः पृथिवीपत्त्व इति शेषः। न च तादृशजातौ मानाभावः गन्धसमवायिकारणतावच्छेदकत्वेन तत्सिद्धेः। अन्यथा गन्धजनकतेजःसंयोगात् परमाणाविव तेजस्यपि गन्धप्रसङ्गात्। विलक्षणसंयोगत्वेनैव गन्धं प्रति तस्य हेतुत्वादिति भावः।

रूपादिचतुर्णां पार्थिवत्वे मुनेः सम्मतिमाह एते इति। गुणविनि-वेशाधिकारे (१) के कस्य (२) गुणा इत्याकाङ्क्षायां द्वितीयाध्याये रूप-रसगन्धस्पर्शवती पृथिवीति सूत्रबलाद्रूपादयश्चत्वारः पृथिव्यां विशेषगुणा इत्यर्थः। रूपिषु संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि

---

(१) विशेषाधिकारे इति (ङ) पुस्तके पाठः।

(२) विशेषगुणा इति (ङ) पुस्तके पाठः।

चाक्षुषाणीति सूत्रेण रूपिमात्रे चाक्षुषसंख्यादिकथनात् संख्यादिसप्तकं पृथिव्यामित्यर्थः। पतनोपदेशादिति—गुरुत्वात् पतनमिति सूत्रेण गुरुत्वजन्यत्वेन पतनवत्त्वोपदेशात् क्षितौ गुरुत्वमित्यर्थः। अद्भिरिति—सर्पिरादीनां द्रवत्वं अद्भिः सामान्यमिति सूत्रेण घृतजतुप्रभृतीनां द्रवत्वं अद्भिः सामान्यं समानधर्म्म इत्युक्तम्, अतः पृथिव्यां द्रवत्वमित्यर्थः। उत्तरेति—नोदनादाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरमिति सूत्रेण संस्कारजकर्म्मकथनात् वेगाख्यः संस्कार इत्यर्थः।

सूक्तिदीपिका।

ननु अधस्तादेव यत् यस्य साधर्म्म्यं तदेव लक्ष्येतरव्यावृत्तत्वाद्वैधर्म्म्यमपीत्युक्त्वा प्रथमत एव कृतेऽपि वैधर्म्म्यकथनप्रस्तावे अत्र इहेदानीमिति विशेषनिर्द्देशो न सङ्गच्छत इति चेन्न, आदौ साधारण्येन वैधर्म्म्यमुक्तं, न तु एकैकशोऽपि, प्रकृते तु एकैकश एव वैधर्म्म्यं प्रतिज्ञायते, तस्य तु प्रागनुक्तत्वाददोष एवेति ध्येयम्।

पटादाविति—ननु पटादौ न गन्धवत्त्वं येन व्यभिचारः, यच्च नवपटादौ गन्धवत्त्वमुपलभ्यते, तदपि तदीयमेवेत्यप्रमाणम् तत्संसृष्टपार्थिवभागान्तरस्यैव तत्त्वादिति चेत्तस्यापि पार्थिवभागस्य प्रकृतभूभागभिन्नतया आदिपदग्राह्ये तस्मिन्नेव व्यभिचारस्य शक्योपपादनत्वात्। अथवा पटादिदाहे पटादिभस्मनि गन्धवत्त्वोपलब्धेः उपादानगुणविशेषमन्तरेण उपादेयगुणविशेषाभावात् पटादौ तद्भस्मोपादाने गन्धवत्त्वमनुमेयम्। तद्भस्मादेः पटोपादानकत्वञ्च यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमित्याद्यनुमानबलात् सिध्येदिति समासः।

तस्याभिसम्बन्ध इति—ननु पृथिवीत्वस्य अभिसम्बन्धाद् यदि पृथिवीत्वं तदा एकार्थसमवायादिसम्बन्धेन रूपादावपि पृथिवीत्वस्य सत्त्वेन व्यभिचारो दुर्णिवार इत्यत आह समवाय इति। तथाहि पृथिवीत्वप्रतियोगिकसमवायवत्त्वमेव प्रकृते वैधर्म्म्यं, समवायस्तु शुद्ध एव ग्राह्यस्तेन एकार्थसमवायादेरपि

समवायत्वमभ्युपगच्छतां न क्षतिः। अत एवाचार्य्याः 'पृथिवीत्वं नाम सामान्यविशेषः, तेनाभिमतः सम्बन्धः समवायलक्षणः तस्मात्। नत्वेकार्थसमवायसंयुक्तसमवायादेरित्यर्थः।' इत्याहुः।

गन्धसमवायीत्यादि—गन्धसमवायिकारणता किञ्चिद्धर्म्मावच्छिन्ना कारणतात्वात् दण्डत्वाद्यवच्छिन्नघटकारणतादिवत् धर्म्मस्य जातित्वे लाघवमिति लाघवज्ञानञ्च जातित्वसिद्धौ सहकारि।

दिनकरभट्टास्तु—इदमुपलक्षणम्, रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिर्द्रष्टव्या प्रतियोगितासम्बन्धेन आश्रयनाशाजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्व-स्ववृत्तिरूपत्वोभयसम्बन्धेन विलक्षणतेजःसंयोगत्वेन हेतुत्वात् पृथिवीत्वस्य तादृशनाशकतावच्छेदकसम्बन्धघटकत्वात्।

परे तु उपलक्षणया पृथिवीपदशक्यतावच्छेदकत्वमपि पृथिवीत्वस्य जातित्वसाधकमङ्गीकुर्व्वते, असति बाधके शक्यतावच्छेदकत्वस्य जातित्वसाधकत्वादिति तन्न शक्यतावच्छेदकत्वस्य जातित्वसाधकतायां मानाभावात्।

पृथिव्यां द्रवत्वमिति नैमित्तिकद्रवत्वमित्यर्थः। वैधर्म्म्यत्वरक्षणाय द्रवत्वे गन्धसामानाधिकरण्यं निवेश्यं गन्धसमानाधिकरणद्रवत्ववद्वृत्तिद्रव्यत्वाव्यापकजातिरूपनिष्कृष्टार्थो वा वाच्यः। रूपादेः प्रत्येकं वैधर्म्म्यत्वस्य व्यवस्थापनीयत्वे सर्व्वत्रैव तादृशार्थोऽनुसर्त्तव्य इति उपरिष्टात् व्यक्तीभविष्यति।

ভাষ্যতাৎপর্য্য

ইতঃপূর্ব্বে দ্রব্যাদি পদার্থের সাধর্ম্ম্য এবং তদিতরের বৈধর্ম্ম্য বলা হইয়াছে, পৃথক্‌রূপে পৃথিবী প্রভৃতির ইতরব্যাবর্ত্তক ধর্ম্মের উল্লেখ করা হয় নাই, সম্প্রতি পৃথিব্যাদি এক একটী দ্রব্যের পৃথক্ পৃথক্ রূপে ইতরব্যাবর্ত্তক ধর্ম্মের কথা বলা হইতেছে।

যাহাতে পৃথিবীত্বের সমবায় থাকে তাহা পৃথিবীই। পৃথিবীভিন্ন অপর পদার্থে পৃথিবীত্বের সমবায় বা সমবায়সম্বন্ধে পৃথিবীত্ব থাকে না, কাজেই উহা ইতরব্যাবর্ত্তক ধর্ম্ম।

পৃথিবীশব্দে যদি কেবল ভূভাগ হয়, তবে গন্ধবত্ত্বহেতু দ্বারা পৃথিবীতে ইতর-

ভেদ সাধন করা যায় না, কারণ গন্ধবত্ত্ব ভূভাগভিন্ন অপর পদার্থেও থাকে বলিয়া ঐ হেতুতে ব্যভিচার দোষ থাকে, এই জন্য পৃথিবীত্বের সম্বন্ধ সমবায় হেতু করা হইয়াছে। গন্ধের সমবায়িকারণতাবচ্ছেদক ধর্ম্মরূপে পৃথিবীত্ব জাতি সিদ্ধ হয়। পৃথিবীত্বকে গন্ধের সমবায়িকারণতাবচ্ছেদক না বলিলে পৃথিবীভিন্ন অপর পদার্থে গন্ধের উৎপত্তির প্রসঙ্গ বারণ করা যায় না। পৃথিবীতে রূপ, রস, গন্ধ, স্পর্শ, সংখ্যা, পরিমাণ, পৃথকৃত্ব, সংযোগ, বিভাগ, পরত্ব, অপরত্ব, গুরুত্ব, দ্রবত্ব, ও সংস্কার অর্থাৎ বেগাখ্য সংস্কার থাকে। ঐ সকল গুণকে পৃথিবীর-ইতরব্যাবর্ত্তক বলিতে হইলে রূপাদি গুণাংশে গন্ধসামানাধিকরণ্য বা পৃথিবীত্ব-সামানাধিকরণ্য নিবেশ করিতে হইবে। কেহ কেহ বৈধর্ম্ম্য রক্ষা করিবার জন্য প্রত্যেক গুণ আদান করিয়া গন্ধসমানাধিকরণরূপবদ্‌বৃত্তি দ্রব্যত্বাব্যাপক জাতিমত্ত্ব প্রভৃতি অর্থ করিয়া থাকেন। বৈশেষিকদর্শনের গুণপ্রকরণে উক্ত রূপাদিগুণবিশেষের সিদ্ধি করা হইয়াছে। সূত্রে রূপবদ্‌বস্তুতে সংখ্যাদি সপ্তগুণের নির্দ্দেশ করা হইয়াছে। গুরুত্বযুক্ত বস্তুই অধোভাগে পতিত হয়, এইজন্য পতনের প্রতি গুরুত্ব কারণ বলিয়া পৃথিবীর পতন বলাতেই উহাতে গুরুত্বের লাভ হইয়াছে। ঘৃতজতুপ্রভৃতি পদার্থে তেজঃসংযোগ হেতু দ্রবত্ব হয় বলিয়া পৃথিবীতে দ্রবত্ব উপদিষ্ট হইয়াছে। পৃথিবীতে বেগাখ্য সংস্কারও আছে, কারণ দেখা যায় যে, প্রথমতঃ বাণ প্রভৃতি ক্ষেপ করিলে বাণাদিতে যে বেগ জন্মে, তদ্‌বশতই তাহাতে উত্তরোত্তর ক্রিয়া উৎপন্ন হইতে থাকে, যখন তাহার বেগ নষ্ট হয়, তখন আর উহাতে ক্রিয়া জন্মে না। সর্ব্বত্রই পৃথিবীর ইতরব্যাবর্ত্তক ধর্ম্ম ধরিতে হইলে পূর্ব্বোক্ত প্রকারই আশ্রয় করিতে হইবে।

প্রশস্তপাদভাষ্যম্

ক্ষিতাবেব গন্ধঃ। রূপমনেকপ্রকারকং শুক্লাদি। রসঃ ষড়্‌বিধো মধুরাদিঃ। গন্ধো দ্বিবিধঃ সুরভি-রসুরভিশ্চ। স্পর্শোঽনুষ্ণাশীতত্বে সতি পাকজঃ।

सा च द्विविधा नित्या चानित्या च। परमाणुलक्षणा नित्या, कार्य्यलक्षणा त्वनित्या। सा च स्थैर्य्याद्यवयव-सन्निवेशविशिष्टापरजातिबहुत्वोपेता शयनासनाद्य-नेकोपकारकरी च।

[पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम्—२अ—२आ—१सू। व्यवस्थितः पृथिव्यां गन्धः—२अ—२आ—२सू। कारण-गुणपूर्व्वकाः पृथिव्यां पाकजाः—७अ—१आ—६सू। सदकारणवन्नित्यम्—४अ—१आ—१सू। तस्य कार्य्यं लिङ्गम्—४अ—१आ—२सू। कारणभावात् कार्य्यभावः—४अ—१आ—३सू। अनित्य इति विशेषतः प्रतिषेधभावः—४अ—१आ—४सू। अविद्या—४अ—१आ—५सू। नित्यं परिमण्डलम्—७अ—१आ—२०सू। अविद्या च विद्यालिङ्गम्—७अ—१आ—२१सू। इत्येतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

ननु सुगन्धि सलिलमित्याद्यनुभवाद् गन्धवत्त्वं जलादावप्यस्तीति न तस्य पृथिवीतरभेदकत्वमत आह क्षितावेवेति। जलादेः कुसुमादि-सम्पर्कादौपाधिकगन्धवत्त्वं न तु स्वाभाविकमिति भावः। रूपमात्रं जलादावतिप्रसक्तत्वान्न क्षितेर्भेदकमत आह रूपमिति। शुक्लत्वाद्य-नेकप्रकारं शुक्लत्वाद्यवान्तरानेकजातिमद्रूपम् क्षितावेवेत्यनुषज्यते। तथाच शुक्लनीलपीतरक्ताद्येकैकरूपवत्त्वं तादृशप्रत्येकरूपवद्वृत्ति-द्रव्यत्वाव्यापकजातिमत्त्वं वा साधर्म्यमित्यर्थः। न च शुक्लरूपवत्त्व-गर्भनिरुक्तेस्तोये तेजसि चातिव्याप्तिस्तत्र पाकजत्वेन शुक्लरूपस्य विशेषणीयत्वादिति भावः। रसवत्त्वमपि जले गतमत आह मधुरादि-रिति। मधुरतिक्ताम्लकटुकषायलवणभेदेन षड्विधो रसः क्षितावेव।

तथाच मधुरादिप्रत्येकरसवत्त्वं तादृशप्रत्येकरसवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वं वा साधर्म्यम्। अत्रापि माधुर्य्यं पाकजं ग्राह्यम् अतो जले नातिप्रसङ्गः। क्षारस्तु रसो लवणप्रभेद एवेति न षड्विधत्वव्याघातः।

ननु सौरभासौरभयोरपि गुणान्तरयोः पृथिव्यां सत्त्वात् रूपादिचतुर्द्दशमात्रोक्तौ न्यूनत्वमत आह गन्धो द्विविध इति। गन्ध एव द्विविध इत्यर्थः। असुरभिः सुरभ्यन्यो गन्धस्तेन दुर्गन्धभिन्नस्य चित्रगन्धस्य सत्त्वेऽपि न द्वैविध्यव्याघातः।

ननु स्पर्शवत्त्वं जलादिविवेके अतिव्याप्तत्वान्न पृथिव्या भेदकमत आह स्पर्श इति। अस्याः पृथिव्याः स्पर्शोऽनुष्णाशीतत्वे सति पाकजः पाकप्रयोज्यः। तथाच पाकप्रयोज्यानुष्णाशीतस्पर्शवत्त्वं साधर्म्यम्। तत्र वायोर्वारणाय प्रयोज्यान्तम्। घटादौ पाकजस्पर्शस्य असत्त्वेऽपि परम्परया तत्प्रयोज्यस्पर्शसत्त्वात् नाव्याप्तिः। सुवर्णादौ पाकप्रयोज्यस्पर्शसत्त्वात् तद्वारणाय अनुष्णाशीतेति। अनुष्णाशीतत्वन्तु स्पर्शत्वावान्तरजातिप्रभेदः पृथिवीवाय्वोः (१) स्पर्शवृत्तिरेवात्र घटक इति भावः।

पाकप्रयोज्यस्पर्शवत्त्वमात्रं लक्षणं अनुष्णाशीतत्वे सतीति शीतोष्णभिन्नस्य स्पर्शस्य सत्त्वसूचनार्थमित्याचार्य्याः। यद्यपि संख्यापरिमाणादीनां नवानामपि द्रव्यान्तरवृत्तित्वात् न केवलानां पृथिवीतरभेदकत्वं तथापि गन्धवत्त्वविशेषितस्यैव तेषां प्रत्येकस्य तथात्वसम्भवात् न तानि विवेचितानीति ध्येयम्।

ननु पृथिवी न स्पर्शवती नित्यमात्रवृत्तिजातिमत्त्वादात्मवदिति क्षितेर्निःस्पर्शत्वसिद्धौ पाकजस्पर्शवत्त्वं कुतः साधर्म्यमत आह सा चेति। तथाच उक्तहेतोः स्वरूपासिद्धत्वान्न निःस्पर्शत्वसिद्धिरिति भावः।

(१) वातयोरिति (ङ) पुस्तके पाठः।

तत्र नित्यानित्ययोर्मध्ये परमाणुलक्षणा परमाणुस्वरूपा । न च तत्र प्रमाणाभावः, त्रुटिः सावयवद्रव्यारब्धा चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन द्व्यणुकस्येव परमाणोरपि सिद्धेरित्याचार्य्याः । उक्तहेतोरप्रयोजकत्वादन्यथा तत एव त्रुटेरवयवपरम्पराया अपि सिद्धिप्रसङ्गात् त्रसरेणुर्नावयवजन्यः, किन्तु नित्य एव, तत्रैव चात्यन्तापकृष्टमहत्त्वप्रयुक्तः परमाणुत्वव्यपदेश इति तु स्वतन्त्राः ।

कार्य्यलक्षणा त्विति—न च संस्थानविशेषविशिष्टैः परमाणुपुञ्जैरेव द्व्यणुकादिघटादिप्रतीत्युपपत्तौ कार्य्यद्रव्ये प्रमाणाभावः परमाणूनां महत्त्वविरहेण संस्थानविशेषावच्छिन्नस्यापि तस्य प्रत्यक्षानुपपत्तेरिति भावः । महत्त्वं न परिमाणान्तरं, किन्तु विलक्षणसंस्थानवत्त्वमेव, तदेव द्रव्यप्रत्यक्षतायां प्रयोजकमतः प्रत्येकं परमाणोरप्रत्यक्षत्वेऽपि संस्थानप्रभेदावच्छिन्नस्य प्रत्यक्षत्वं नानुपपन्नमिति नव्यबौद्धाः ।

सा कार्य्यलक्षणा । स्थैर्य्यं अनेकक्षणस्थायित्वम् । आदिना विष्टम्भकत्वधारकत्वाद्युपग्रहः । अवयवसन्निवेशः संस्थानगतवैलक्षण्यं तैर्विशिष्टेत्यर्थः । अपरेति पृथिवीत्वावान्तरघटत्वपटत्वाद्यनेकजातिमतीत्यर्थः । यद्यपि घटत्वपटत्वसमुदायवत्त्वमप्रसिद्धं घटत्वादिप्रत्येकजातिमत्त्वं घटादौ पटादौ पार्थिवद्व्यणुकादौ च अव्याप्तं, तथापि कार्य्यत्वे सति घटत्वपटत्वादिप्रत्येकवन्निष्ठद्रव्यत्वाव्यापकजातिमत्त्वे तात्पर्य्यम् । मूर्त्तत्वस्य जातित्वे तदन्या जातिर्निवेश्या, अतो न जलादिष्वतिप्रसङ्गः । शयनं शय्या आसनं पीठम् । आदिना मठमण्डपादि । तादृशानां बहूनां उपकाराणामिष्टहेतूनां कारिकेत्यर्थः ।

सूक्तिदीपिका

क्षितावेवेतीति—न तु तदितरजलादावित्यर्थः । तथाहि गन्धवत्त्वस्य पृथिवीतरजलाद्यवृत्तित्वेन व्यभिचाराभावात् सम्भवत्येव पृथिवीतरभेदकत्व-

मिति भावः। अथैवं सुगन्धि सलिलमित्याद्यनुभवस्य का गतिरित्यत आह जलादेरित्यादि। शुक्लत्वाद्यवान्तरेति—शुक्लत्वादिस्वरूप-रूपत्वावान्तरेत्यर्थः। एकैकरूपवत्त्वमिति—शुक्लरूपवत्त्वं नीलरूपवत्त्वमित्यादिरूपेणेत्यर्थः। तादृश-प्रत्येकरूपेत्यादौ प्रत्येकपदेनापि विशिष्य विशिष्य शुक्लाद्येकैकपरिग्रहेण शुक्ल-रूपवद्वृत्तिद्रव्यत्वाव्यापकजातिमत्त्वमित्यादिरूपं साधर्म्यं वाच्यम्। तोये तेजसि चेति—तोये अभास्वरशुक्लस्य तेजसि च भास्वरशुक्लस्य सत्त्वेन तोयत्वं तेजस्त्वञ्च शुक्लरूपवद्वृत्तिद्रव्यत्वाव्यापकजातिरिति तद्वत्त्वादतिव्याप्तिसङ्गतिः। पृथिवीगतशुक्लरूपस्य पाकजत्वात् तोयतेजसोः शुक्लरूपस्य च अपाकजत्वात् सिद्धान्ते नातिव्याप्तिरिति भावः। साधर्म्यघटकीभूतं रूपवत्त्ववृत्तित्वादिकं निखिलमेव समवायसम्बन्धेन विवक्षणीयम्, तेन कालिकादिसम्बन्धमादाय नातिप्रसङ्गतादवस्थ्यम्। एवमग्रेऽपि बोध्यम्।

चित्रगन्धस्येत्यादि—सुरभिणा असुरभिणा च अवयवेन समारब्धस्य द्रव्यस्य कारणयोः परस्परं प्रतिपक्षतया सौरभासौरभ्ययोरेकतरस्य उत्पादासम्भवात् तादृशोभयावयववृत्तिगन्धद्वयस्य सम्भूय चित्रगन्धजनकत्वमेके प्रतिपादयन्ति। तेषामवयविनि सुरभ्यसुरभ्यंशद्वयारब्धे गन्धवत्ताप्रतीतिर्न भ्रमः, चित्रगन्धस्यैव तत्र सत्त्वेन तद्विशेष्यकगन्धप्रकारकविज्ञानस्य तत्र प्रमात्वात्। अन्ये तु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये कारणयोरन्योन्यप्रतिपक्षतया गन्धो नोत्पद्यते, तत्र गन्धानुभूतिस्तु अवयवगन्धविषयिणी, अतोऽवयविनि गन्धप्रतीति-र्भ्रम एवेति। तदुभयमतसंग्रहाय एव असुरभिरित्यस्य सुरभ्यन्य इत्यर्थो जगदीशेनोक्तः। चित्ररूपन्तु विविधरूपसमवाय्यनेका-वयवारब्धे सुतरामङ्गी-क्रियते, न च तत्रापि तावदङ्गिनि रूपं मास्तु अवयवरूपप्रतीत्यैव रूप-प्रतीतेः शक्योपपादनत्वादिति वाच्यम् अवयविनश्चित्ररूपवत्तया अभिमतस्य रूपवत्त्वानङ्गीकारे चाक्षुषत्वासम्भवात् द्रव्यचाक्षुषप्रत्यक्षे उद्भूतरूपवत्त्वस्य कारणतायाः शास्त्रसिद्धान्तितत्वात्। न च तत्र उद्भूतरूपवत्त्वस्य समवायेन कारणत्वमनङ्गीकृत्य स्वाश्रयसमवेतत्वसम्बन्धेन तत्कल्पने न क्षतिरिति वाच्यं समवायापेक्षया स्वाश्रयसमवेतत्वस्य गौरवग्रस्ततया समवायसम्बन्धमपहाय तत्र कारणतावच्छेदकत्वकल्पनस्या शक्यत्वात्।

अनुष्णाशीतत्वन्त्विति—केचित्तु शैत्यमेव तैजसेनोष्णस्पर्शेन अभिभूतम्

श्रोष्णाश्च जलीयशीतस्पर्शेनाभिभूतमनुष्णाशीतत्वेन गृह्यते, न तु अनुष्णाशीत इति संज्ञितः कोऽपि विजातीयः स्पर्शो नाम इत्याहुः ; तन्न बलवत्सजातीयग्रहणकृताग्रहणपर्य्यवसितस्य अभिभवस्य प्रकृते स्वीकारे अभिभावकतया निरुक्तस्यापरस्याग्रहणं नोपपद्यते, वस्तुतस्तत्र न शीतो नाप्युष्णः स्पर्शो विज्ञायते यदा, तदा स्पर्शस्यैवानुपलब्धिप्रसङ्गः, समुपलभ्यते च शुष्कस्यापि पार्थिवस्य शीतोष्णस्पर्शशून्यस्य स्पर्शः प्रत्यक्षेणेति भावः।

आचार्य्या इति—श्रीधराचार्य्याः, तदुक्तं तैरेव न्यायकन्दलीग्रन्थे 'पाकजः स्पर्शः पृथिव्या वैधर्म्म्यं, तस्य स्वरूपकथनमनुष्णाशीत इति' इति। वस्तुतस्तु आचार्य्यमतं न सम्यक् पाकजस्पर्शवत्त्वमात्रस्य प्रकृतलक्षणत्वासम्भवात् सुवर्णादावपि पाकजस्पर्शस्य सत्त्वेन व्यभिचारादित्युक्तमधस्ताज्जगदीशेन। उदयनाचार्य्या अपि 'पाकजस्पर्शवती पृथिवीति लक्षणार्थः' इत्याहुः, तत्रापि निरुक्तदोषोऽनुसन्धातव्यः। सत्यपि गन्धरूपरसानां पाकजत्वे तस्य स्फुटत्वादनुपदेशः। अत एवोक्तं किरणावल्यां 'अत्र गन्धरूपरसानां पाकजत्वं सदपि स्फुटत्वान्नोक्तं, स्पर्शस्य तु तथात्वे विप्रतिपत्तिः, नहि गन्धादिवद् विशेषतः स्पर्शः पाकस्यान्वयव्यतिरेकावनुसंविधत्ते'। इत्याद्याहुः।

गन्धवत्त्वविशेषितस्यैवेत्यादि—सामानाधिकरण्यसम्बन्धेन गन्धविशिष्टस्येति तदर्थः। तथा च पार्थिवसंख्यादेरेव सामानाधिकरण्येन गन्धविशिष्टतया तदितरभेदकत्वं नासङ्गतम्। न च पृथिवीजलवृत्तिद्वित्वादीनामपि पार्थिवसंख्यात्वात् पृथिव्यन्तर्भावेण गन्धविशिष्टत्वाच्च तद्वत्त्वं जलादौ व्यभिचारीति कथं गन्धविशिष्टसंख्यादीनामपि इतरभेदकत्वमिति वाच्यं विशिष्टस्य केवलादवैलक्षण्येऽपि विशिष्टनिरूपिताधिकरणत्वस्य वैलक्षण्यात् गन्धविशिष्टसंख्याद्यधिकरणत्वस्यैव तादृशेतरभेदकतायां तात्पर्य्यादिति ध्येयम्।

स्वरूपासिद्धत्वादिति—पक्षवृत्तिभेदप्रतियोगितावच्छेदकत्वादिति पक्षतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकवत्त्वादिति वा अर्थः। तेन पर्वतादौ पक्षे गगनादिना वह्न्यादिसाधने न स्वरूपासिद्धत्वव्याघातः। नापि पर्व्वतो वह्निमान् धूमादित्यादौ विशिष्टाभावोभयाभावादिकमादाय सद्धेतावतिप्रसङ्ग इत्यादिकमूह्यम्।

प्रत्यक्षानुपपत्तेरिति—द्रव्यप्रत्यक्षे समवायेन द्रव्यवृत्तिक्रियागुणादिप्रत्यक्षे

स्वाश्रयसमवायेन द्रव्यगतगुणक्रियावृत्तिजातिप्रत्यक्षे स्वाश्रयसमवेतसमवायादिना च महत्त्वस्य हेतुतया परमाणुप्रत्यक्षासम्भवादिति। तस्येत्युपलक्षणम्, तद्गतगुणक्रियाजात्यादीनामपि तथैव प्रत्यक्षानुपपत्तिरनुसन्धेया।

ननु स्थैर्य्यं यदि नित्यत्वं, तदा अनित्यायास्तस्या नित्यत्वबाधादसङ्गतिः। यदि ध्वंसाप्रतियोगित्वं अनित्यत्वञ्च प्रागभावप्रतियोगित्वलक्षणमेव प्रकृते निरुच्यते, तदाप्यसम्भवः प्रागभावप्रतियोगिभावमात्रस्यैव ध्वंसप्रतियोगितया प्रागभावप्रतियोगिन्याः पृथिव्याः तादृशनित्यत्वासम्भवादित्यत आह अनेकेत्यादि। बहुक्षणाधिकरणकत्वं—स्ववृत्तित्व स्वप्रतियोगिकभेदाधिकरणक्षणवृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वमिति वा तदर्थः।

कार्य्यत्व इत्यादि—घटत्वादिप्रत्येकसमानाधिकरणद्रव्यत्वन्यूनवृत्तेः पृथिवीत्वस्य नित्यपृथिवीसाधारणतया अतिव्याप्तिवारणाय सत्यन्तम्। घटत्वादिप्रत्येकवत्त्वं निष्ठत्वं जातिमत्त्वञ्च समवायेनैव विवक्षणीयम्, अन्यथा कालिकसम्बन्धादिकमादाय अतिप्रसङ्गतादवस्थ्यात्।

मूर्त्तत्वस्येत्यादि—साङ्कर्य्यस्य जातिबाधकत्वानङ्गीकारेणेत्यादिः। तथा च मूर्त्तत्वस्य क्षिताविव जलादावपि वर्त्तमानतया तादृशन्यूनवृत्तिजातितया च अतिप्रसङ्गः सङ्गच्छते। मूर्त्तत्वस्येत्युपलक्षणम् भूतत्वस्येत्यपि बोध्यम्। तदन्येति भूतत्वमूर्त्तत्वभिन्नेत्यर्थः। अन्यथा मूर्त्तत्वभिन्नत्वस्य जातिविशेषणत्वपक्षेऽपि भूतत्वमादाय तथैव जलादावतिप्रसङ्गापातादिति।

ভাষ্যতাৎপর্য্য

গন্ধ গুণ পৃথিবীতেই থাকে, জলাদিতে থাকে না, কাজেই গন্ধ গুণ দ্বারা পৃথিবীতে পৃথিবীতর পদার্থের ভেদ সাধন করা যায়। জল বা বায়ুতে যে সুগন্ধ বা দুর্গন্ধের প্রতীতি হয়, উহা জল বা বায়ুর স্বাভাবিক ধর্ম্ম নহে। জল বা বায়ুতে যে পুষ্পাদি পার্থিব পদার্থের সূক্ষ্ম সূক্ষ্ম ভাগ গুলি সংযুক্ত হয়, উহা তাহারই গন্ধ, জলাদির নহে, অতএব ব্যভিচার দোষের সম্ভাবনা নাই। রূপ পৃথিবীর ধর্ম্ম হইলেও কেবল রূপবত্ত্ব দ্বারা পৃথিবীতে ইতরভেদ সাধন করা যায় না, কারণ জল ও তেজঃপদার্থেও রূপ থাকায় উক্ত হেতু ব্যভিচারদোষগ্রস্ত। শুক্লাদি অনেক

প্রকার রূপকেই পৃথিবীর ইতর ভেদের সাধক বলিতে হইবে। শুক্লাদি বহুপ্রকার রূপ পৃথিবী ভিন্ন অপর দ্রব্যে থাকে না। কারণ জলে একমাত্র অভাস্বর শুক্লরূপ ও তেজে একমাত্র ভাস্বর শুক্লরূপ আছে। কোনও কোনও জল ও কোনও তেজে যে বর্ণান্তরের উপলব্ধি হয়, উহা পার্থিব বস্তুর সম্পর্কেই হইয়া থাকে, এই জন্য অন্বয় ও ব্যতিরেক নিবন্ধন উহা পৃথিবীর রূপ বলিয়াই নিশ্চিত হইয়া থাকে।

যদিও সকল পৃথিবীতেই শুক্লাদি সর্ব্ব প্রকার রূপ সম্ভব হয় না বলিয়া অব্যাপ্তি বারণের জন্য শুক্লাদি প্রত্যেক রূপবত্ত্বই উহার অর্থ করিয়া রূপসমান সংখ্যক সাধর্ম্ম্য বলিতে হইবে এবং তাহা হইলে জলের ও তেজের শুক্লরূপ গ্রহণ করিয়া জল ও তেজে অতিব্যাপ্তি বারণ অসম্ভব হয়, তথাপি শুক্লরূপ আদান করিয়া যে সাধর্ম্ম্য নির্ব্বাচন করা হইবে, তাহাতে রূপাংশে পাকজ বিশেষণ নিবেশ করিয়া উহার বারণ করিতে পারা যাইবে। জল ও তেজে শুক্ল রূপ থাকিলেও উক্ত রূপ পাকজ নহে, পৃথিবীর রূপ পাকজ অতএব দোষ হইল না।

পৃথিবীতে মধুর তিক্ত অম্ল কটু কষায় ও লবণ এই ষড়্বিধ রস থাকে, দ্রব্যান্তরে ষড়্বিধ রস থাকে না, অতএব ঐ ষড়্বিধ রস দ্বারাও পৃথিবীতে ইতর ভেদ সাধন করা যায়। উক্ত স্থলেও সকল পৃথিবীতেই ষড়্বিধ রস না থাকায় প্রত্যেক রস আদান করিয়া প্রত্যেক রসবত্ত্ব অর্থ করা হইয়া থাকে, অথবা মধুরাদি প্রত্যেক রসের অধিকরণে যে দ্রব্যত্বাব্যাপকজাতি থাকে তদ্বত্ত্বই উহার অর্থ। উক্ত অর্থেও জলে মধুর রস থাকায় মধুর রস দ্বারা যে সাধর্ম্ম্য কল্পনা করা হইল, তাহার জলে অতিব্যাপ্তি হয়, অতএব মধুর রস পাকজই গ্রহণ করিতে হইবে, অতএব পাকজ মধুর রসের অধিকরণে যে দ্রব্যত্বাব্যাপক জাতি থাকে তদ্বত্ত্বই উহার অর্থ করিয়া অতিব্যাপ্তি বারণ করা যায়। ক্ষার রস লবণ রসবিশেষ অতএব ক্ষার রস লইয়া রসের সংখ্যাধিক্য হইল না।

পৃথিবীতে সুরভি ও অসুরভি দ্বিবিধ গন্ধ থাকে। যাহারা চিত্র গন্ধ স্বীকার করেন, তাহাদের মতে অসুরভি শব্দে সুরভিভিন্ন গন্ধ এইরূপ অর্থ করায় অসুরভি পদেই চিত্র গন্ধ পাওয়া যায়, অতএব গন্ধের ত্রৈবিধ্য হইল না। যাহারা চিত্র গন্ধ স্বীকার করেন না, তাহারা অসুরভি পদে দুর্গন্ধ ধরিয়াই সমন্বয় করিতে পারেন। উক্ত মতে সুরভি ও অসুরভি দ্বিবিধ অবয়ব দ্বারা যে দ্রব্য নির্ম্মিত হইয়াছে, সেই দ্রব্যে কারণ দ্বয়ের তুল্যবলতাবশতঃ সুরভি বা অসুরভি গন্ধের একটী উৎপন্ন হইতে না

পারায় উভয় গন্ধের তুল্যভাবে চিত্রগন্ধজনকতাই স্বীকার করিতে হয়। অপর মতে উক্ত অবয়বীতে গন্ধ স্বীকার না করিয়া অবয়বের গন্ধ দ্বারাই গন্ধ প্রতীতির উপপত্তি করা হইয়া থাকে। দ্বিবিধ রূপবিশিষ্ট দুইটী বা ততোঽধিক রূপবিশিষ্ট ততোঽধিক অবয়ব দ্বারা আরব্ধ দ্রব্যে পরস্পর বিরোধিতা হেতু অবয়বগত যে কোনও একটী রূপের উৎপত্তি সম্ভব না হওয়ায় উক্ত জন্য দ্রব্যে চিত্ররূপ বলিয়া অতিরিক্ত জাতীয় একটী রূপ সকলকেই মানিতে হয়, কারণ উক্ত অবয়বীর যখন চাক্ষুষ প্রত্যক্ষ হইতেছে অথচ উদ্‌ভূতরূপ না থাকিলে দ্রব্যের চাক্ষুষ প্রত্যক্ষ হইতে পারে না, তখন উহা নিশ্চয়ই রূপবৎ, উক্ত রূপই অগত্যা চিত্ররূপ ইত্যাদি। পৃথিবীতে অনুষ্ণাশীত পাকজ স্পর্শ আছে, উহাও পৃথিবীতে ইতরভেদের সাধক। সুবর্ণাদিতেও পাকজ স্পর্শ থাকায় ব্যভিচার হয়, অতএব স্পর্শে অনুষ্ণাশীত বিশেষণ দেওয়া হইয়াছে। সুবর্ণাদি তেজঃপদার্থ বলিয়া উহার স্পর্শ উষ্ণ, পৃথিবী স্পর্শ দ্বারা অভিভূত থাকায়ই উহার উপলব্ধি হয় না।

বায়ুতেও অনুষ্ণাশীত স্পর্শ থাকায় বায়ুতে ব্যভিচার বারণের জন্য পাকজ বিশেষণ দেওয়া হইয়াছে। বায়ুতে যে অনুষ্ণাশীত স্পর্শ আছে, উহা পাকজ নহে। বায়ুতে যে উষ্ণ ও শীতস্পর্শের উপলব্ধি হয়, উহা জল ও তেজের সম্পর্কবশতই হইয়া থাকে, উহা বায়ুর নিজস্পর্শ নহে।

সংখ্যা ও পরিমাণাদি ধর্ম্ম ইতর বৃত্তি হইলেও গন্ধবিশিষ্ট সংখ্যা পরিমাণাদি পৃথিবীতে ইতরভেদের সাধক হইতে পারে, কারণ গন্ধ কেবল পৃথিবীতে থাকায় গন্ধের সহিত একযোগে সংখ্যাদি কেবল পৃথিবীরই ধর্ম্ম হইয়া থাকে।

উক্ত পৃথিবী নিত্য ও অনিত্য ভেদে দ্বিবিধ। পরমাণুরূপ পৃথিবী নিত্য ও কার্য্য অর্থাৎ পরমাণুভিন্ন দ্ব্যণুকাদিরূপ সকল পৃথিবীই অনিত্য। দুইটী পরমাণু মিলিত হইয়া একটী দ্ব্যণুক উৎপন্ন হয় আবার তিনটী দ্ব্যণুক মিলিত হইয়া একটী ত্রসরেণু বা ত্রুটি উৎপন্ন হয়। এইরূপে ক্রমে মহাপৃথিবী মহত্তর পৃথিবী ও মহত্তম পৃথিবী উৎপন্ন হইয়া থাকে, ইহার বিস্তৃত বিবরণ সৃষ্টিসংহারপ্রকরণে পাওয়া যাইবে। পরমাণু ও দ্ব্যণুকরূপ পৃথিবী প্রত্যক্ষ নহে, ত্রসরেণু হইতে প্রত্যক্ষ হইয়া থাকে। উক্ত ত্রসরেণু চাক্ষুষ দ্রব্য বলিয়া উহা সাবয়ব দ্রব্য দ্বারা রচিত এইরূপ অনুমান করায় ত্রসরেণুর কারণ দ্ব্যণুকেরও অবয়বরূপে একটী বস্তুর সিদ্ধি হওয়ায় পরমাণুর সিদ্ধি হয় অতএব পরমাণু অসিদ্ধ বলা যায় না।

বৌদ্ধগণ কেবলমাত্র পরমাণুই স্বীকার করেন তাহা হইতে উৎপন্ন অতিরিক্ত জন্য দ্রব্য অবয়বিরূপে স্বীকার করেন না, কিন্তু উক্ত মতে ঘটাদির প্রত্যক্ষ উপপন্ন হয় না, কারণ প্রত্যেকরূপে পরমাণুকে যখন তাহারাও প্রত্যক্ষ স্বীকার করিতে পারেন না, তখন উক্ত পরমাণু পুঞ্জীভূত হইলেও তাহাতে কোনওরূপ বৈলক্ষণ্য না হওয়ায় উহা কিরূপে প্রত্যক্ষ হইতে পারে। যে পরমাণুতে মহত্ত্ব নাই বলিয়া প্রত্যক্ষ হয় না, সেই পরমাণু পুঞ্জীভূত হইয়া দ্রব্যান্তররূপে পরিণত না হইলে উহাতে কি করিয়া মহত্ত্ব আসিবে। বৌদ্ধগণ সে স্থলে বলেন যে, মহত্ত্ব পরিমাণ-বিশেষ নহে, কিন্তু উহা বিলক্ষণ সংস্থানবিশিষ্টত্ব, অতএব পরমাণুসমূহ যখন পুঞ্জীভূত হয়, তখনই তাহাতে বিলক্ষণ সংস্থান হওয়ায় প্রত্যক্ষ হইতে পারে, কালান্তরে তাহাতে উক্ত সংস্থানবত্ত্ব না থাকায় প্রত্যক্ষ হয় না। বাস্তবিক মহত্ত্ব পরিমাণ বলিয়াই অনুভবসিদ্ধ, অতএব উক্ত মতে অনুভবের অপলাপ করিতে হয়। উক্ত পরমাণু যে নিত্য বলা হয়, তাহার কারণ এই যে যদি পরমাণুকেও জন্যদ্রব্য বলা যায়, তবে তাহারও কারণ রূপে একটী অবয়ব মানিতে হয়, আবার তাহারও জন্যত্ব স্বীকার করিলে তাহার কারণরূপেও আবার অবয়ব মানিতে হয়, এইরূপে কোনও স্থানে কল্পনার বিশ্রান্তি না হওয়ায় অনবস্থা দোষ ঘটে। এবং প্রত্যেক বস্তুরই অসংখ্য অবয়ব কারণ হওয়ায় কারণীভূত অবয়বের ন্যূনাধিক সংখ্যা থাকে না বলিয়া পর্ব্বত সর্ষপাদি সকল বস্তুরই তুল্য পরিমাণের প্রসঙ্গ হয়। আর পরমাণুকে নিত্য বলিয়া তাহাতেই বিশ্রাম হইলে অবয়বের ন্যূনাধিকসংখ্যা নিবন্ধনই উক্ত বস্তুসমূহের পরিমাণের পার্থক্য হইতে পারে। উক্ত কার্য্য পৃথিবী বা অনিত্য পৃথিবীতে স্থৈর্য্যাদি অর্থাৎ স্থিরতা বিষ্টম্ভকত্ব ধারকত্ব ও আকর্ষকত্ব প্রভৃতি ধর্ম্ম এবং অবয়বসন্নিবেশ অর্থাৎ সংস্থানগত বৈলক্ষণ্যযুক্ত পৃথিবীত্বের অবান্তর ধর্ম্ম ঘটত্বাদি জাতি থাকে। উক্ত জাতি দ্বারা ইতরভেদ সাধন করা যায়, কারণ নিত্য পৃথিবীতে পৃথিবীত্বের অবান্তর ধর্ম্ম ঘটত্বাদি থাকে না। যে মতে মূর্ত্তত্বাদিকে জাতি স্বীকার করা হয়, তন্মতে উক্ত জাতিতে মূর্ত্তত্বাদিভেদ নিবেশ করিতে হইবে। অতএব মূর্ত্তত্বাদি লইয়া জলাদিতে অতিব্যাপ্তি হইবে না। উক্ত জন্য পৃথিবী শয়ন আসনাদি বহুবিধ উপকারক বস্তু উৎপাদন করিয়া থাকে।

प्रशस्तपादभाष्यम्

त्रिविधञ्चास्याः कार्य्यं शरीरेन्द्रियविषयसंज्ञकम्। तत्र शरीरं द्विविधं योनिजमयोनिजञ्च। तत्रायोनिजमनपेक्ष्यशुक्रशोणितं देवर्षीणां शरीरं धर्म्मविशेषसहितेभ्योऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराणि अधर्म्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तत्तु द्विविधं जरायुजमण्डजञ्च। मानुषपशुपक्षिमृगाणां जरायुजं पक्षिसरीसृपाणामण्डजम्। इन्द्रियं गन्धव्यञ्जकं सर्व्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम्। विषयस्तु द्व्यणुकादिप्रक्रमेणारब्धस्त्रिविधः मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः प्राकारेष्टिकादयो मृद्विकाराः। पाषाणा उपलमणिवज्रादयः। स्थावरा वृक्षतृणौषधिगुल्मलतावतानवनस्पतय इति।

[तत् पुनः पृथिव्यादिकार्य्यं द्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम् ४अ—२आ—१सू। तत्र शरीरं द्विविधं योनिजमयोनिजञ्च—४अ—२आ—५सू। अनियतदिग्देशपूर्वकत्वात्—४अ—२आ—६सू। धर्म्मविशेषाच्च—४अ—२आ ७सू। समाख्याभावाच्च—४अ—२आ—८सू। संज्ञाया आदित्वात्—४अ—२आ—९सू। सन्त्ययोनिजाः—४अ—२आ—१०सू। वेदलिङ्गाच्च—४अ—२आ—११सू। भूयस्त्वात् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः—८अ—२आ ५सू। इत्येतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

तस्याः पृथिव्याः। कार्य्यं कार्य्यद्रव्यम्। षष्ठ्यर्थः समवेतत्वं नातो दारुप्रभृतीनां रूपादौ तज्जन्यवङ्क्यादौ वा प्रसङ्गः। शरीरेत्यादि —द्रव्यसमवाय्यवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं शरीरत्वं, तादृशी च जातिर्मनुष्यत्वगोत्वादिरूपा मृतदेहेऽप्यस्ति। वृक्षादीनान्तु चेष्टावत्त्वं नास्ति प्रमाणाभावात् प्रवृत्त्यादिलक्षणकारणबाधाच्च। भोगावच्छेदकवृत्तिद्रव्यसमवाय्यवृत्तिजातिमत्त्वरूपन्तु शरीरत्वं वृक्षादावतिप्रसक्तत्वान्न भाष्यकृतामभिप्रेतं वृक्षादेर्विषयप्रभेदत्वेन वक्ष्यमाणत्वात्।

स्मृत्यजनकज्ञानजनकमनोवृत्तिसंयोगाश्रयत्वमिन्द्रियत्वम्। सुषुप्त्यनुरोधेन त्वङ्मनोयोगस्य जन्यज्ञानसामान्यं प्रति हेतुत्वे तु स्मृत्यजनकत्वं विहाय आत्मवृत्तित्वं संयोगस्य विशेषणं वाच्यम्। व्यापारप्रत्यासत्त्या साक्षात्कारकारणत्वं वा इन्द्रियत्वम्। शरीरेन्द्रियभिन्नकार्य्यद्रव्यत्वं विषयत्वम्।

ननु शरीरं न पार्थिवं अयोनिजत्वात् सूर्य्यादिदेहवदिति शरीरत्वावच्छेदेन पार्थिवत्वाभावसाधनात् शरीरस्य पार्थिवत्वं बाधितम्, अत भागासिद्धिं वारयितुमाह शरीरं द्विविधमिति। योनिशब्दस्य कारणवाचित्वात् अयोनिजत्वं यदि कारणाजन्यत्वं तदा उक्तहेतोः स्वरूपासिद्धिरेव स्यात्, न तु भागासिद्धिरित्यन्यथा तन्निर्वक्ति तत्रायोनिजमिति। शुक्रशोणितसम्पर्काप्रभवत्वमेव अयोनिजत्वं, तच्च देवानामृषीणाञ्च शरीरे न स्वरूपासिद्धमिति। यद्यपि देवा ऋषयश्च शरीराण्येव, तथापि राहोः शिर इत्यत्रेव तादात्म्यं अवयवारभ्यत्वं वा षष्ठ्यर्थः। ननु शुक्रशोणिताप्रभवस्य यदि कारणाप्रभवत्वं स्यात्, तदा कारणसामान्याजन्य[त्व]मेव स्यात्, अतः कारणान्तरमेव दर्शयति धर्मविशेषसहितेभ्य इति तत्तद्देहावच्छेद्यभोगहेतुपुण्यसहकृतेभ्य इत्यर्थः।

अणुभ्यः पार्थिवपरमाणुभ्यः। प्रयोज्यत्वं पञ्चम्यर्थः। क्षुद्रजन्तूनां मशकादीनाम्। अत्रापि तादात्म्यादिकं षष्ठ्यर्थः। यातनाशरीराणीति—यातना दुःखं तन्मात्रावच्छेदकीभूतशरीराणीत्यर्थः। शुक्रशोणितयोः सन्निपातो मिलनं, तज्जनितं शरीरं योनिजमित्यर्थः। तच्च तदपि गर्भधारकं चर्मपुटकं जरायुः, ततो जातं जरायुजम्।

मानुषेति—यद्यपि मृगा अपि पशव एव तथापि गोवृषन्यायात् भेदेनोपन्यासः। पशुपदं ग्राम्यपशुपरं मृगपदमारण्यकपशुपरमतो भेद इत्याचार्य्याः। मृगाणामिति बहुवचनस्य गणसूचकत्वात् राक्षसादीनामपि संग्रहः। सरीसृपा वक्षःसर्पणशीलाः सर्पकीटसरटपल्लीमत्स्यप्रभृतयः। अत्र मानुषादिदेहस्य गन्धवत्त्वेन पृथिवीत्वसिद्धौ तस्य पाञ्चभौतिकत्वप्रसिद्धिर्भूतपञ्चकजन्यत्वप्रयुक्तैव, न तु तदुपादेयत्वप्रयुक्ता जातिसाङ्कर्य्यापत्तेः। शीतस्पर्शादेरौपाधिकत्वेन तत्र जलत्वासाधकत्वात् विजातीयानामनारम्भकत्वेन पञ्चभिर्मिलित्वा द्रव्यारम्भस्यासम्भवाच्चेति ध्येयम्।

पार्थिवमिन्द्रियमाह इन्द्रियमिति। सर्व्वप्राणिनां सर्व्वजातीयप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं गन्धव्यञ्जकमिन्द्रियं घ्राणं घ्राणसंज्ञकमित्यन्वयः। प्रतिनियतजलाद्यभिभूतनासिकानां पुंसां गन्धग्राहकेन्द्रियसत्त्वे प्रमाणाभावमावेदयितुं जलाद्यनभिभूतैरित्युक्तम्। न च घ्राणस्य पार्थिवत्वे प्रमाणाभावः, गन्धः स्वाश्रयजातीयकरणकानुभवग्राह्यः प्रतिनियतेन्द्रियग्राह्यशब्दान्यगुणत्वात् भास्वररूपवदित्यनुमानस्यैव प्रमाणत्वादिति भावः। अत्र अदृष्टविशेषजनिता नासिकैवास्तु घ्राणपदस्यार्थः, तत्सन्निकर्ष एव गन्धग्राहकोऽस्तु, गन्धानुभवोऽतीन्द्रियकरणको जन्यसाक्षात्कारत्वात् चाक्षुषवदित्यादेरप्रयोजकत्वादित्यूचानाः।

पार्थिवविषयं निर्व्वक्ति विषयस्त्विति। द्व्यणुकादीति—द्व्यणुकत्रस-

रेखादिक्रमेणारब्धः। पार्थिवावयवैरित्यनुषज्जनीयं, नातो जलादावतिप्रसङ्गः। पार्थिवावयवारभ्यत्वं तदीयरूपादावपि अतो द्रव्यत्वांशलाभाय द्व्यणुकादिक्रमेण इत्युक्तम्। द्व्यणुकादेर्लक्ष्यत्वलाभार्थञ्च तदभिधानम्।

यद्यपि अस्थ्यादिभेदेन चीरघृतदध्यादिभेदेन पत्रपुष्पफलमूलादिभेदेन च अनन्ता एव पार्थिवविषयाः, तथापि गोतमनये प्रमेयाणां द्वादशविधत्ववत् कतिपयानामेव पार्थिवविषयाणां कणादनये त्रैविध्यमित्याशयेनाह त्रिविधो मृत्पाषाणस्थावरलक्षण इति। मृत्त्वम् मृत्तिकात्वम्, पाषाणत्वम् प्रस्तरत्वम्, इमौ जातिभेदौ। स्थावरत्वन्तु क्षत्यवच्छेदकावृत्तिभोगावच्छेदकवृत्तिजातिमत्त्वम्। तादृशी च जातिः वृक्षत्वतृणत्वादिः। स्थावरत्वमपि वृक्षत्वतृणत्वादिव्यापकपृथिवीत्वव्याप्यजातिभेद इति त्वाचार्य्याः।

भूप्रदेशाः काश्यादयः। प्राकारः प्राचीरम्। इष्टका लोष्टम्। आदिना पिण्डिकाद्युपग्रहः। मृद्विकाराः मृदात्मकाः पृथिवीविकारा इत्यर्थः। के पाषाणा इत्यत्राह पाषाणा इति। उपलः शिला। मणिः पद्मरागादिः। वज्रं हीरकम्। आदिना गैरिकहरितालमनःशिलाद्युपग्रहः। के स्थावरा इत्यत्राह स्थावरा इति। वृक्षपदं पुष्पात् फलिवृक्षाम्रादिपरं, नातोऽग्रिमस्य वनस्पतिपदस्य वैयर्थ्यम्। तृणमुलपादि, ओषधिः फलपाकान्ता कदल्यादिगुल्माः प्रसिद्धाः। लता माधव्यादिकाः, अवतानाः केतक्यादयः, वनस्पतयः पुष्पं विना फलिनो वटाश्वत्थाद्याः। [पृथिवी]।

सूक्तिदीपिका

पृथिव्या लक्षणगुणादिकमुक्त्वा सम्प्रति तदवान्तरभेदानाह मूले त्रिविधश्चेत्यादिना। षष्ठार्थं इत्यादि—तथाहि अस्या इति षष्ठ्याः समवेतत्वार्थकतया

समवेतत्वस्य कार्य्येऽन्वयात् पृथिवीसमवेतकार्य्यद्रव्यमित्यर्थः। अत्र द्रव्यत्व-पर्य्यन्तानुसरणात् दार्व्वादिसमवेतरूपादौ समवेतत्वानुसरणात् दार्व्वादि-जन्यदार्व्वाद्यसमवेतवह्न्यादौ च नातिप्रसङ्गः।

शरीरलक्षणमाह द्रव्येत्यादि। अथ शरीरत्वजातेरेव प्रकृते लक्षणत्व-सम्भवे किमिति गुरुतरं शरीरलक्षणमनुस्रियत इति चेन्न पृथिवीत्वादिना साङ्कर्य्येण शरीरत्वे जातित्वबाधात्। तथाहि शरीरं पार्थिवं जलीयं तैजसं वायवीयञ्चेति चतुर्विधं भवति, तत्र सर्वत्रैवावश्यकशरीरत्वस्य अङ्गी-कर्त्तव्यतया शरीरत्वे पृथिवीत्वाभाववति जलादौ वृत्तित्वेन पृथिवीत्व-व्यभिचारस्य पार्थिवशरीरान्तर्भावेण पृथिवीत्वसामानाधिकरण्यस्य पृथिवीत्व-वद्घटादिवृत्त्यभावप्रतियोगित्वेन पृथिवीत्वाव्यापकत्वस्य च सत्त्वेन पृथिवीत्व-निरूपितसाङ्कर्य्यस्य सत्त्वात् न जातित्वमिति भावः। एवं जलत्वादिनिरू-पितसाङ्कर्य्यमप्यनुसन्धेयम्। एतद्विवृतिस्तु मदीयजातिबाधकविचारप्रकरणे द्रष्टव्या।

द्रव्येत्यादि—मनुष्यत्वगोत्वादयो हि जातयो मनुष्यगवादिवृत्तयः, मनुष्य-गवादीनाञ्च कुत्रापि द्रव्ये समवायित्वविरहेण चेष्टावत्त्वेन च ता एव जातयो द्रव्यसमवाय्यवृत्तिचेष्टावद्वृत्तय इति तज्जातिग्रहणेन मनुष्यगवादौ लक्षणसमन्वयः। चेष्टावद्वृत्तिजातिमत्त्वमात्रोक्तौ अवयवातिव्याप्तिरतः अवृत्त्यन्त विशेषणम्। गुणादावतिप्रसङ्गवारणाय चेष्टावद्वृत्तीति। अत्र वृत्तित्वद्वयं जातिमत्त्वञ्च समवायसम्बन्धेन, विवक्षणीयम् अन्यथा अव्याप्त्यति-व्याप्त्योः प्रसङ्गात्।

प्रवृत्त्यादीति—तथाहि चेष्टात्वावच्छिन्नं प्रति अवच्छेदकतासम्बन्धेन प्रयत्ना-परलक्षणायाः प्रवृत्तेः कारणतया तदभावादेव तत्र चेष्टाया अभाव इति भावः। ननु 'वृक्षगुल्मतृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववदि'त्यादि-कापिलप्रभृतिसिद्धान्ते जीवानामेव वृक्षादिशरीरग्रहणेन भोगनिरुक्तिर्विरुद्धा स्यादतस्तदनुगुणमेव लक्षणमुपादेयमित्याकाङ्क्षायामाह भोगावच्छेदकेत्यादि। तथाहि भाष्यव्याख्याने प्रवर्त्तमानेन नितरां भाष्यमतमेव प्रतिपालनीयमन्यथा मूलोच्छेदिपाण्डित्यप्रसङ्गात्। श्रीधराचार्य्यास्तु 'भोक्तुर्भोगायतनं शरीरं मृत-शरीरे तद्योग्यत्वात्तद्व्यपदेश' इत्याहुः।

इन्द्रियत्वं न जातिः पृथिवीत्वादिना साङ्कर्य्यादत आह स्मृत्यजनकेत्यादि। आत्मनि अतिव्याप्तिवारणाय स्मृत्यजनकेति। घटादावतिव्याप्तिवारणाय ज्ञानजनकेति। ज्ञानविषये अतिव्याप्तितादवस्थ्यमतो मनोवृत्तीति। 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्व'मिति विश्वनाथपादाः। 'शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रिय'मिति श्रीधराचार्य्याः। अनयोः प्रथमलक्षणस्य व्यावृत्तिः सिद्धान्तमुक्तावल्यादावनुसन्धेया। द्वितीये तु शरीराश्रितनखकेशादिद्रव्याणां तथात्वापत्तिवारणाय ज्ञातुरित्यादि साधनमित्यन्तम्। शरीरविषयकप्रत्यक्षे शरीरवृत्तीन्द्रियसंयोगस्यापि सन्निकर्षविधया ज्ञातुरपरोक्षप्रतीतिसाधनतया तत्रातिप्रसङ्गवारणाय द्रव्यमिति विशेष्यम्। ज्ञायमानलिङ्गस्यानुमितिहेतुतानये शरीराश्रितनखकेशादिरूपद्रव्याणामपि तद्धेतुकानुमितिरूपपरोक्षप्रतीतिसाधनतया तत्रातिप्रसङ्गभङ्गाय प्रतीतावपरोक्षेति। जन्यमात्रस्य कालोपाधितया कालवृत्तिकारणतामादाय तथैवातिप्रसङ्ग इति साधनत्वं जन्यत्वानवच्छिन्नकार्य्यतानिरूपितं वाच्यं, तेन कालवृत्तिकारणताया जन्यत्वावच्छिन्नकार्य्यतानिरूपितत्वेन न क्षतिः। अन्यत् स्वयमूहनीयम्।

सुषुप्त्यनुरोधेनेत्यादि—तथाहि सुषुप्तिदशायां वस्तुतो न किमपि ज्ञानं समुत्पद्यते, तदुपपादयितुं त्वङ्मनोयोगस्य ज्ञानसामान्यं प्रति हेतुता कल्पनीया, इत्थञ्च सुषुप्तिदशायां त्वचं त्यक्त्वा पुरीतति नाड्यां मनसः प्रवेशात् न तेन कस्यापि ज्ञानस्य कृतमानुकूल्यमिति। अन्ये तु चर्म्ममनःसंयोगो ज्ञानसामान्यहेतुः, न तु त्वङ्मनोयोगः, त्वङ्मनोयोगस्य तथात्वे चाक्षुषादिप्रत्यक्षदशायां नियमतस्त्वाचप्रत्यक्षस्यापि सामग्रीसम्बलनेन तत्र तत्र स्पार्शनस्यापि प्रसङ्गात् चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वस्य सर्व्वत्र वक्तव्यत्वापातादिति वदन्ति।

शरीरेन्द्रियेत्यादि—शरीरस्य इन्द्रियस्य च कार्य्यद्रव्यतया तयोरतिप्रसङ्गवारणाय भिन्नान्तम्। नित्यद्रव्यातिव्याप्तिवारणाय कार्य्येति। जन्यरूपादावतिव्याप्तिवारणाय द्रव्येति। 'शरीरेन्द्रियव्यतिरिक्तमात्मोपभोगसाधनं द्रव्यं विषय' इति श्रीधराचार्य्याः। 'प्रतीयमानतया भोगसाधनं विषय' इति च किरणावल्यामुदयनाचार्य्याः। प्रतीयमानतयेति ज्ञानविषयतयेत्यर्थः, तेन साक्षात्कारविषयताशून्यस्य वायोरपि न विषयलक्षणहानिः। अथवा

वायवीयस्पर्शस्य साक्षात्कारविषयतया तदाश्रयत्वेन उपचारादेव वायोर्विषय-त्वस्य उपपादयितुं शक्यत्वेन साक्षात्क्रियमाणार्थकत्वेऽपि न क्षतिरिति ।

नन्वित्यादि—अथ अयोनिजत्वस्य पार्थिवघटादौ पार्थिवत्वाभावव्यभि-चारितया शरीरे पार्थिवत्वाभावसाधकत्वं नोपपन्नमिति चेन्न शरीरत्वस्यापि हेतुघटकताया अभिप्रेतत्वात्। भागासिद्धिं वारयितुमिति-शरीरत्वाव-च्छेदेन पार्थिवत्वाभावसाधने योनिजशरीरस्यापि पक्षतया तत्र अयोनिज-शरीरत्वरूपहेतोरसत्त्वेन पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभाववत्त्व-रूपभागासिद्धिदोषनिराकरणायेत्यर्थः। तथाहि द्विविधशरीरानुगतस्य एकस्य शरीरत्वस्य असम्भवेन पक्षतावच्छेदकतायाः शरीरत्वमात्रे न सम्भव इति अयोनिजशरीरगतं योनिजशरीरगतं वा शरीरत्वं पक्षतावच्छेदकं कल्पनीयम्, तत्र योतिजशरीरगतशरीरत्वस्य तथात्वे स्वरूपासिद्धिरिति अयो-निजशरीरगतस्यैव शरीरत्वस्य तथात्वस्याङ्गीकृततया न भागासिद्धिरपीति भावः।

योनिशब्दस्येत्यादि—तथाहि जन्यपृथिव्या एव शरीरत्वादिना भेदकथनात् द्विविधस्यैव शरीरस्य कारणप्रभवत्वेन कारणाप्रभवत्वरूपायोनिजत्वस्य कुत्रापि शरीरे असम्भवेन स्वरूपासिद्धिरिति भावः।

तादात्म्यमित्यादि—ननु तादात्म्यमभेदः, षष्ठी च भेदसम्बन्धे विहिता, तदत्र कथं तदर्थे षष्ठीत्यत आह अवयवारभ्यत्वं वेति। स्वावयवारभ्यत्वस्य स्वस्मि-न्ननपायात् तत्सम्बन्धेन शरीरात्मकदेवादीनामपि शरीरसम्बन्धिता निराबाधैव इति भावः।

जातिसाङ्कर्य्यापत्तेरिति—तथाहि शरीरस्य पञ्चभूतोपादानकत्वे पार्थिव-शरीरादौ पृथिवीत्ववत् जलत्वादिकमपि समवहितम्, इत्यश्च पृथिवीत्वसामा-नाधिकरण्यस्य पार्थिवशरीराद्यन्तर्भावेण जलत्वादौ सत्त्वेन तदभावप्रयुक्त एव पृथिवीत्वनिरूपितसाङ्कर्य्याभावो जलत्वादौ न शक्यः सम्पादयितुं, तेन च जलत्वादौ जातित्वबाध आपद्येत। एकमात्रोपादानकत्वे च पार्थिवशरीरादौ जलत्वाद्यभावेन न क्षतिः। अत एव सिद्धान्तमुक्तावल्यां 'न च क्लेदोष्मादे-रुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्, तथा सति जलत्वस्य पृथिवी-त्वादिना सङ्करप्रसङ्गा'दिति विश्वनाथः प्राह।

ननु पार्थिवशरीरं जलीयं शीतस्पर्शवत्त्वादित्याद्यनुमानेन जलीयत्वादिकमपि शक्यं तत्र साधयितुमित्याकाङ्क्षायामाह शीतेत्यादि। तथाहि पार्थिवशरीरे यः शीतस्पर्शादिरुपलभ्यते, स तत्र जलादिसंयोगरूपोपाधिप्रयुक्त एव, न तु जलाद्यभेदप्रयुक्तः, इत्यश्च न पार्थिवशरीरस्य शक्यं जलत्वमनुमातुं, समवायेन हेतुत्वे स्वरूपासिद्धेः, सम्बन्धान्तरेण व्यभिचाराच्च। तदिदं सिद्धं पार्थिवशरीरं न जलीयमिति, कादाचित्कः कौलचित्को जलीयत्वादिव्यपदेशस्तु जलादिनिमित्तकताप्रयुक्तः, न तु तदुपादानकताप्रयुक्तोऽपीति भावः। तदेवोक्तं दिनकरीये 'एवञ्च शरीरे पाञ्चभौतिकत्वव्यवहारो न पञ्चभूतोपादानकत्वनिबन्धनः, किन्तु तज्जन्यत्वनिबन्धनः, तत्राप्येकैकस्योपादानत्वं चतुर्णां निमित्तत्वमिति विवेक' इति।

स्वाश्रयजातीयेत्यादि—अत्र स्वपदं हेत्वधिकरणत्वेनाभिमतपरम्, तथा च प्रकृते हेत्वधिकरणतया अभिमतो यो गन्धः तस्य पृथिवीभिन्ने सुतरामसम्भवेन तद्विषयकानुभवकरणस्य स्वाश्रयपृथिवीजातीयत्वसिद्धावेव फलबलात् पार्थिवत्वं गन्धग्राहकस्य घ्राणस्य समायातमन्यथा असिद्धेः। न च सत्ताजातिमुपादाय गन्धाश्रयपृथिवीसाजात्यं जलादावपीति कथं नार्थान्तरमिति वाच्यं प्रकृते स्वाश्रयवृत्त्यपरजातिमत्त्वरूपस्य स्वाश्रयजातीयत्वस्य विवक्षितत्वात्; सत्तायास्तु सर्वजात्यपेक्षयैव अधिकदेशवृत्तितया अपरजातित्वविरहेण तामादाय नार्थान्तरमिति भावः। स्वाश्रयत्वञ्च समवायेन विवक्षणीयम्, अन्यथा कालिकादिसम्बन्धमुपादाय तथैवार्थान्तरप्रसङ्गस्य दुर्निवारत्वात्। वस्तुतस्तु अपरजातिनिवेशेऽपि द्रव्यत्वमादाय दोषसम्भावनाया निराकर्त्तुमशक्यतया सत्ताभिन्नत्वे सति द्रव्यत्वभिन्ना या स्वसमानाधिकरणजातिस्तद्वत्त्वलक्षणमेव स्वाश्रयजातीयत्वं वक्तव्यमिति। अन्ये तु भेदद्वयनिवेशे गौरवात् द्रव्यविभाजकजातिमुपादाय साजात्यं विवक्षणीयमिति वदन्ति। शब्दस्यापि प्रतिनियतश्रोत्ररूपेन्द्रियग्राह्यगुणतया तदाश्रयवृत्तिद्रव्यविभाजकजातेरसत्त्वेन दोषावतारात् शब्दान्येति। इन्द्रियपदं बहिरिन्द्रियपरम्, अन्यथा मनःकरणकप्रत्यक्षगोचरज्ञानादिगुणानां प्रतिनियतेन्द्रियग्राह्यशब्दान्यगुणत्वरूपहेतुमतां तादृशसाध्यशून्यतया व्यभिचारप्रसङ्गात्। बहिरिन्द्रियग्राह्यशब्दान्यगुणेषु पार्थिवघटादिवृत्तिसंख्यासंयोगादिषु तादृश-

साध्यविरहाद् व्यभिचारवारणाय प्रतिनियतेति। इत्थञ्च संख्यासंयोगादिगुणानां चाक्षुषादिविषयताया इव त्वाचप्रत्यक्षविषयताया अपि सत्त्वेन न ते प्रतिनियतेन्द्रियग्राह्या इति न क्षतिः। घटादिवृत्तिरूपादौ हेतुमति साध्यविरहेण दृष्टान्ते व्यभिचारवारणाय भास्वररूपस्य दृष्टान्तत्वेनोपन्यासः।

गन्धानुभव इत्यादि—साक्षात्कारत्वमात्रस्य हेतुत्वे अतीन्द्रियाकरणके परमात्मवृत्तिसाक्षात्कारे व्यभिचार इति जन्यत्वं साक्षात्कारविशेषणं देयमेव।

स्थावरत्वमित्यादि—शरीरवृत्तिचैत्रत्वादिकजातिमादाय चैत्रादिशरीरे अतिप्रसङ्गवारणाय जातावव्रत्त्यन्तम्। तथाहि चैत्रत्वादिजातेः क्षत्यवच्छेदकशरीरवृत्तित्वान्न क्षतिः। पाषाणत्वादिजातीनामपि क्षत्यवच्छेदकावृत्तितया पाषाणादौ स्थावरत्वातिप्रसङ्गवारणाय पुनर्वृत्त्यन्तम्। तथाहि पाषाणत्वादिजातेः भोगावच्छेदकवृत्तित्वविरहादेव न क्षतिरिति भावः। अत्रावृत्तित्वं जातिमत्त्वञ्च समवायेनैवोपेयमिति।

ভাষ্যতাৎপর্য্য

উক্ত পৃথিবীতে সমবায়সম্বন্ধে ত্রিবিধ কার্য্যদ্রব্য উৎপন্ন হইয়া থাকে। উহার শরীর ইন্দ্রিয় ও বিষয় এই তিনটী সংজ্ঞা। যে জাতি চেষ্টার আশ্রয়ে সমবায়-সম্বন্ধে বর্ত্তমান থাকে, অথচ দ্রব্যের সমবায়িদেশে থাকে না, উক্ত জাতির আশ্রয়কে শরীর বলা হয়। মনুষ্যত্ব ও গোত্বপ্রভৃতি উক্তরূপ জাতি, মনুষ্য ও গোপ্রভৃতি দ্রব্য উক্ত জাতির আশ্রয়, অতএব মনুষ্য ও গো প্রভৃতিতেই শরীর-লক্ষণ সঙ্গত হইয়া থাকে। এমতে শরীরের অবয়ব হস্ত প্রভৃতি শরীর নহে, এই জন্য যে জাতি দ্রব্যের সমবায়িদেশে থাকে না, এইরূপ জাতি বলা হইয়াছে। শরীরের অবয়ব হস্তাদিতে চেষ্টা থাকায় হস্তত্বাদি জাতি চেষ্টাবদ্‌বৃত্তি হইলেও উহা শরীরের সমবায়িকারণ হস্তাদিতে বর্ত্তমান বলিয়া দ্রব্যের সমবায়িদেশে অবর্ত্তমান জাতি নহে, কাজেই হস্তাদিতে শরীরলক্ষণের অতিব্যাপ্তি হইল না। এখানে আপত্তি হইতেছে এই যে নরসিংহদেহে সাঙ্কর্য্যভয়ে নরত্ব ও সিংহত্ব উভয়জাতি স্বীকার করিতে না পারায়, অথচ নরসিংহত্বরূপ একটী অখণ্ডধর্ম্মের একবৃত্তিত্বহেতু জাতিত্ব অসম্ভব হওয়ায় নরসিংহদেহে কিরূপে লক্ষণ যাইতে

পারে, তাহার উত্তর এই যে যুগভেদে নরসিংহদেহও বহু আছে, অথবা নরসিংহদেহ বহুক্ষণ থাকায় উহারও উপচয় ও অপচয়াদি সম্ভাবনা আছে বলিয়া চৈত্রের বাল্য কৌমার ও যৌবনাদিভেদে শরীরের ভেদনিবন্ধন চৈত্রত্বাদি জাতির ন্যায় নরসিংহত্বরূপ অখণ্ড ধর্ম্মও জাতি হইতে বাধা নাই, অতএব উক্ত জাতি গ্রহণ করিয়াই নরসিংহশরীরে লক্ষণ যাইতে পারিবে। চেষ্টাবদ্‌-বৃত্তিজাতিমত্ত্ব না বলিয়া কেবল চেষ্টাশ্রয়ত্ব বলিলে মৃতশরীরে চেষ্টা না থাকায় শরীরলক্ষণ যাইতে পারে না, কিন্তু উক্তরূপ নিবেশ করিলে মনুষ্যত্ব প্রভৃতি জাতির তৎকালেও শরীরে স্থিতিহেতু লক্ষণ যাইতে বাধা হয় না। বৃক্ষের চেষ্টাবিষয়ে কোনও প্রমাণ না থাকায় বৃক্ষত্বপ্রভৃতি জাতি চেষ্টাবদ্‌বৃত্তি জাতি নহে, কারণ চেষ্টার প্রতি প্রবৃত্তি কারণ, উক্ত প্রবৃত্তি অচেতন বৃক্ষে অসম্ভব, অতএব বৃক্ষে শরীরলক্ষণের অতিব্যাপ্তি হইবে না। বহু দার্শনিক ভোগের আয়তন বা অবচ্ছেদক অন্ত্যাবয়বীকেই শরীর বলিয়া থাকেন, কেহ বা কেবল ভোগের আয়তনকেই শরীর বলিয়া থাকেন। ভাষ্যকার প্রশস্তকরপাদাচার্য্যের উক্ত লক্ষণ অভিপ্রেত নহে, কারণ বৃক্ষপ্রভৃতিকে তিনি শরীরের অন্তর্গতরূপে গণনা না করিয়া বিষয়ের অন্তর্গতরূপে গণনা করিয়াছেন, তন্মতে উক্তরূপ লক্ষণ গ্রহণ করিলে বৃক্ষাদিতে শরীরলক্ষণের অতিব্যাপ্তি হইয়া পড়ে, কারণ জীব যেরূপ মনুষ্যাদিদেহে সুখ-দুঃখ-ভোগ করে, বৃক্ষাদিদেহেও ঐরূপ সুখ-দুঃখাদির ভোগ করায় উহাও জীবের ভোগায়তন, অতএব এরূপ লক্ষণ করিতে হইবে, যাহাতে বৃক্ষাদিতে উক্ত লক্ষণ যাইতে না পারে, এই জন্যই পূর্ব্বোক্তরূপ লক্ষণ করা হইয়াছে।

স্মৃতির অজনক জ্ঞানজনক মনোবৃত্তি সংযোগের আশ্রয়কে ইন্দ্রিয় কহে। আত্মার সহিত মনের সংযোগও জ্ঞানের জনক হওয়ায় আত্মাতে ইন্দ্রিয়লক্ষণের অতিব্যাপ্তি হয়, এই জন্য স্মৃতির অজনক বলা হইয়াছে। আত্মা বা আত্মমনঃ-সংযোগ জ্ঞানজনক ও তাদৃশ সংযোগের আশ্রয় হইলেও উহা স্মৃতির অজনক নহে, এই জন্য আত্মাতে অতিব্যাপ্তি হইল না। আত্মা মনের সহিত মন ইন্দ্রিয়ের সহিত ও ইন্দ্রিয় বিষয়ের সহিত যুক্ত হইয়া জ্ঞান জন্মাইয়া থাকে, ইহা প্রত্যক্ষের ক্রম। মনের সহিত বিষয়ের সংযোগ তাদৃশ নহে, এই জন্য ঘটাদি-বিষয়ে অতিব্যাপ্তি বারণের জন্য জ্ঞানজনক বিশেষণ দেওয়া হইয়াছে। এখন এস্থানে আপত্তি হইতে পারে এই যে, সুষুপ্তির উপপত্তির জন্য জন্যজ্ঞানসামান্যের

প্রতি ত্বঙ্‌মনোযোগের কারণত্ব নির্দ্দিষ্ট থাকায় ত্বঙ্‌মনোযোগ স্মৃতির প্রতি জনক হওয়ায় তাদৃশ সংযোগের আশ্রয় ত্বক্‌ ইন্দ্রিয়ে কিরূপে উক্ত লক্ষণ সঙ্গত হয়, ইহার উত্তরে বলিতে হইবে যে, স্মৃতির অজনক এই বিশেষণ পরিত্যাগ করিয়া তন্মতে সংযোগে আত্মাবৃত্তিত্ব বিশেষণ দিলেই উপপত্তি হইতে পারে। আত্মার সহিত মনের সংযোগ আত্মাতে অবৃত্তি না হওয়ায় আত্মাতে অতিব্যাপ্তি এবং ত্বকের সহিত মনের সংযোগ আত্মাতে অবৃত্তি হওয়ায় ত্বকে অব্যাপ্তি হইবে না। জ্ঞানসামান্যের কারণ ত্বঙ্‌মনোযোগের ত্বক্‌পদার্থকে যাহারা ত্বগিন্দ্রিয়ভিন্ন চর্ম্মমাত্র বলিয়া ব্যাখ্যা করেন, তাহাদের আর পূর্ব্ব আপত্তি হইতে পারে না।

কেহ বলেন যে যাহারা ব্যাপাররূপ সন্নিকর্ষদ্বারা সাক্ষাৎকার বা প্রত্যক্ষ উৎপাদন করে, তাহারাই ইন্দ্রিয়। যেমন চক্ষুঃপ্রভৃতি সংযোগাদিরূপ সম্বন্ধকে দ্বার করিয়া ঘটাদির প্রত্যক্ষ জন্মাইয়া থাকে, এই জন্য উহা ইন্দ্রিয়। আত্মা সাক্ষাৎকারের সমবায়িকারণ হইলেও উহার দ্বাররূপ কোনও ব্যাপার না থাকায় উহাতে অতিব্যাপ্তি হয় না।

শরীর ও ইন্দ্রিয়ভিন্ন কার্য্যদ্রব্যকে বিষয় কহে। শরীর ও ইন্দ্রিয়ে অতিব্যাপ্তি বারণের জন্য ভিন্ন পর্য্যন্ত বিশেষণ দেওয়া হইয়াছে।

উক্ত শরীর দুই প্রকার, যোনিজ ও অযোনিজ। শুক্র ও শোণিতের সম্বন্ধ-হেতু যে দেহ উৎপন্ন হয়, উহা যোনিজ এবং যাহার উৎপত্তিতে শুক্রশোণিতের সম্বন্ধ অপেক্ষা করে না, তাহাই অযোনিজ। দেবতা ও নারদাদি ঋষির শরীর শুক্রশোণিতের সম্বন্ধ ব্যতীত উৎপন্ন হয়, ধর্ম্মবিশেষ-সহকৃত অণুই উহার উপাদান। ক্ষুদ্রজন্তুগণের যাতনাশরীরও ঐরূপ শুক্র-শোণিত-সম্বন্ধ ব্যতিরেকে অধর্ম্মবিশেষ-সহকৃত অণুর প্রভাবে উৎপন্ন হইয়া থাকে, ঐ সকল দেহই অযোনিজ। যোনিজ দেহ দুই প্রকার, জরায়ুজ ও অণ্ডজ। গর্ভধারক চর্ম্ম-পুটকের নাম জরায়ু, যে দেহ ঐ জরায়ু হইতে জন্ম গ্রহণ করে, তাহাকে জরায়ুজ শরীর কহে। মানুষ পশুপ্রভৃতির দেহ উক্তরূপ জরায়ুজ।

পশুপদে মৃগ প্রতীত হইলেও সামান্য ও বিশেষ উভয়রূপে পশু বুঝাইবার জন্য গো-বৃষন্যায়ে মৃগপদ বিশেষ করিয়া ভাষ্যে প্রদত্ত হইয়াছে। উদয়নাচার্য্য প্রভৃতি বলেন যে, এস্থলে পশুপদে গ্রাম্যপশু এবং মৃগপদে বন্যপশু, অর্থাৎ গ্রাম্য ও

বন্য দ্বিবিধ পশুই জরায়ুজ। 'মানুষ-পশুমৃগাণাম্' এই স্থলে বহুবচন দ্বারা রাক্ষস প্রভৃতিরও গ্রহণ করা হইয়াছে। অতএব রাক্ষস প্রভৃতিকেও শুক্রশোণিত-প্রভব যোনিজ বুঝিতে হইবে। পক্ষী ও সরীসৃপ, অর্থাৎ যে সকল সর্প, কীট, কৃকলাস, পল্লী, (টিক্‌টিকী) ও মৎস্য প্রভৃতি জীব বক্ষঃসাহায্যে চলে, তাহারা অণ্ডজ।

উক্ত মানুষাদি দেহের উপাদান একমাত্র পৃথিবী, জলাদি উহার উপাদান কারণ নহে, কারণ তাহা হইলে মানুষাদি দেহের অন্তর্ভাবে পৃথিবীত্ব ও জলত্বাদির সামানাধিকরণ্য সম্ভব হওয়ায় পৃথিবীত্ব জলত্বাদির পরস্পর সাঙ্কর্য্যহেতু জাতিত্বব্যাঘাত ঘটিয়া উঠে। গন্ধবত্ত্বহেতু দ্বারা মানুষাদিদেহে পৃথিবীত্ব সিদ্ধ হয় বলিয়া পৃথিবীকেই উহার উপাদান স্থির করিতে হইবে। মানুষাদিদেহকে যে পাঞ্চভৌতিক বলা হয়, তাহা কেবল মানুষাদিদেহে পঞ্চভূতের হেতুতামূলক, অর্থাৎ মানুষাদিদেহের প্রতি পৃথিবী সমবায়িকারণ ও অপর চারিটী ভূত নিমিত্ত কারণ, এই জন্য উহাকে পাঞ্চভৌতিক বলা হইয়া থাকে, কিন্তু পঞ্চভূত উপাদান কারণ বলিয়া নহে। পার্থিবদেহে যে শীতস্পর্শের উপলব্ধি হয়, তাহা পার্থিবদেহের সহিত শীতস্পর্শযুক্ত জলের সংযোগরূপ উপাধি-বশতই হয়, উহা পার্থিব শরীরের ধর্ম্ম নহে, এই জন্য শীতস্পর্শাদি হেতুদ্বারা পার্থিব শরীরে জলত্বাদির সাধন করা সম্ভব হয় না।

পার্থিব ইন্দ্রিয় দ্বারা পৃথিবীর গুণ গন্ধের প্রত্যক্ষ হইয়া থাকে। উহা জলাদিদ্বারা অনভিভূত পার্থিব অবয়বদ্বারা নির্ম্মিত হয়। ঐ ইন্দ্রিয়ের নাম ঘ্রাণ। ইন্দ্রিয়মাত্রই অতীন্দ্রিয় বলিয়া আমরা যে নাসিকা অবয়ব দেখিতে পাই উহা ঘ্রাণ ইন্দ্রিয় নহে, পরন্তু ঐ নাসিকা উক্তরূপ ইন্দ্রিয়ের আশ্রয়। অন্নংভট্ট তদীয় তর্কসংগ্রহগ্রন্থে নাসিকার অগ্রভাগকে উক্ত ইন্দ্রিয়ের আশ্রয় বলিয়াছেন। যাহাদের নাসিকা প্রতিনিয়তই জলাদিদ্বারা অভিভূত থাকে, তাহাদের গন্ধের গ্রাহক ইন্দ্রিয়সত্ত্বে কোনরূপ প্রমাণ নাই, এই জন্যই জলাদিদ্বারা অনভিভূত পার্থিব অবয়ব দ্বারা নির্ম্মিত বলা হইয়াছে। ঘ্রাণেন্দ্রিয়ের পার্থিবত্ব অনুমান-প্রমাণদ্বারা সিদ্ধ হইয়া থাকে, উক্ত অনুমান এইরূপ যথা,—গন্ধে প্রতিনিয়ত ইন্দ্রিয়গ্রাহ্য শব্দাদ্যগুণত্ব আছে বলিয়া উহা স্বাশ্রয়জাতীয় করণ হইতে উৎপন্ন অনুভবের বিষয়ীভূত। গন্ধের প্রত্যক্ষে ঘ্রাণেন্দ্রিয়ই করণ, অতএব যদি উহাতে

পৃথিবীত্ব না থাকে, তবে গন্ধে উক্তরূপ সাধ্য থাকিতে পারে না। ভাস্বররূপ উহার দৃষ্টান্ত, কারণ ভাস্বররূপ যেমন প্রতিনিয়ত ইন্দ্রিয় চক্ষুর্দ্বারা গ্রাহ্য এবং শব্দভিন্নগুণ, তেমনই উহা ভাস্বররূপের আশ্রয় তেজোজাতীয় চক্ষুরিন্দ্রিয়রূপ করণ হইতে উৎপন্ন প্রত্যক্ষের বিষয় হইয়াছে। কেহ কেহ দৃশ্যমান নাসিকা অবয়বকেই ঘ্রাণেন্দ্রিয় বলিয়া থাকেন, তাহারা 'জন্য সাক্ষাৎকার বলিয়া গন্ধানুভব অতীন্দ্রিয়করণ হইতে উৎপন্ন হয়,' এরূপ সিদ্ধান্তে আস্থা স্থাপন করেন না। তাহাদের উক্ত মত সমীচীন নহে, কারণ অনেকস্থলে দেখা যায় যে, উক্ত অবয়বের কোনও রূপ বৈলক্ষণ্য না হইলেও গন্ধ প্রত্যক্ষ হইতেছে না, অতএব উক্ত অবয়বে একটা অতিরিক্ত শক্তি আছে স্বীকার করিতে হইবে, যাহার অভাবে অবয়বের কোনও রূপ বৈলক্ষণ্য না হইলেও গন্ধের প্রত্যক্ষ বাধিত হইয়া থাকে, উহাই ঘ্রাণেন্দ্রিয়, দৃশ্যমান নাসিকাবয়ব নহে।

পার্থিব বিষয় দ্ব্যণুকাদিক্রমে উৎপন্ন হইয়া থাকে। অর্থাৎ প্রথম দুইটী পরমাণুর মিলনে দ্ব্যণুক, তিনটী দ্ব্যণুকের মিলনে ত্রসরেণু ও তাহা হইতে ক্রমশঃ অপরাপর অবয়বের যোগে মহত্তর ও মহত্তম বস্তু উৎপন্ন হইতে থাকে। উক্ত পার্থিব বিষয় অসংখ্য হইলেও মৃত্তিকা, পাষাণ ও স্থাবর এই তিন ভাগে উহাকে বিভাগ করা হইয়াছে। অর্থাৎ উহার কতকগুলি মৃত্তিকানামে, কতকগুলি পাষাণনামে ও কতকগুলি স্থাবরনামে অভিহিত; ইহা দ্বারাই সকল পার্থিব বিষয়ের সংগ্রহ করা যাইতে পারে। তন্মধ্যে মৃত্তিকার বিকার-স্বরূপ প্রাচীর ইষ্টক ও মৃৎপিণ্ড প্রভৃতি মৃত্তিকা। শিলা, মণি ও হীরক প্রভৃতি পাষাণ। বৃক্ষ, তৃণ, ওষধি, গুল্ম, লতা প্রভৃতি স্থাবর নামে অভিহিত হইয়া থাকে। এই সকল বস্তুর বিশেষ বিবরণ জগদীশসূক্তিতে আলোচিত হইয়াছে।

প্রশস্তপাদভাষ্যম্

অপ্ত্বাভিসম্বন্ধাদাপঃ। রূপরসস্পর্শদ্রবত্বস্নেহ-সংখ্যাপরিমাণপৃথক্ত্বসংযোগবিভাগপরত্বাপরত্বগুরুত্ব-সংস্কারবত্যস্ব। এতে চ পূর্ব্ববৎ সিদ্ধাঃ। শুক্লমধুর-

शीता एव रूपरसस्पर्शाः। स्नेहोऽम्भस्येव। सांसिद्धिकं द्रवत्वञ्च। तास्तु पूर्व्ववत् द्विविधा नित्यानित्य-भावात्। कार्य्यं पुनस्त्रिविधं शरीरेन्द्रियविषय-संज्ञकम्। अत्र शरीरमयोनिजमेव वरुणलोके पार्थि-वावयवोपष्टम्भादुपभोगसमर्थम्। इन्द्रियं सर्व्वप्राणिनां रसोपलम्भकम् अन्यावयवानभिभूतैर्जलावयवैरारब्धं रसनम्। विषयस्तु सरित्समुद्रहिमकरकादिरिति।

[रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः—२अ-१आ-२सू। संख्याः परि-माणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म्म च रूपिद्रव्यसमवाया-च्चाक्षुषाणि—४अ-१आ-११सू। अप्सु शीतता—२अ-२आ-५सू। नोदना-दाद्यमिषोः कर्म्म तत्कर्म्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च—५अ-१आ-१७सू। अपां संयोगाभावे गुरुत्वात् पतनम्—५अ-२आ-३सू। द्रवत्वात् स्यन्दनम्—५अ-२आ-४सू। नाड्यो वायुसंयोगादारोहणम्—५अ-२आ-५सू। नोदनापीडनात् संयुक्तसंयोगाच्च—५अ-२आ-६सू। अपां सङ्घातो विलयनञ्च तेजःसंयोगात्—५अ-२आ-८सू। अपां संयोगाद्विभागाच्च स्तनयित्नोः—५अ-२आ-११सू। सदकारणवन्नित्यम्—४अ-१आ-१सू। तस्य कार्य्यं लिङ्गम्—४अ-१आ २सू। कारणभावात् कार्य्यभावः—४अ-१आ-३सू। अनित्य इति विशेषतः प्रतिषेधभावः—४अ-१आ-४सू। अविद्या—४अ १आ-५सू। तत् पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम्—४अ २आ-१सू। अनियतदिग्देशपूर्व्वकत्वात्—४अ-२आ-६सू। धर्म्मविशेषाच्च—४अ-२आ-७सू। समाख्याभावाच्च—४अ-२आ-८सू। संज्ञाया आदित्वात्—४अ-२आ-९सू। सन्त्ययोनिजाः—४अ-२आ-१०सू। वेदलिङ्गाच्च—४अ-२आ-११सू। नित्यं परिमण्डलम्—७अ-१आ-२०सू। अविद्या च विद्यालिङ्गम्—७अ-१आ-२१सू। तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात्—८अ-२आ-६सू। इत्येतान्यालम्बन-सूत्राणि।]

जगदीशसूक्तिः

अप्त्वं जलत्वं तस्याभिमतसम्बन्धात् समवायात् आपः पञ्चीकृता इति शेषः। जलत्वन्तु त्रुटिपर्य्यन्तं स्फुटतरप्रत्यक्षसिद्धं जलत्रुटेर्म्महाजलत्वेन जलोपादेयजलसमवेतत्वानुमानाच्च परमाणुद्व्यणुकयोस्तत्सिद्धिरिति वदन्ति। एते रूपादयः पूर्व्ववत् पृथिवीवत् मुनिसम्मतिसिद्धाः। तथा च रूपरसस्पर्शवत्य आपो द्रुताः [द्रवाः] स्निग्धाश्चेति सूत्रबलादेव जलस्य रूपादिविशेषगुणवत्त्वम्। रूपिषु चाक्षुषवचनात् सप्त संख्यादयः। पतनोपदेशाद्गुरुत्वम्। उत्तरकर्म्मवचनात् संस्कार इति। रूपरसस्पर्शानां प्रत्येकवत्त्वस्य घटादौ व्यभिचारेण जलेतरभेदकत्वासम्भवात् आह शुक्लमधुरशीता एव रूपरसस्पर्शा इति। शीता इति—शीताः स्पर्शा इत्यत्र गुणवाचिनोऽपि शीतशब्दस्य न नपुंसकता, किन्तु पुंस्त्वमेव पुंलिङ्गस्य स्पर्शशब्दस्य विशेषणत्वात् शुक्लं रूपमित्यादौ शुक्लपदस्य क्लीवत्ववदिति ध्येयम्।

यद्यपि शुक्लमात्ररूपवत्त्वं स्फटिकादौ व्यभिचारान्न जलेतरभेदकं तथापि शुक्लेतररूपासमानाधिकरणभास्वररूपवदवृत्तिद्रव्यविभाजकधर्म्मवत्त्वे स्नेहानधिकरणावृत्तिशुक्लरूपवत्त्वे वा तात्पर्य्यम्। मधुरमात्ररसवत्त्वमपि मधुरान्यरसवदवृत्तिद्रव्यविभाजकोपाधिमत्त्वं वाच्यं नातः शर्करादावतिप्रसङ्गः। शीतमात्रस्पर्शवत्त्वन्तु शीतशून्यस्पर्शवदवृत्तिस्पर्शवत्त्वपर्य्यवसितं ग्राह्यं, नातः शीतत्वस्यैव व्याप्यतावच्छेदकत्वसम्भवाद् व्यर्थविशेषणत्वावकाशः।

ननु स्नेहः क्षीरघृततैलादावतिप्रसक्तत्वात् कुतो जलस्य वैधर्म्म्यमत आह स्नेहोऽम्भस्येवेति। घृतादेः स्निग्धत्वप्रतीतेस्तदुपष्टम्भकजलस्नेहोपाधिकत्वादिति भावः।

ननु द्रवत्वं घृतादिसाधारणत्वात् कुतो जलस्य लक्षणमत आह सांसिद्धिकञ्चेति। सांसिद्धिकत्वञ्च पाकाप्रयोज्यद्रवत्वगतो जातिविशेषः,

शैत्यसमानाधिकरणत्वं वा। अत्रापि संख्यादयः स्नेहविशिष्टा एव जलेतरभेदका बोध्याः। संख्यादिमात्रस्य पृथिव्यादावतिप्रसक्तत्वात् भिन्नधर्म्मिकत्वाच्च न वैयर्थ्यशङ्कापि।

तास्त्विति—ताः आपोऽपि पूर्व्ववत् पृथिवीवत् नित्यानित्यभेदेन द्विविधा इत्यर्थः। कार्य्यमित्यस्य अपामित्यादिः। ननु आप्यशरीरस्य योनिजत्वे पृथिवीत्वप्राप्तौ जलत्वव्याहतिरेव विरुद्धजात्योरेकत्र सत्त्वायोगादत आह अयोनिजमेवेति। अथ जलीयमपि शरीरं यद्यस्ति, तत् कुतो नानुभूयत इत्यत आह वरुणलोक इति। तथा च विप्रकृष्टत्वात् न तस्यानुभवः। जलत्वं शरीरसमवायिवृत्ति द्रव्यारम्भकनित्यवृत्तिजातित्वात् पृथिवीत्ववदित्यनुमानञ्च तादृशशरीरे मानमिति भावः। ननु आप्यदेहस्य पृथिव्यनारभ्यत्वे धारणाकर्षणानुपपत्तौ कथमुपभोगः सम्पद्यतामत आह पार्थिवेति, पार्थिवभागानामुपष्टम्भकाख्यसंयोगसत्त्वादाप्यशरीरसुपभोगायतनमित्यर्थः। तथा च तत्र विजातीयानां समवायित्वमेव नाभ्युपेयते, न तु कारणतान्तरमपीति भावः।

आप्यमिन्द्रियमाह इन्द्रियमिति, सर्व्वप्राणिनां सर्व्वजातीयप्राणिनां रसोपलम्भकमिन्द्रियं जलावयवैरारब्धं रसनं रसनसंज्ञकमित्यन्वयः। पित्तोपहतजिह्वायां रसग्राहकेन्द्रियसत्त्वे प्रमाणाभावमावेदयितुं विजातीयानभिभूतैरित्युक्तम्। पित्ताद्यनभिभूतैरिति तदर्थः। अत्र घ्राणस्य पृथिवीत्व इव रसनस्य जलत्वे प्रागुक्तप्रमाणमनुसन्धेयम्। करकादेरित्यादिना कूपाद्युपग्रहः। न च करकाया जलत्वे द्रवत्वापत्तिस्तदारम्भकपरमाणौ सदैव द्रवत्वसत्त्वादिति वाच्यं तादात्म्येन करकाया एव समवायेन द्रवत्वं प्रति विरोधित्वात्। अदृष्टविशेषः करकायां द्रवत्वोत्पादप्रतिबन्धक इत्यपि कश्चित्। [जलम्]।

सूक्तिदीपिका

अथेदानीं जलं निरूपयितुमादौ सर्व्वजलव्यक्तिषु जलत्वं साधयितुमाह पञ्चोक्तता इति शेष इति। तथाहि सम्बन्धसत्त्वस्य सम्बन्धिसत्त्वनियामकतया जलत्वसम्बन्धस्य सर्व्वत्र जले सत्त्वेन जलत्वमपि सिद्धमिति भावः।

परे तु महत्त्वकारणकप्रत्यक्षस्य परमाणुद्व्यणुकयोरेवासम्भवात् अन्यत्र च त्रसरेणुप्रभृतिषु जलव्यक्तिषु प्रत्यक्षत एव जलत्वस्य ग्रहात् न त्रसरेणुप्रभृतीनां पक्षत्वमेव सम्भवति, अतः त्रसरेणुप्रभृतिषु महाजलेषु प्रत्यक्षतः परमाणु-द्व्यणुकयोश्च अनुमानेन जलत्वसिद्धिरिति। इदमेव वदन्तीत्यनेन व्याख्यात-मित्याहुः।

रूपिष्वित्यादि— रूपवद्वृत्तिसंख्यादिगुणानां चाक्षुषत्वकथनात् चक्षुरिन्द्रि-येणैव रूपवति जले संख्यादयः सिद्धा इति भावः।

पतनोपदेशादिति तथाहि आद्यपतनं प्रति गुरुत्वस्य असमवायिकारण-तया आद्यपतनमन्तरा द्वितीयादिपतनस्य चासम्भवेन जलस्य पतनरूपकार्य्य-दर्शनात् अतीन्द्रियमपि गुरुत्वमनुमेयम्। अत एवोक्तं कणादेन 'अपां संयो-गाभावे गुरुत्वात् पतनम्' इति।

उत्तरेत्यादि—तथाहि इषौ प्रथमं कर्म्म नोदनादुत्पद्यते, द्वितीयन्तु कर्म्म तत्कर्म्मणा जनितात् संस्कारादिति स्थिते 'नोदनादाद्यमिषोः कर्म्म तत्कर्म्म-कारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च' इति कणादसूत्रार्थे संस्कारस्य जले असत्त्वे द्वितीयादिकर्म्मणामसम्भवेन संस्कारोऽवश्यमुपगन्तव्य एव इति भावः।

शीता इतीत्यादि—ननु 'शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जड़' इत्याद्यमरवचनात् गुणप्रतिपादकस्य शीतशब्दस्य क्लीबत्वमेव युक्तं, न पुंस्त्वं, तत् कथं शीता इत्याकाङ्क्षायामाह शीताः स्पर्शा इत्यत्रेत्यादि। तथाहि यदा विशेष्यवाचकपदान्तरासमभिव्याहारेण गुणप्रतिपादकशीतादिशब्दोप-न्यासस्तदैव तत्र कोषाप्तलिङ्गभागिता, यदा पुनर्विशेष्यवाचकलिङ्गान्तरीय-पदसमभिव्याहारस्तदा तु विशेष्यवाचकतत्पदगतलिङ्गभागितैव। अन्यथा 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती'ति कोषवचने सत्यपि शुक्लं रूप-मित्यादौ गुणवाचकशुक्लादिशब्दानां क्लीबलिङ्गभागित्वमसमञ्जसं स्यादिति।

अथ भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायेन रूपरसस्पर्शेषु शुक्लमधुरशीतविशेषणदानेऽपि पदार्थान्तरे प्रसक्तं व्यभिचारं निराकरोति यद्यपीत्यादिना। शुक्लेतरेत्यादि—नानारूपायाः पृथिव्या अपि शुक्लरूपवत्त्वेन पृथिवीत्वस्यापि शुक्लरूपसमानाधिकरणताद्दशधर्म्मतया तद्वत्त्वं पृथिव्यामतिप्रसक्तमिति शुक्लरूपसामानाधिकरण्यमनिवेश्य शुक्लेतरेत्यादिगुणतराभावद्वयघटितविशेषणोपादानम्। द्रव्यविभाजकधर्म्मस्य तेजस्त्वस्यापि तथात्वेन तथैवातिप्रसङ्ग इति भास्वररूपवदवृत्तीति। तथाहि पृथिवीत्वस्य शुक्लेतरनीलपीतादिरूपसामानाधिकरण्येन तेजस्त्वस्य च भास्वररूपवद्वृत्तित्वेन नातिप्रसङ्गशङ्कापीति भावः। ततो लाघवमभिसन्धायाह स्नेहानधिकरणेत्यादि। पृथिवीतेजसोरतिव्याप्तिवारणाय अवृत्त्यन्तम्। शुक्लेतरेत्यादौ असामानाधिकरण्यादिघटकमधिकरणत्ववृत्तित्वादिकं सर्व्वमेव समवायसम्बन्धेन वक्तव्यम्, अन्यथा कालिकादिसम्बन्धमुपादाय अव्याप्त्यतिव्याप्त्योः प्रसक्तेः।

नात इत्यादि—तथाहि मधुराम्लरसवत्त्वस्य शर्करादौ पार्थिवद्रव्येऽपि वर्त्तमानतया तत्र जलेतरभेदस्यासत्त्वेन ताद्दशेन हेतुना जलेतरभेदसाधने व्यभिचारो दुर्णिवार एव स्यादिति भावः। मधुरान्यरसवत्त्वम् अवृत्तित्वघटकं वृत्तित्वं ताद्दशोपाधिमत्त्वञ्च पूर्ववत् समवायेनैव सम्बन्धेन निवेशनीयम्, अन्यथा सम्बन्धान्तरमादाय पूर्ववदेवाव्याप्त्यतिव्याप्त्योः प्रसङ्गात्।

अम्भस्येवेतीति—एवकारस्य इतरव्यवच्छेदार्थतया अम्भोभिन्नावृत्तिरित्यर्थः। तथाहि स्नेहस्य जलभिन्ने चीरघृतादाववृत्तित्वेन तत्र जलस्य वैधर्म्यत्वं नानुपपन्नमिति भावः।

द्रवत्वमित्यादि—द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्च, तत्र द्रवत्ववत्त्वमात्रस्य परिग्रहे चितितेजसोरतिप्रसङ्गः तयोरपि द्रवत्ववत्त्वात्। सांसिद्धिकद्रवत्ववत्त्वस्य परिग्रहे तु न तथा चितितेजसोर्द्रवत्वस्य नैमित्तिकत्वादत एव द्रवत्वे सांसिद्धिकत्वविशेषणमुपन्यस्तमिति भावः। अत्रापि सांसिद्धिकद्रवत्वमात्रं न लक्षणं, किन्तु सांसिद्धिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, तेन उत्पन्नविनष्टजलादौ ताद्दशद्रवत्वस्यासम्भवेन नाव्याप्तिः, पूर्वत्र ताद्दशताद्दशजातिमत्त्वानुसरणस्यापि उत्पन्नविनष्टजलादावव्याप्तिवारणं फलमवगन्त-

व्यम्। गुणोत्पत्तौ द्रव्यस्य समवायिकारणतया कारणस्य कार्य्याव्यवहितपूर्ववर्त्तित्वनियमेन उत्पन्नविनष्टजलादेरुत्पत्तिक्षणावच्छेदेन गुणरूपताद्दृशद्रवत्वस्य उत्पत्तेरभ्युपगन्तुमशक्यत्वात्।

स्नेहविशिष्टा इत्यादि– अत्र स्नेहवैशिष्ट्यं संख्यादिषु समवायघटितसामानाधिकरण्यसम्बन्धेन बोध्यम्, अन्यथा पृथिव्यादिवृत्तिसंख्यादीनामपि कालिकादिसम्बन्धेन स्नेहविशिष्टतया तद्दोषतादवस्थ्यात्। एतेन स्नेहविशिष्टसंख्यावत्त्वं स्नेहविशिष्टपरिमाणवत्त्वमित्यादिरूपं लक्षणमवगन्तव्यमित्युक्तं भवति।

अथ स्नेहमात्रस्यैव जलेतरावृत्तित्वेन जलेतरभेदकत्वसम्भवे तादृशसंख्यावत्त्वादिलक्षणं व्यर्थविशेषणमित्यतस्तन्निराकरोति भिन्नधर्म्मिकत्वाच्चेति। तथाहि स्वसमानाधिकरणसाध्यव्याप्यतावच्छेदकधर्म्मान्तरघटितत्वस्य व्यर्थविशेषणलक्षणतया प्रकृते स्नेहत्वरूपस्वघटकधर्म्मान्तरस्य जलेतरभेदरूपसाध्यव्याप्यतावच्छेदकत्वेऽपि स्नेहविशिष्टसंख्यात्वादिरूपस्य स्वस्य तत्र सामानाधिकरण्यविरहेण न क्षतिरिति भावः।

पृथिवीत्वप्रसङ्गाविति—योनिजत्वस्य पृथिवीत्वव्याप्यतया जलीयशरीरे इयं पृथिवी योनिजत्वादित्यनुमानेन पृथिवीत्वसिद्धौ सत्यामित्यर्थः। विरुद्धजात्योरिति—परस्परमसमानाधिकरणयोः पृथिवीत्वजलत्वादिरूपसामान्ययोरित्यर्थः। सत्त्वायोगादिति—उभयत्र एकनिरूपितवृत्तित्वाभावादित्यर्थः। तादृशजात्योरेकनिरूपितवृत्तित्वस्वीकारे स्वसामानाधिकरण्यघटितपरस्परनिरूपितसाङ्कर्य्यस्य परस्परं सत्त्वात् उभयोरेव भूतत्वमूर्त्तत्वायोरिव जातित्वव्याघातापात इति भावः।

नानुभूयत इति—प्रत्यक्षेणेत्यादिः। अनुभव इति प्रत्यक्षेणेति शेषः। अन्यथा विषयसन्निकर्षस्य परोक्षानुभवानुपयोगितया तादृशानुभवाभावे सन्निकर्षविपरीतविप्रकृष्टत्वस्य हेतुत्वोपन्यासो नैव सङ्गच्छेत। अथ केन प्रमाणान्तरेण तत्सिद्धिरित्याकाङ्क्षायामाह जलत्वमित्यादि। जातित्वं नित्यवृत्तिजातित्वं वा आत्मत्वज्ञानत्वादौ व्यभिचारीत्यतो द्रव्यारम्भकेति। समवायिकारणत्वलक्षणस्य आरम्भकत्वस्य आत्मन्यपि ज्ञानादिसमवायिकारणे वर्त्तमानतया आत्मत्वे तथैव व्यभिचार इत्यतो द्रव्येति। न च पार्थिवेन शरी

रेणार्थान्तरमिति वाच्यं पार्थिवशरीरे जलस्य निमित्तकारणत्वमेव न समवायिकारणत्वं साङ्कर्य्यप्रसङ्गादित्यस्याधस्तादेव निरुक्तप्रायत्वात् ।

प्रागुक्तप्रमाणमिति—पूर्वोक्तरीत्या अनुमानप्रमाणमित्यर्थः। इयांस्तु विशेषः—पूर्वत्र गन्धं पक्षीकृत्य स्वाश्रयजातीयकरणकानुभवग्राह्यत्वसाधनमत्र तु रसं पक्षीकृत्य तथा। तत्प्रयोगश्च—'रसः स्वाश्रयजातीयकरणकानुभवग्राह्यः प्रतिनियतेन्द्रियग्राह्यशब्दान्यगुणत्वात् भास्वररूपव'दिति। विश्वनाथपादास्तु प्रकारान्तरेणैव इन्द्रियेषु जलीयत्वादिकं साधयन्ति। तदुक्तं सिद्धान्तमुक्तावल्यां—'रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्' इत्यादि।

करकेत्यादि—ननु काठिन्यादेः क्षितीतरावृत्तित्वेन काठिन्येन करकायां पार्थिवत्वमनुमातुं शक्यमिति चेन्न करकायां काठिन्यप्रत्ययस्य भ्रमताया एव स्वीकारात्। उष्मणा करकाया विलये तत्र जलत्वस्य प्रत्यक्षसिद्धत्वात्, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्त्या करकायामपि जलत्वसिद्धेः। नहि जल विजातीयमुपादानं जलस्य शक्यमङ्गीकर्त्तुम्। 'उष्मणा विलीनस्य तस्य प्रत्यक्षसिद्धत्वा'दित्यादिना विश्वनाथेन मुक्तावल्यामपि तथैव प्रतिपादितमुपलभ्यते।

अदृष्टविशेष इत्यादि—तथाहि करकादिभिः सम्मिलितेन भेषजविशेषेण रोगविशेषाणामुपशान्तिरस्ति, सम्भवति च करकादिपानतः समुत्पादो रोगविशेषाणाम्, एवं स्थिते करकादौ द्रवत्वस्य समुत्पादे जलान्तरात्तत्र वैलक्षण्यग्रहाभावेन विशेषतस्तदुपादानस्याशक्यतया रोगशान्तिरोगसमुत्पत्तिजनितसुखदुःखभोगरूपादृष्टफलभोगस्य बाधसम्भवात् तादृशसुखदुःखप्रयोजकादृष्टविशेषा एव प्रतिबध्नन्ति करकादौ द्रवत्वोत्पादमिति तात्पर्य्यमवसेयम्। 'अदृष्टविशेषेण द्रवत्वप्रतिरोधा'दिति मुक्तावलीवचनमपि तमेवार्थमनुवदतीत्यादि। परे तु करकायामुपष्टम्भकः पार्थिवभागोऽभ्युपगम्यते, स एव पार्थिवभागो द्रवत्वसाक्षात्कारं प्रतिबध्नाति, न तु अदृष्टविशेषस्य तत्र द्रवत्वप्रतिबन्धकत्वमास्थेयम्, अन्यथा अदृष्टस्य फलानुमेयतया सर्वत्रैव कार्य्यानुत्पादस्थले अदृष्टविशेषस्यैव कार्य्यप्रतिबन्धकस्य सिद्ध्या उपपत्तौ किंवा विशेष्य तत्र तत्र प्रतिबन्धकान्तरस्वीकारेण इत्यादिकमाचक्षते। तदसत् उष्मसंयोगस्य पार्थिव-

भागाविनाशकतया उष्मसंयोगदशायामपि पार्थिवभागस्य यथापूर्वं सत्त्वेन तदानीमपि द्रवत्वोत्पादासम्भवप्रसङ्गात्। न च तत्र प्रतिबन्धकतायामुष्मसंयोगस्य उत्तेजकत्वं कल्पनीयं, तेन उष्मसंयोगदशायां उष्मसंयोगाभावविशिष्टतादृशपार्थिवभागस्यासत्त्वेन न द्रवत्वोत्पादप्रतिबन्ध इति वाच्यं पार्थिवभागानां विलीय जलमयत्वासम्भवेन करकाविलयानन्तरं पार्थिवभागलेशस्यापि करकोपादेये जले अननुभवेन करकावस্থায়ামপি तथा पार्थिवभागसत्त्वे प्रमाणाभावात् इत्यादिकमूह्यमन्यत्।

ভাষ্যতাৎপর্য্য

ভাষ্যকার সম্প্রতি জল সম্বন্ধে বিবরণ করিতেছেন, যথা—যাহাতে জলত্বজাতির সম্বন্ধ অর্থাৎ সমবায় আছে, তাহাই জল বলিয়া জানিবে। জলত্বজাতি ত্রসরেণু হইতে আরম্ভ করিয়া অপর মহত্ত্বযুক্ত জলে প্রত্যক্ষ প্রমাণ দ্বারাই সিদ্ধ হইয়া থাকে এবং পরমাণু ও দ্ব্যণুকরূপ জলে মহত্ত্বের অভাবহেতু উহাতে প্রত্যক্ষপ্রমাণদ্বারা জলত্বের উপলব্ধি হইতে না পারিলেও অনুমান দ্বারা উহার উপলব্ধি হইয়া থাকে। উক্ত জলে রূপ, রস, স্পর্শ, দ্রবত্ব, স্নেহ, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ, বিভাগ, পরত্ব, অপরত্ব, গুরুত্ব, সংস্কার এই কয়টী গুণ আছে। পৃথিবীতে যেরূপ রূপাদিগুণ কণাদের সূত্রানুসারে ব্যবস্থাপিত হয়, সেইরূপ জলের উক্ত গুণসমষ্টিও কণাদের সূত্রানুসারেই ব্যবস্থাপিত হইয়া থাকে। রূপ, রস, ও স্পর্শ ইহার প্রত্যেকটীই ফলাদি পার্থিব পদার্থে থাকায় উহা জলের বৈধর্ম্ম্য হইতে পারে না, এইজন্য শুক্লরূপ মধুররস ও শীতলস্পর্শকেই জলের বৈধর্ম্ম্য বলিতে হইবে। এখন আপত্তি হইতেছে এই যে, স্ফটিক প্রভৃতি পার্থিব পদার্থে শুক্লরূপ ও শর্করা প্রভৃতিতে মধুররস থাকায় শুক্লরূপবত্ত্ব ও মধুররসবত্ত্বই বা কিরূপে জলের বৈধর্ম্ম্য বা ইতরব্যাবর্ত্তক ধর্ম্ম হইতে পারে, তাহার উত্তর এই যে, শুক্লমাত্ররূপবত্ত্বই জলের বৈধর্ম্ম্য অর্থাৎ যে দ্রব্যবিভাজক ধর্ম্ম শুক্লরূপভিন্ন অপর রূপের অধিকরণে এবং ভাস্বররূপের অধিকরণে থাকে না, তাদৃশ ধর্ম্মবত্ত্ব। স্ফটিকাদিতে যে পৃথিবীত্বাদি দ্রব্যবিভাজক ধর্ম্ম আছে, উহা নীল পীত ঘটাদিরূপ শুক্লেতররূপাধিকরণে বর্ত্তমান হওয়ায় পৃথিবীত্ব উক্তরূপ ধর্ম্ম নহে, জলত্বই উক্তরূপ ধর্ম্ম, কারণ

জলত্ব যেখানে যেখানে আছে, উহা শুক্লরূপ ভিন্ন অপররূপের অধিকরণ হয় না, যমুনা প্রভৃতির জল বা কুঙ্কুমাদিমিশ্রিত জলে যে বর্ণান্তরের উপলব্ধি হয়, উহা জলের স্বাভাবিক বর্ণ নহে, যমুনার জল আশ্রয়ের দোষে নীল বলিয়া প্রতীত হয়, যে হেতু সেই জলই তুলিয়া আকাশে ছড়াইয়া দিলে আর নীলবর্ণ দেখা যায় না, উহা শ্বেতবর্ণই দেখা যায়। কুঙ্কুমমিশ্রিত জলে যে কুঙ্কুমরূপ পার্থিব-ভাগ যুক্ত হয়, উহারই বর্ণ রক্তবর্ণ, কারণ বৈজ্ঞানিক যন্ত্রাদির সাহায্যে কুঙ্কুমভাগ অপসারিত করিলে জলের শ্বেতবর্ণই প্রতীত হইয়া থাকে। তেজে শুক্লরূপভিন্ন অপররূপ না থাকিলেও তেজস্বজাতি ভাস্বররূপাধিকরণে অবৃত্তি নহে, কারণ তেজের রূপমাত্রই ভাস্বররূপ, অতএব তেজেও অতিপ্রসঙ্গ হইল না।

কেহ বা বলেন যে, যে শুক্লরূপ স্নেহের অনাশ্রয়ে থাকে না, তাদৃশ শুক্লরূপ-বত্বই জলের বৈধর্ম্ম্য। পৃথিবী ও তেজ স্নেহের অধিকরণ নহে, কারণ স্নেহ একমাত্র জলেরই ধর্ম্ম, অতএব পৃথিবী ও তেজের শুক্লরূপ গ্রহণ করিয়া পৃথিবী ও তেজে অতিপ্রসঙ্গের শঙ্কা নাই।

ঐরূপ মধুরমাত্ররসবত্ব বৈধর্ম্ম্য অর্থাৎ মধুররসভিন্ন রসবৎপদার্থে অবর্ত্তমান দ্রব্য-বিভাজক ধর্ম্মবত্ব অর্থাৎ যে দ্রব্যবিভাজক ধর্ম্ম মধুর রসভিন্ন অপর রসবৎ পদার্থে বর্ত্তমান হয় না, তাদৃশ দ্রব্যবিভাজক ধর্ম্মবত্ব। দ্রব্যের মধ্যে দুইটী দ্রব্যে রস থাকে, তাহার একটী পৃথিবী ও অপরটী জল। পৃথিবীতে যেমন মধুর রস থাকে, ঐরূপ অন্যান্য কটু, তিক্ত প্রভৃতি রসেরও সত্তা আছে, একমাত্র জলেই কেবল মধুর রস থাকে, অতএব পৃথিবীত্ব ধর্ম্ম মধুররস ভিন্ন কটু তিক্ত প্রভৃতি রসবৎ পদার্থেও বর্ত্তমান হওয়ায় উহা উক্তরূপ দ্রব্যবিভাজক ধর্ম্ম হইতে পারে না, জলে অন্য রস না থাকায় জলত্বই উক্তরূপ দ্রব্যবিভাজক ধর্ম্ম, তদ্বত্ব পৃথিবীতে অসম্ভব বলিয়াই শর্করাদি মধুররসবৎ পৃথিবীতে অতিব্যাপ্তি হইল না।

ঐরূপ শীতমাত্রস্পর্শবত্ব জলের বৈধর্ম্ম্য। স্পর্শ তিন প্রকার—উষ্ণ, শীত ও অনুষ্ণাশীত। তন্মধ্যে উষ্ণস্পর্শ তেজে, শীতস্পর্শ জলে এবং অনুষ্ণাশীত স্পর্শ পৃথিবী ও বায়ুতে থাকে। শীতস্পর্শ জলভিন্ন অপর দ্রব্যে থাকে না, অতএব শীতস্পর্শ-বত্ব জলের বৈধর্ম্ম্য অনায়াসেই হইতে পারে।

ঐরূপ সাংসিদ্ধিক দ্রবত্ববত্ব জলের বৈধর্ম্ম্য। কেবল দ্রবত্ববত্ব ক্ষিতি ও তেজেও থাকে। কারণ দ্রবত্ব দুই প্রকার—সাংসিদ্ধিক ও নৈমিত্তিক। যে দ্রবত্ব

তেজের প্রভাব ব্যতিরেকে স্বভাবতই বর্ত্তমান উহা সাংসিদ্ধিক বা স্বাভাবিক দ্রবত্ব; আর যে দ্রবত্ব তেজের সংসর্গ হেতু উৎপন্ন হয়, উহা নৈমিত্তিক। তন্মধ্যে নৈমিত্তিক দ্রবত্ব ক্ষিতি ও পৃথিবীতে এবং সাংসিদ্ধিক বা স্বাভাবিক দ্রবত্ব জলে বর্ত্তমান আছে। অতএব সাংসিদ্ধিকদ্রবত্ববত্ত্ব জলের বিশেষ ধর্ম্ম বলাতেই ক্ষিতি ও তেজে অতিব্যাপ্তি হইল না। সংখ্যা পরিমাণ প্রভৃতি গুণ জলের ন্যায় পৃথিব্যাদি দ্রব্যান্তরেও আছে বলিয়া কেবল সংখ্যাদি জলের বৈধর্ম্ম্য হইতে পারে না, অতএব স্নেহ-সহকৃত সংখ্যাদিকেই জলের বৈধর্ম্ম্য বলিতে হইবে। ঐরূপে বৈধর্ম্ম্য বলিলে স্নেহগুণ জলভিন্ন অপর দ্রব্যে থাকে না বলিয়া স্নেহের সহিত মিলিতভাবে সংখ্যাও অপর দ্রব্যে থাকিতে না পারায় আর দোষ হইল না।

জলও পৃথিবীর ন্যায় নিত্য ও অনিত্যভেদে দুইপ্রকার। পরমাণুরূপ জল নিত্য ও দ্ব্যণুক হইতে আরম্ভ করিয়া সকল জলই অনিত্য বা কার্য্য। উক্ত অনিত্য বা কার্য্য জলও শরীর ইন্দ্রিয় ও বিষয়ভেদে তিন প্রকার। উক্ত জলীয় শরীর কেবল অযোনিজ; পার্থিব শরীর ভিন্ন যোনিজ শরীর নাই। ঐ অযোনিজ জলীয় দেহ বরুণলোকে প্রসিদ্ধ। কেবল জলসাহায্যে একটা শরীর নির্ম্মিত হইতে পারে না, এবং উক্তরূপ শরীর স্বীকার করিলে তাহা দ্বারা কোনও বস্তু ধারণ বা আকর্ষণ করা অসম্ভব হয়, এই জন্য পার্থিবভাগের সংযোগবিশেষকেও জলীয় শরীরের কারণ বলিতে হয়, পরন্তু জলীয় শরীরে জল সমবায়িকারণ আর পৃথিবী প্রভৃতি উহার নিমিত্তকারণ মাত্র।

বিজাতীয় দুইটী বস্তু এক কার্য্যের প্রতি সমবায়ি কারণ হইতে পারে না, এইজন্য জলীয় শরীরে জলের ন্যায় পৃথিবীকে সমবায়ি কারণই স্বীকার করা যায় না, কারণ তাহা হইলে পৃথিবীত্ব ও জলত্বের উক্ত শরীরে সামানাধিকরণ্য হেতু সাঙ্কর্য্য উপস্থিত হয় ও তন্নিবন্ধন উভয়েরই পরস্পর জাতিত্ব ব্যাঘাত হইতে পারে। কিন্তু একটী সমবায়িকারণ ও অপরটী নিমিত্ত কারণ বলিলে আর সেরূপ দোষ হয় না। উক্ত জলীয় শরীর প্রত্যক্ষ-প্রমাণে সিদ্ধ হইতে না পারিলেও অনুমান-প্রমাণ দ্বারা সিদ্ধ হইতে পারে। উক্ত অনুমানের প্রণালী যথা—যে জাতি দ্রব্যের সমবায়ি কারণ নিত্য বস্তুতে থাকে, সেই জাতি শরীরের সমবায়িকারণবৃত্তি হয়, অতএব জলত্বজাতি যখন জন্যজলের আরম্ভক বা সমবায়িকারণ জলীয় পরমাণুতে

আছে, তখন উহাতে শরীরের সমবায়িকারণবৃত্তিত্বও আছে। জলীয় শরীর না থাকিলে জলত্ব শরীরের সমবায়িকারণে বর্ত্তমান হইতে পারে না, অতএব ফলতই জলীয় শরীরের উক্তরূপে সিদ্ধি হয়।

জলীয় ইন্দ্রিয়ের নাম রসনা। উহা পিত্তাদি বিজাতীয় পদার্থ দ্বারা অনভিভূত জলাবয়ব হইতে উৎপন্ন। ঐ ইন্দ্রিয় দ্বারা রসের উপলব্ধি বা প্রত্যক্ষ হইয়া থাকে। যাহার জিহ্বা সর্ব্বদাই পিত্তোপহত তাহার রসনাখ্য ইন্দ্রিয়সত্ত্ববিষয়ে কোনও প্রমাণ নাই। পৃথিবীনিরূপণপ্রকরণে যেরূপ গন্ধে স্বাশ্রয়জাতীয়করণ-কানুভবগ্রাহ্যত্ব সাধন করিয়া ঘ্রাণেন্দ্রিয়ের পৃথিবীত্ব সাধন করা হইয়াছে, সেইরূপ এস্থলে রসবিশেষ পক্ষ করিয়া স্বাশ্রয়জাতীয়করণকানুভবগ্রাহ্যত্বের সাধন দ্বারাই রসনেন্দ্রিয়ে জলত্বসাধন করা যাইতে পারে। কেবল রসকে পক্ষ করিলে পৃথিবীত্ব দ্বারা অর্থান্তর হয়, এইজন্য পৃথিবাবৃত্তিরস প্রভৃতি পক্ষ করিতে হইবে। করকাপ্রভৃতি জলীয় দ্রব্য হইলে তাহার দ্রবত্বের প্রতি স্বয়ং করকাই প্রতিবন্ধক। অথবা করকার উৎপাদক জীবের অদৃষ্টবিশেষই উহার দ্রবত্বের প্রতিবন্ধক হইয়া থাকে। জলীয় শরীর ও ইন্দ্রিয়ভিন্ন সমগ্র সরিৎ সমুদ্র হিম করকাপ্রভৃতি জলীয় পদার্থই জলীয় বিষয় জানিবে।

प्रशस्तपादभाष्यम्

तेजस्त्वाभिसम्बन्धात् तेजः। रूपस्पर्शसंख्यापरि-माणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कार-वत्। पूर्व्ववदेषां सिद्धिः। शुक्लं भास्वरञ्च रूपम्। उष्ण एव स्पर्शः। नैमित्तिकं द्रवत्वञ्च। तदपि द्विविधं अणुकार्य्यभावात्। कार्य्यं शरीरादित्रयं शरीरेन्द्रिय-विषयसंज्ञकम्। शरीरमयोनिजमेव आदित्यलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्। इन्द्रियं सर्व्व-

ज्वलनं तदाश्रयीभूताग्निसम्पर्कप्रयुक्तमिति भावः। न च अयःपिण्डादिवह्न्यव्याप्तिः, ऊर्द्ध्वज्वलनसमवायिकारणतावच्छेदकजातिमत्त्वस्य विवक्षितत्वादिति भावः।

पचनं रूपादिपरावृत्तिः। स्वेदनं कफाद्युपशमः। आदिना समयभेदेन सुखदुःखयोः परिग्रहः। दिव्यं तेजो निर्वक्ति दिव्यमिति—अविन्धनं आप एव इन्धनम् उद्दीपकं यस्य स तथा। किं तथाविधमित्याकाङ्क्षायामाह सौरविद्युदादीति आदिना खद्योतादितेजःपरिग्रहः। उदर्य्यं निर्वक्ति,—भुक्तस्य ओदनादेर्यो रसादिपरिणामः पाकजरसमलधातूनामुत्पादस्तेषु निमित्तमित्यर्थः। सुवर्णादीत्यादिना रजतताम्राद्युपग्रहः। यद्यपि गुरोः पीतसुवर्णस्य पार्थिवत्वमेव तदुपष्टम्भे च तेजोऽन्तरे प्रमाणाभावः पार्थिवसुवर्णस्य च अत्यन्ताग्निसंयोगे द्रवत्वानुच्छेदः पीतान्यरूपानुत्पादश्च द्रवत्वस्य अत्यन्तोच्छेदे रूपान्तराद्युत्पादे च तादृशसुवर्णस्य प्रतिबन्धकत्वकल्पनयापि सम्पादयितुं शक्यस्तथापि सिद्धान्तमात्रमनुसृत्य सुवर्णादेस्तैजसत्वमभिहितमिति ध्येयम्। ननु सुवर्णादेस्तैजसत्वे जारितस्य तस्य मधुरादिरसाद्यनुभवो न स्यात् तेजसो नीरसत्वात् अत आह तत्रेति। वस्तुतः पीत एव जारितसुवर्णे रसाद्युपलब्धिः, स च पार्थिवत्वात् सरस एवेति न तत्र माधुर्य्याद्यनुपपत्तिरिति द्रष्टव्यम् इति। [तेजः]।

सूक्तिदीपिका

तमन्तर्भाव्येत्यादि—तथाहि तेज इतरेभ्यो भिद्यते तेजस्त्वाभिसम्बन्धादित्यादिरूपेण तेजस्त्वाभिसम्बन्धं हेतूकृत्येत्यर्थः। एतेन ल्यब्लोपे पञ्चम्युपपादयितुं शक्या भवति। परे तु पक्षतावच्छेदकताघटकसंसर्गतया तेजस्त्वप्रतियोगिकसमवायसम्बन्धनिवेशः करणीयः, तथात्व एव तदन्तर्भाविण तेजसः पक्षीकरणार्थसामञ्जस्यात्। अन्यथा सम्बन्धान्तरेण तेजस्त्ववतः पक्षत्वे अव-

च्छेदावच्छेदेन इतरभेदस्य साध्यत्वे बाधितत्वादिना प्रकृतहेतोरसाधकत्वापत्तेः, प्रागुक्तपृथिव्यादिसन्दर्भेऽपि यथायथं तथा व्याख्यानमूहनीयमित्याहुः। इ पिप्स्वित्यादीनां पूर्ववदेव तात्पर्य्यादिकमवसेयम्। उष्णत्वेति—उष्णस्पर्शेत्यर्थः। तेन उष्णस्पर्शसमानाधिकरणं समवायघटितसामानाधिकरण्यसंसर्गेण उष्णस्पर्शविशिष्टं वा शुक्लरूपमेव तेजसो लक्षणं बोध्यम्। अत एवेति शुक्लरूपवत्त्वमात्रस्य स्फटिकादौ अतिप्रसङ्गरूपादित्यर्थः। भास्वरश्चेतीति—तेन भास्वरवत्त्वमेव तेजसो लक्षणमवधेयम्, न तु शुक्लरूपान्तर्भावेणापि, भास्वरत्वस्य तेजोरूपमात्रगतजातिविशेषतया शुक्लरूपांशस्य वैयर्थ्यात्। 'भास्वरत्वस्य तादृशजातित्वे भगवदुदयनाचार्य्यसम्मतिरप्यस्ति, यदुक्तं,—'भास्वरत्वञ्च सामान्यविशेषः, स च रूपान्तरप्रकाशकत्वेन व्यज्यते, तद्रूपं तेजस एव, तेन भास्वररूपं तेज इति लक्षणार्थं' इति। अत्र रूपमिति परिचायकमात्रं बोध्यम्, अन्यथा व्यर्थविशेषणत्वात्। जगदीशमते शुक्लरूपवत्त्वमिति प्रथमाकाङ्क्षायां, निष्कर्षे भास्वररूपवत्त्वमित्येव आयाति। उदयनाचार्य्यास्तु 'शुक्लेति स्वरूपकथनम्' इत्युक्त्वा न शुक्लरूपवत्त्वं वैधर्म्यं, परं भास्वररूपवत्त्वमित्येवेति सूचयन्ति।

उष्णान्येत्यादि—अत्र वैशिष्ट्यं स्वरूपसमवायोभयघटितसामानाधिकरण्यसम्बन्धेन तादृशाभावविशिष्टत्वम्, नातः कालिकेन उष्णान्यस्पर्शाभावविशिष्टशीतस्पर्शादिकमादाय जलादावतिप्रसङ्गापत्तिः।

पार्थिवत्वापत्तिरिति—योनिजत्वस्य पार्थिवत्वव्याप्यतया आपाद्यव्याप्यापादकवत्तानिश्चयस्य आपत्तौ कारणत्वेन तैजसदेहे 'यद्ययं योनिजः स्यात् पार्थिवः स्या'दित्यापत्तिः सम्भवतीति भावः। प्रागुक्तजलग्रन्थे जलीयदेहे पार्थिवत्वापत्तिरपीत्यमवसेया। आदित्यलोकमधितिष्ठतस्तैजसदेहस्य चक्षुस्त्वचोः सन्निकर्षाभावेन प्रत्यक्षप्रमाणादसिद्धावपि अनुमानेन तैजसदेहः साध्यः। तच्चानुमानं—'तैजसत्वं शरीरसमवायिवृत्ति द्रव्यारम्भकनित्यवृत्तिजातित्वा'दित्येवं पूर्व्वोक्तरीत्या बोध्यम्।

इन्द्रियं चक्षुरिति—तैजसमिन्द्रियं चक्षुरित्यर्थः। ननु चक्षुषस्तैजसत्वं कथं सिध्यतीति चेत् भास्वररूपं स्वाश्रयजातीयकरणकानुभवग्राह्यं प्रतिनियतेन्द्रियग्राह्यशब्दान्यगुणत्वात् गन्धादिवदित्यनुमानेनैव तत्सिद्धिः।

उदयनाचार्य्यास्तु—'यद् गन्धाद्यव्यञ्जकत्वे सति, रूपस्य व्यञ्जकमिन्द्रियं तत्तैजस'मित्यादिना प्रकारान्तरेण चक्षुषस्तैजसत्वमुपपादयन्ति।

काष्ठादावित्यादि—तथाहि काष्ठादिज्वलनस्य तदाश्रयीभूताग्निसम्पर्कोपाधिकतया न ऊर्द्ध्वज्वलनस्वभावत्वमतो न काष्ठादौ व्यभिचारः। न चेत्यादिः—अयःपिण्डादिगतवह्नेरूर्द्ध्वज्वलनाभावादिति भावः। तादृशजातिमत्त्वनिवेशे तु तत्रापि तेजस्त्वजातेः सत्त्वेनादोषः। समयभेदेनेति—शीतग्रीष्मादिभेदेनेत्यर्थः। तथाहि शीतसमये तप्तस्य तेजसः शीतनिवारकतया सुखसामर्थ्यम्, ग्रीष्मे तस्यैव पुनस्तापवर्द्धकतया दुःखसामर्थ्यमित्यादि।

ननु चतुर्धा तेजसो विभागमङ्गीकृत्य सुवर्णादिकमाकरजं तेज इत्युक्तं स चायं विभागः सुवर्णादौ तेजस्त्वरूपसामान्यधर्म्मासिद्ध्या असिद्धः सामान्यधर्म्मावच्छिन्नानां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनस्यैव विभागपदार्थत्वादिति, स्वरूपासिद्ध्यादिश्च प्रागुपक्रान्तव्यावृत्तिसाध्यकहेताविति, चेन्न सुवर्णं तैजसं असति प्रतिवन्धके अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानद्रवत्वाधिकरणत्वादित्याद्यनुमानेन तत्सिद्धेः। परे तु अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिवन्धकद्रवद्द्रव्यान्तरसंयुक्तः अत्यन्ताग्निसंयोगे सत्यपि पूर्व्वरूपविजातीयरूपानधिकरणत्वादित्येवं सुवर्णस्य पार्थिवेतरतेजःस्वरूपतां कल्पयन्ति। तथाविधस्य पृथिवीजलभिन्नस्य तेजस्त्वनियमात्। अत एव किरणावल्यामुदयनाचार्य्याः—'तदिदं सुवर्णादि निरन्तरं ध्मायमानमपि न पूर्व्वरूपं जहाति, न च रूपान्तरमापद्यते, तेन जलवदपार्थिवत्वमवधार्य्यते। तेनैव च द्रव्यान्तरेण प्रतिवद्धत्वादुपष्टम्भकोऽपि पार्थिवभागः सदृशरूप एवानुवर्त्तते। यत्तु पुटपाकादिना रक्तसारता दृश्यते, तन्मिश्रीभूताभिभावकतत्तद्द्रव्योपगमादिति युक्तमुत्पश्यामः। तदयं प्रयोगः—सुवर्णादि न पार्थिवम् अत्यन्तानलसंयोगेऽप्यपरावर्त्तमानरूपवत्त्वात् जलवत्। तैजसञ्चैतत् पार्थिवाप्याभ्यामन्यत्वे सति रूपवत्त्वात् सूर्य्यालोकवत्। एतेन पारदादि व्याख्यातम्'। इति प्राहुः। अस्य विस्तरस्तु किरणावल्यादौ समनुसन्धेयः। यद्यपीत्यादिग्रन्थेन सिद्धान्तमात्रमनुसृत्येति ग्रन्थेन च जगदीशस्य मते सुवर्णस्य तैजसत्वव्यवस्थापकयुक्तौ न निर्भर इत्यपि समुन्नेतुं शक्यते। अन्यथा सिद्धान्तमात्रेत्यत्र मात्रशब्दस्य वैयर्थ्यापत्तेः। सुवर्णस्य पृथिवीतेजोभिन्नद्रव्यत्वमपि

केचिदङ्गीकुर्व्वन्तीति पदार्थदीपिकायामुपलभ्यते, तत्तु निरुक्तयुक्त्या निराकार्य्यम्।

अत्रेदमवधेयं—भाष्यकारादीनां मते रत्नापरसंज्ञकानां मणीनां पार्थिवत्वमुपलभ्यते, न तैजसत्वं, विश्वनाथादयस्तु—'एवं रत्नकिरणादौ च पार्थिवस्पर्शेनाभिभवात् चक्षुरादौ च अनुद्भूतत्वादग्रह' इति वदन्तः रत्नानां तैजसत्वमेव समनुमन्यते। न च तत्र रत्नपदेन सुवर्णादिकं प्रत्येतव्यं मुक्तावलीप्रभाकारैरादिपदेन विशिष्य सुवर्णपरिग्रहात्। अनन्तरमेव तत्रैव 'वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रह' इति सन्दर्भस्य च विरोधस्य विशेषतो दत्तहस्तत्वादिति समासः।

ভাষ্যতাৎপর্য্য

জলনিরূপণের পর তেজোনিরূপণ-প্রসঙ্গে প্রথমতঃ তেজের স্বরূপ নির্দ্দেশ আবশ্যক বলিয়া গ্রন্থকার যাহাতে তেজস্ত্ব জাতির সম্বন্ধ আছে, তাহাকেই তেজ বলিয়াছেন। কেহ বলেন যে প্রকৃত অনুমিতির প্রসঙ্গে পক্ষতাবচ্ছেদকরূপে তেজস্ত্বের সম্বন্ধ সমবায় নিবেশ করিতে হইবে, তাহা না হইলে অন্য সম্বন্ধে তেজস্ত্ব পক্ষতাবচ্ছেদক ধরিয়া বাধপ্রভৃতি দোষ হইতে পারে, তাহাতে হেতুর সাধ্যসাধনে ক্ষমতা শিথিল হইয়া যায় ইত্যাদি। পৃথিবী প্রভৃতির স্থলেও ঐরূপ অর্থ বুঝিতে হইবে।

জন্য-উষ্ণস্পর্শের সমবায়িকারণতাবচ্ছেদকরূপে তেজস্ত্ব জাতির সিদ্ধি হইয়া থাকে। পরে জন্যতেজের সমবায়িকারণতাবচ্ছেদকরূপে সিদ্ধ তেজস্ত্বজাতি পরমাণুতেও সিদ্ধ হয়। উক্ত তেজঃপদার্থে রূপ, স্পর্শ, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ, বিভাগ, পরত্ব, অপরত্ব, দ্রবত্ব ও সংস্কার এই সকল গুণ বর্ত্তমান থাকে। পৃথিবী ও জলে যেরূপে উক্ত গুণগুলির সিদ্ধি করা হইয়াছে, তেজেও সেই রূপেই উক্ত গুণগুলির সিদ্ধি করিতে হইবে।

এখন দেখিতে হইবে যে কিরূপে উক্ত গুণগুলি পৃথিবী ও জলে থাকিয়াও তেজের বৈধর্ম্ম্য হইতে পারে, ঘটাদি পার্থিববস্তু ও জলপদার্থে যখন প্রত্যক্ষতঃ ও অনুমানতঃ রূপাদির সত্তা সিদ্ধ আছে, তখন উক্ত গুণদ্বারা তেজে ইতরভেদের

সাধন একান্ত অসম্ভব, এই জন্ম পৃথিবী প্রভৃতির রূপাদি অপেক্ষা যে তেজের রূপাদিতে বৈলক্ষণ্য আছে, তাহার অনুসন্ধান করিতে হইবে, তাহা এই,—পৃথিবীতে শুক্ল-পীতাদি নানাবিধ রূপ থাকে, জলে একমাত্র শুক্লরূপ থাকে, তেজের রূপও কেবল শুক্ল। তাহা হইলে কেবল শুক্লরূপ বলিলেও জলের রূপের ব্যাবর্ত্তন করা চলে না, কিন্তু ভাস্বরশুক্লরূপবত্ত্ব তেজের সাধর্ম্ম্য বলিতে হইবে। শুক্লরূপ ভাস্বর ও অভাস্বর দুই প্রকার আছে, তন্মধ্যে পৃথিবী ও জলের শুক্লরূপ অভাস্বর এবং তেজের শুক্লরূপ ভাস্বর। অতএব ভাস্বরশুক্লরূপবত্ত্ব পৃথিবী ও জলে নাই, অথচ তেজে আছে, এই জন্য উহাকেই তেজের সাধর্ম্ম্য বলা যাইতে পারে। ভাস্বররূপ অপররূপের প্রকাশক হয় বলিয়া রূপান্তর প্রকাশের জনকতাবচ্ছেদকরূপে কেবল তেজের রূপেই ভাস্বরত্ব নামে একটী জাতি সিদ্ধ হইয়া থাকে. উক্ত জাতিযুক্ত ভাস্বররূপ তেজের সাধর্ম্ম্য হইলেও ভাস্বরবত্ত্ব ধর্ম্মই সাধর্ম্ম্যরূপে উল্লেখ করা কর্ত্তব্য, কারণ ভাস্বররূপবত্ত্ব বলিলে রূপপদ ব্যর্থ হইয়া পরে।

এই রূপ উষ্ণস্পর্শবত্ত্ব তেজের সাধর্ম্ম্য। কেবল স্পর্শবত্ত্ব পৃথিবীপ্রভৃতিতেও থাকে বলিয়া উহাদ্বারা ইতরের ভেদ সাধন করা যায় না, এই জন্য উষ্ণ-বিশেষণ দ্বারা স্পর্শকে বিশেষ করিতে হইবে। জলের স্বভাবতঃ শীতস্পর্শ, তাহাতে যে কদাচিৎ উষ্ণস্পর্শের উপলব্ধি হয়, উহা তেজের সংযোগবশতই হইয়া থাকে, অতএব উষ্ণ-স্পর্শবত্ত্ব জলাদিতে না থাকায় ব্যভিচার হইবে না। পৃথিবী ও বায়ুর স্পর্শ অনুষ্ণ ও অশীত অর্থাৎ উষ্ণও নহে, শীতও নহে। তাহাতেও যে কদাচিৎ শীত ও উষ্ণস্পর্শের উপলব্ধি হয়, উহা তেজের সংযোগবশতই হইয়া থাকে, অতএব উহা তেজেরই স্পর্শ, পৃথিবী বা বায়ুর নিজ স্পর্শ নহে, এইজন্য পৃথিবী ও বায়ুতেও ব্যভিচারের আশঙ্কা নাই। ভাষ্যকারের এবশব্দের তাৎপর্য্য অনুসন্ধান করিয়া কেহ বলেন যে—উষ্ণভিন্ন স্পর্শের অভাববিশিষ্ট স্পর্শবত্ত্বই তেজের সাধর্ম্ম্য, উহা সমীচীন নহে, কারণ দুইটী অভাবঘটিত হওয়ায় উহা গুরুতর ধর্ম্ম বলিয়া উষ্ণস্পর্শবত্ত্বকেই সাধর্ম্ম্য বলা উচিত।

ঐরূপ নৈমিত্তিকদ্রবত্ববত্ত্ব তেজের বৈধর্ম্ম্য। দেখা যায় যে সুবর্ণাদি তেজঃপদার্থ অগ্নিসংযোগে দ্রবীভূত:হইয়া থাকে, অতএব উক্ত ধর্ম্ম তেজের বৈধর্ম্ম্য হইতে পারে। এখন আপত্তি হইতেছে যে নৈমিত্তিকদ্রবত্ব যেরূপ তেজে আছে, ঐরূপ

পৃথিবীতেও আছে বলিয়া উক্ত ধর্ম্ম কিরূপে তেজের বৈধর্ম্ম্য অর্থাৎ ইতরব্যাবর্ত্তক ধর্ম্ম হইতে পারে, এবং বহ্নিপ্রভৃতি তেজঃপদার্থে নৈমিত্তিকদ্রবত্ব না থাকায় বহ্নি-প্রভৃতি তেজে অব্যাপ্তি হয়, তাহারই বা কিরূপে বারণ করা যায়, তাহার উত্তরে বলিতে হইবে যে, এস্থলে নৈমিত্তিকদ্রবত্ববত্বপদের অর্থ নৈমিত্তিকদ্রবত্ববদ্‌বৃত্তিভাস্বররূপসমানাধিকরণদ্রব্যত্বব্যাপ্যজাতিমত্ত্ব, অর্থাৎ যে দ্রব্যত্ব-ব্যাপ্য জাতি নৈমিত্তিকদ্রবত্বের অধিকরণে থাকিয়া ভাস্বররূপের অধিকরণে বর্ত্তমান হয়, তাদৃশ জাতিমত্ত্ব, উক্তরূপ জাতি তেজস্ত্ব. অতএব সকল তেজঃপদার্থেই উক্তরূপ জাতি থাকায় অব্যাপ্তির আশঙ্কা নাই, এবং পৃথিবীতে নৈমিত্তিকদ্রবত্ব থাকিলেও ভাস্বররূপ না থাকায় পৃথিবীত্বজাতি উক্ত জাতিপদে ধরা সম্ভব হইবে না, তেজস্ত্বজাতিই উক্ত জাতিপদে ধরিতে হইবে, কিন্তু তেজস্ত্ব-জাতি পৃথিবীতে থাকে না, অতএব অতিব্যাপ্তিরও বারণ হইল। উৎপত্তির অনন্তর ক্ষণেই যে তেজ নষ্ট হইয়া যায়, তাহাতে কোনও গুণের উৎপত্তি সম্ভব না হওয়ায় নৈমিত্তিকদ্রবত্ব থাকিতে পারে না বলিয়া উহাতেও আর অব্যাপ্তির সম্ভাবনা থাকিল না, কারণ তেজস্ত্বজাতি উৎপত্তিক্ষণেও উহাতে আছে বলিয়াই ধর্ম্ম তাহাতে অবাধে থাকিতে পারে।

উক্ত তেজ নিত্য ও জন্য ভেদে দুই প্রকার। তেজের পরমাণুই নিত্য তেজ এবং দ্ব্যণুক হইতে আরম্ভ করিয়া সকল তেজই জন্যতেজ। জন্যতেজ শরীর ইন্দ্রিয় ও বিষয় এই তিন ভাগে বিভক্ত। তৈজস শরীর যোনিজ নহে, উহা অযোনিজ, ঐ দেহ আদিত্য-লোকে প্রসিদ্ধ। ঐ তৈজসদেহ কেবল মাত্র তেজঃসাংযোে উৎপন্ন নহে, কারণ কেবল তেজোদ্বারা উৎপন্ন শরীর ভোগের প্রতি উপযোগী হইতে পারে না, এইজন্য পার্থিব অবয়বের সাহায্য অবলম্বন করিতে হয়। কিন্তু তৈজস দেহের উপাদান একমাত্র তেজ, পার্থিব অংশ তাহার নিমিত্ত-কারণ, ইহাই কেবল বিশেষ। উক্তরূপ বিষয়ের বিবরণ জল-প্রকরণে বিশেষরূপে করা হইয়াছে।

তেজের অংশদ্বারা নিৰ্ম্মিত চক্ষুরিন্দ্রিয়ই তৈজস ইন্দ্রিয়। উহা রূপের প্রত্যক্ষ সাধন করিয়া থাকে। উক্ত ইন্দ্রিয় জলাদি অবয়বদ্বারা অনভিভূত তেজের অংশ দ্বারাই গঠিত হয়, যাহাদের নেত্র সর্ব্বদাই জলাদিদ্বারা অভিভূত থাকে, তাহাদের চক্ষুরিন্দ্রিয়ের সত্তাবিষয়ে কোনও প্রমাণ নাই, ইহাই বুঝাইবার জন্য তেজের

অবয়বে জলাদিদ্বারা অনভিভূত এই বিশেষণ দেওয়া হয়। চক্ষুর কোটরের মধ্যে যে একটী গোলক দেখিতে পাওয়া যায়, উহা চক্ষুরিন্দ্রিয় নহে, চক্ষুর তারার মধ্যে ইন্দ্রিয়ের অগোচররূপে বর্ত্তমান প্রত্যক্ষ-সাধন বস্তুই চক্ষুরিন্দ্রিয়, কারণ গোলকটী অবিকৃতভাবে থাকিলেও অনেক স্থলে দৃষ্টির ব্যাঘাত হইয়া থাকে, যদি উহাই ইন্দ্রিয় হয়, তবে চক্ষুষ্মান্ ব্যক্তির সহিত দুষ্টচক্ষু ব্যক্তির পার্থক্য করা অসম্ভব হয়।

তৈজস বিষয় চারি প্রকার—ভৌম, আকরজ, দিব্য, ও উদর্য্য। কাষ্ঠরূপ দাহ্য বস্তুর সাহায্যে যে বহ্নিরূপ তেজ উৎপন্ন হয়, উহাই ভৌম তেজ। উহার স্বভাবতঃ উর্দ্ধদিকে জ্বলন হইয়া থাকে এবং উহা বস্তুর স্বেদন ও পচন প্রভৃতির পক্ষে বিশেষ উপযোগী। ঋতু প্রভৃতি সময়ভেদে উক্ত ভৌম তেজ সুখ ও দুঃখের উৎপাদন করিয়া থাকে। যেমন শীতকালে অগ্নির সাহায্যে সুখের উৎপত্তি হয়, সেই রূপ গ্রীষ্মকালে উহার সাহায্যে তাপের বৃদ্ধিহেতু দুঃখেরও উৎপত্তি হইয়া থাকে।

সূর্য্যতেজ ও বিদ্যুৎপ্রভৃতি দিব্য তেজ। উহা জলশোষণাদি কার্য্য করিয়া থাকে। খদ্যোতাদির তেজকেও দিব্য-তেজের মধ্যে জগদীশ স্বীকার করিয়াছেন।

ভুক্ত বস্তুর রসাদিরূপে পরিণতির কারণ জঠরানলকে উদর্য্য তেজ কহে। উহাই ভুক্ত বস্তুকে রস, মল ও ধাতুপ্রভৃতিরূপে পরিণত করিয়া দেয়।

সুবর্ণাদি ধাতুকে আকরজ বা খনিজ তেজ কহে।—কেহ কেহ বলেন যে,—সুবর্ণ যখন গুরুত্ব ও পীত-বর্ণযুক্ত তখন উহা পৃথিবী, তেজ নহে, কারণ গুরুত্ব কখনও তেজে থাকে না এবং তেজ হইলে উহা ভাস্বরশুক্লরূপযুক্ত হইত, পীতবর্ণযুক্ত হইতে পারিত না, পীতবর্ণ একমাত্র পৃথিবীতেই থাকিতে পারে। তাহা সমীচীন নহে, কারণ 'অত্যন্ত অনলসংযোগ করিলেও কোনও প্রতি-বন্ধক ব্যতিরেকে যাহার দ্রবত্ব উচ্ছিন্ন হয় না, তাহাই তেজ' এইরূপ ব্যাপ্তি স্থিরীকৃত আছে, যেহেতু পার্থিব বস্তু বা জলীয় বস্তুর অত্যন্ত অনলসংযোগে দ্রবত্ব নষ্ট হইয়া যায়, সুবর্ণাদি খনিজ ধাতুপদার্থের ঐরূপ অত্যন্ত অনল-সংযোগে দ্রবত্ব নষ্ট হয় না, অতএব উহাও তেজঃপদার্থ, এইরূপ অনুমান করা যাইতে পারে। অন্যান্য প্রকারেও কেহ কেহ সুবর্ণাদিতে তৈজসত্বসিদ্ধি করিয়া থাকেন।

এখন আপত্তি হইতেছে এই যে, সুবর্ণাদি তৈজসপদার্থ হইলে জারিত সুবর্ণে কি করিয়া মধুর রসাদির অনুভব হইতে পারে, রস একমাত্র পৃথিবী ও জলেই থাকে, তেজে রস নাই। তাহার উত্তর এই যে,—উহা জারিত সুবর্ণের রস নহে, পরন্তু জারিত সুবর্ণের সহিত যে পার্থিব ভাগ যুক্ত, উহা তাহারই রস। অতএব কোনও অনুপপত্তি নাই। সুবর্ণাদি তেজঃপদার্থ বলিয়াই আবহমান কাল হইতে সুবর্ণ রৌপ্য ও তাম্র-পিত্তলাদির পাত্র তৈজস পাত্র বলিয়া ব্যবহৃত হইয়া আসিতেছে।

কেহ কেহ সুবর্ণাদি ধাতু দ্রব্যকে পৃথিব্যাদি নবদ্রব্য অপেক্ষা অতিরিক্ত দ্রব্য বলিয়া থাকেন, উক্ত অনুমানদ্বারা তৈজসত্ব সিদ্ধ হওয়ায় সে সকল মত খণ্ডিত হইয়াছে।

प्रशस्तपादभाष्यम्

वायुत्वाभिसम्बन्धात् वायुः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व(१)संस्कारवान्। स्पर्शोऽस्य अनुष्णाशीतत्वे सति अपाकजः। गुणविनिवेशात् सिद्धेः (२)। अरूपिषु अचाक्षुषवचनात् सप्त संख्यादयः। तृणकर्म्मवचनात् संस्कारः।

स चायं द्विविधः, अणुकार्य्यभावात्। तत्र कार्य्यलक्षणश्चतुर्व्विधः, शरीरम्, इन्द्रियं, विषयः, प्राण इति। तत्र अयोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्। इन्द्रियं सर्व्वप्राणिनां स्पर्शो-

(१) वेगवान् इति पाठान्तरम्।

(२) गुणविनिवेशाधिकारे तत्सिद्धेः इति पाठान्तरम्।

पलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं सर्व्वशरीरव्यापि त्वगिन्द्रियम्। विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्शशब्दधृतिकम्पलिङ्गः तिर्य्यग्गमनस्वभावकः मेघादिप्रेरणधारणादिसमर्थः। तस्य अप्रत्यक्षस्यापि नानात्वं सम्मूर्च्छनेनानुमीयते। सम्मूर्च्छनं पुनः समानजवयोर्विरुद्धदिक्क्रिययोर्वाय्वोः सन्निपातः। सोऽपि तृणादिगमनेनानुमितेन सावयविनोरूर्द्ध्वगमनेनानुमीयते। प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदात् प्राणापानादिसंज्ञां लभत इति।

[स्पर्शवान् वायुः—२अ-१आ-४सू। अरूपिष्वचाक्षुषाणि—४अ-१आ-१२सू। तृणे कर्म्म वायुसंयोगात्—५अ-१आ-१४सू। सदकारणवन्नित्यं-४अ-१आ-१सू। तस्य कार्य्यं लिङ्गं—४अ-१आ-२सू। कारणभावात् कार्य्यभावः—४अ-१आ-३सू। अनित्य इति विशेषतः प्रतिषेधभावः—४-अ-१आ-४सू। अविद्या—४अ-१आ-५सू। अद्रव्यवत्त्वेन द्रव्यम्—२अ-१आ-११सू। क्रियावत्त्वाद् गुणवत्त्वाच्च—२अ-१आ-१२सू। अद्रव्यत्वेन नित्यत्वमुक्तम्—२अ-१आ-१३सू। तत् पुनः पृथिव्यादिकार्य्यद्रव्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकं—४अ-२आ-१सू। नित्यं परिमण्डलम्—७अ-१आ-२०सू। अविद्या च विद्यालिङ्गम्—७अ-१आ-२१सू। अनियतदिग्देशपूर्व्वकत्वात्—४अ-२आ-६सू। धर्म्मविशेषाच्च—४अ-२आ-७सू। समाख्याभावाच्च—४अ-२आ-८सू। संज्ञाया आदित्वात्—४अ-२आ-९सू। सन्त्ययोनिजाः—४अ-२आ-१०सू। वेदलिङ्गाच्च—४अ-२आ-११सू। तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात्—८अ-२आ-६सू। स्पर्शश्च वायोः—२अ-१आ-९सू। न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः—२अ-१आ-१०सू। सामान्यतो दृष्टाच्चाविशेषः—२अ-१आ-१६सू।

सत्यपि द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः—४अ-१आ-७सू। वायोर्वायुसम्मूर्च्छनं नानात्वलिङ्गम्—१अ-२आ-१४सू। वायुसन्निकर्षे प्रत्यक्षाभावाद्दृष्टं लिङ्गं न विद्यते—२अ-१अ-१५सू। इत्येतान्यालम्बन-सूत्राणि।]

जगदीशसूक्तिः

वायुत्वेति—वायुत्वं नाम जातिभेदः। तस्याभिमतसम्बन्धं समवायमन्तर्भाव्य वायुः पञ्चोक्तत इति शेषः। न च तादृशजातौ मानाभावः स्पर्शविशेषस्य वह्निमात्रस्य वा जनकतावच्छेदकत्वेन तत्सिद्धेरिति भावः। वायोर्द्रव्यत्वसिद्ध्यर्थं गुणानाह स्पर्शेत्यादि। स्पर्शवत्त्वमात्रं पृथिव्यादौ गतमत आह स्पर्शोऽस्येति। अस्य वायोः अनुष्णाशीतत्वे सति अपाकजः साधर्म्यमित्यर्थः।

अत्र अनुष्णपदेन तेजसः, अशीतपदेन जलस्य, अपाकजपदेन पृथिव्या व्युदासः। न च अवयविनां घटादीनां स्पर्शस्य पाकाजन्यत्वात्तत्रातिव्याप्तितादवस्थ्यम् अपाकजपदेन पाकजस्पर्शवदवृत्तिद्रव्यविभाजकधर्मसमानाधिकरणस्य पृथिव्यवृत्तेर्वा विवक्षितत्वादिति भावः। स चेति निरुक्तस्पर्शश्चेत्यर्थः। वायुः स्पर्शवानिति सूत्रसिद्ध इत्यर्थः। संख्यादिषु सूत्रकारसम्मतिमाह अरूपिष्विति। अरूपिषु नोरूप-यावद्द्रव्येषु अचाक्षुषसंख्यादिवचनात् वायौ सप्त संख्यादयः सिद्धा इति विभक्तिव्यत्यासेनान्वयः। यद्यपि संख्यादीनां प्रत्येकं वायुभिन्ने द्रव्ये अतिप्रसक्तं, तथापि नोरूपस्पर्शवद्वृत्तित्वेन विशेषितमेव संख्यापृथक्त्वसंयोगविभागानां प्रत्येकधर्मवत्त्वं साधर्म्यम्। परत्वापरत्वसंस्कारास्तु नोरूपस्पर्शवद्वृत्तित्वेनैव विशेषितास्तथेत्यदोषः।

तृणेति—तृणे कर्म वायुसंयोगादिति सूत्रकारवचनात् संस्कार इत्यर्थः। तथाच नोदनाद्यजन्यं तृणादिकर्म वेगवद्द्रव्याभिघातजं विलक्षणक्रियात्वादित्यनुमाने तस्य तात्पर्य्यादिति भावः।

ननु यद्यसौ अणुरेव, तर्हि तदीयस्पर्शो न ग्राह्यः स्यात् अणुगत-स्पर्शस्य अतीन्द्रियत्वनियमात्। अथ अणुभिन्न एव, तदा अवयव-धारायामनवस्था अणुभिन्नमूर्त्तानां सावयवत्वनियमादत आह—स चायमिति। अयं वायुः द्विविधः अणुलक्षणः अणुभिन्नस्वरूपश्च। तत्र तयोर्मध्ये। चतस्रो विधा दर्शयति शरीरमिति। ननु वायवीयदेहस्य योनिजत्वे पृथिवीत्वापत्तौ वायुत्वव्याघात इत्यत आह तत्र अयोनिज-मेवेति। तत्र वायौ शरीरमित्यग्रेतनेनान्वयः। सप्तम्यर्थः समवेतत्वं, तत्र तेषु शरीरादिषु मध्ये इत्यर्थ इत्याचार्य्याः। तादृशदेहे योग्या-नुपलब्धिबाधं निरस्यति मरुतां लोक इति। वायुत्वं शरीर-[सम-वायि-] वृत्ति द्रव्यारम्भकनित्यवृत्तिजातित्वादित्यनुमानादेव तत्र तत्-सिद्धेरिति भावः।

ननु पार्थिवान्यस्य भोगावच्छेदकस्य पार्थिवावयवोपष्टम्भ्यत्वनियमात् तदनुपष्टब्धस्य कथं भोगावच्छेदकत्वमत आह पार्थिवेति। चोऽव-धारणे पार्थिवावयवोपष्टम्भादेवेत्यर्थः। उपभोगस्य समर्थम् अव-च्छेदकम्।

वाय्वारभ्यमिन्द्रियमाह—इन्द्रियमिति।—सर्व्वप्राणिनां पार्थिवा-द्यादिसर्व्वजातीयप्राणिनां स्पर्शग्राहकं वाय्ववयवैरारब्धं त्वगिन्द्रियं त्वगिन्द्रियसंज्ञकमित्यर्थः। कुष्ठाद्युपहतचर्म्मणां स्पर्शग्राहकेन्द्रियत्वे मानाभावादाह—पार्थिवाद्यनभिभूतैरिति। ननु त्वगिन्द्रियं यदि करचरणादीनामेकमात्राधिष्ठेयं तदान्ययुक्तदशायां घटादेः स्पार्शनं न स्यादत आह—सर्व्वशरीरव्यापीति।—सर्व्वावयवावच्छेदेन शरीरवृत्ती-त्यर्थः। केशदन्तनखलोम्नां न शरीरावयवत्वं देहादुत्तरमेव तेषामुत्-पादस्य आगमसिद्धत्वात् अतो नातिप्रसङ्गः।

विषयात्मकं वायुमाह—विषयस्त्विति।—उपलभ्यमानेति—साक्षात्-कारयोग्यस्पर्शाश्रयीभूत इत्यर्थः। तेन यस्य वायोः स्पर्शो नोपलभ्य-

मानस्तत्र नाव्याप्तिः। वृटेरपि स्पर्शः साक्षात्कारयोग्य एव महावायुत्वे वा तात्पर्य्यम्। वायोर्नीरूपत्वेन प्रत्यक्षासम्भवात्तत्रानुमानं मानमाह—स्पर्शेति, स्पर्शः शब्दो धृतिः कम्पश्च लिङ्गानि यस्य स तथा।

तथाहि व्यजनचलनोत्तरमनुभूयमानः पृथिव्याद्यवृत्तिस्पर्शो द्रव्याश्रितः स्पर्शत्वात् घटस्पर्शवत्। एवं पत्रादेर्मर्मरादिशब्दः सवेगस्पर्शवद्द्रव्याभिघातजः विलक्षणशब्दत्वात् दलद्वयविभागजशब्दवत्। तथा धृतिः वेगवद्द्रव्यसंयोगप्रयुक्ता अप्राणिगुरोरपतनत्वात् नौकाद्यपतनवत्। पक्षिप्रभृतेः प्रयत्नप्रयुक्ते तदपतने न व्यभिचारः। एवमश्वत्थदलादेः कम्पः सस्पर्शवेगवद्द्रव्याभिघातजः कर्म्मविशेषत्वात् दण्डाभिहतघटादिक्रियावदित्यादिप्रयोगसम्भवादिति भावः।

तिर्य्यग्गमनेति—तिर्य्यग्गमनं स्वभावोऽस्येति। कादाचित्की तु फुत्कारादेः सरलगतिविशिषसामग्रीवशादिति भावः।

मेघादीति—मेघधूलिपत्रघर्म्मादीनां प्रेरणं सञ्चारो धारणं पतनाप्रतिबन्धः आदिना शैत्याद्युपलम्भः। समर्थः अनुकूल इत्यर्थः।

सूक्तिदीपिका

आदौ वायुत्वजात्यसिद्धेः समवायमन्तर्भाव्येत्याद्यसङ्गतं स्यादत आह न चेत्यादि। स्पर्शविशेषस्येति अनुष्णाशीतत्वे सति अपाकजस्पर्शस्येत्यर्थः। अनुष्णाशीतत्वे सति अपाकजस्पर्शत्वस्य अर्थसमाजग्रस्ततया कार्य्यतावच्छेदकत्वासम्भवमनुसन्धाय आह वह्निमात्रस्य वेति। कारणान्तरसमवधानेऽपि निर्व्वातदेशे वह्नेरदर्शनेन वातसत्त्वे च तद्दर्शनेन अन्वयतो व्यतिरेकतश्च वह्नित्वावच्छिन्नं प्रति वायुत्वेन कारणत्वं कल्पनीयं, तत्रापि वायुत्वस्य जातित्वे लाघवमिति लाघवज्ञानसहकारेण सिद्धं वायुत्वस्य जातित्वमिति भावः। अपाकजः अपाकजः स्पर्श इत्यर्थः। व्यदास इति तेजसः स्पर्शस्य उष्णत्वात् जलस्पर्शस्य शीतत्वात् पृथिवीस्पर्शस्य पाकजत्वात् तत्र तत्र न लक्षणातिप्रसङ्ग

इति भावः। केचित्तु स्पर्शविशेषस्येत्यस्य पृथिव्यादिस्पर्शव्यावृत्तवैजात्यावच्छिन्नस्येत्यर्थः। तादृशवैजात्यञ्च रूपवद्द्रव्यसंयोगसमानकालीनप्रत्यक्षविषयस्पर्शेषु प्रत्यक्षतः सिध्यति।

ननु अपाकजस्पर्शत्वं पाकाजन्यस्पर्शत्वं, तच्च वैशेषिकमते अवयविस्पर्शमात्रेष्वेव, तन्मते अवयविनि पाकस्य अस्वीकारात् तज्जन्यस्पर्शस्य अवयविनि सम्पादयितुमशक्यत्वात्। तदुक्तं विश्वनाथेन—'एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तत्रापि परमाणौ स्यात् पाको वैशेषिके नये।' इति एतदाकाङ्क्षायामाह न चेत्यादि। पाकजेत्यादि—पृथिव्यामतिव्याप्तिवारणाय अवृत्त्यन्तम्। तथाच पृथिवीत्वस्य पाकजस्पर्शवति परमाणौ वृत्तित्वेन घटादिवृत्तिस्पर्शस्य पृथिवीत्वसामानाधिकरण्येऽपि पाकजस्पर्शवदवृत्तिद्रव्यविभाजकधर्मसामानाधिकरण्यविरहात् नातिव्याप्तिरिति भावः। लाघवमभिप्रेत्याह पृथिव्यवृत्तेर्व्वेति।

अरूपिष्वित्यादि—विषयतासम्बन्धेन संख्यादिप्रत्यक्षे स्वाश्रयसमवेतत्वसम्बन्धेन उद्भूतरूपवत्त्वस्य कारणतायाः क्लृप्तया रूपरहितवायुवृत्तिसंख्यादयो न प्रत्यक्षा इति भावः। अथ तर्हि वाय्वादौ संख्यादीनां तान्त्रिकादेशमात्रसम्पाद्यत्वं परिप्राप्तमिति चेन्न युक्तिबलादेव तत्सिद्धेः। तथाहि—वायोरस्ति द्रव्यारम्भकत्वं, तच्च संख्यापरिमाणपृथक्त्वसंयोगानन्तरेण नोपपद्यते। यतो हि आरम्भकपरमाणुद्वयसंयोगात् द्व्यणुकं, द्व्यणुकत्रयेण त्रसरेणुः, त्रसरेणुचतुष्टयेन चतुरणुकम् इत्येवं क्रमेण द्रव्यारम्भः, तत्रावश्यं संख्या उपेया, द्व्यणुकपरिमाणं प्रति परमाणुद्वयगतद्वित्वसंख्यायाः त्रसरेणुपरिमाणं प्रति च द्व्यणुकत्रयगतत्रित्वसंख्यायाः कारणत्वेन अवश्यमङ्गीकार्य्यत्वात्। आरम्भकसजातीयपरिमाणस्य च आरभ्यगतसजातीयप्रकृष्टपरिमाणे जनकत्वात् विशिष्टपरिमाणशालिनैव विशिष्टपरिमाणसमवायिवस्त्वारम्भनियमादवश्यमङ्गीकार्य्यं परिमाणमपि, अन्यथा वायोः स्वल्पाधिक्यव्यवस्थानुपपत्तेः। पृथक्त्वमपि कार्य्यकारणभाववतोः पूर्व्वापरभावित्वनियमरक्षार्थमुपगन्तव्यम्। संयोगस्तु द्रव्यारम्भे सुतरामुपयुक्त एव, अवयवसंयोगमन्तरा द्रव्यारम्भस्य कथमप्यसम्भवादित्यादिकमूहनीयम्। अवयवविभागमन्तरेण संयोगनाशासम्भवात् वायवीयदेहादिनाशोपपादनाय

विभागः मूर्त्तत्वोपपत्तये च परत्वापरत्वे स्वीकर्त्तव्यानि। तदुक्तं किरणावल्यामुदयनेन-'संख्यापरिमाणपृथक्त्वसंयोगैर्विना द्रव्यारम्भानुपपत्तेः, विभागेन विना संयोगविनाशानुपपत्तौ आरब्धद्रव्यस्य विनाशानुपपत्तेः परत्वापरत्वाभ्यां विना संयोगाल्पीयस्त्वभूयस्त्वासम्भवेन मूर्त्तत्वानुपपत्तेरिति'।

तथापीत्यादि—तथाहि संख्यावत्त्वमात्रं न साधर्म्यं, किन्तु नीरूपस्पर्शवद्वृत्तित्वविशिष्टसंख्यावत्त्वमित्यादि। अत्र पृथिव्यादावतिप्रसक्तिवारणाय नीरूपेति। आकाशादावतिप्रसक्तिवारणाय स्पर्शवदिति। स्पर्शवत्त्वञ्च समवायेन विवक्षणीयं, तेन कालिकेन स्पर्शवत्कालसमवेत- संख्यामादाय नातिप्रसङ्गः। अनवस्थेति—उत्तरोत्तरमवयवस्वीकारप्रसङ्गेन कुत्रापि विश्रामाभावात् सर्व्वेषामेव वायूनाम् अनन्तावयवजन्यत्वेन तुल्यपरिमाणत्वापत्तिः मेरुसर्षपयोस्तुल्यपरिमाणापत्तिदोषवदुद्दाहार्य्या।

उपभोगस्येत्यादि—उपभोगः सुखदुःखसाक्षात्कारः, तत्र शरीरस्य अवच्छेदकत्वसम्बन्धेन हेतुत्वम्, अतः शरीरे उपभोगावच्छेदकत्वमेव प्रकृते उपभोगसमर्थत्वमित्याह—समर्थम् अवच्छेदकमिति। एकमात्राधिष्ठेयमिति—एकमात्राश्रितमित्यर्थः। अन्येति—त्वगिन्द्रियाधिष्ठानत्वाभिमतभिन्नपरम्। तथाहि तदवच्छेदेन त्वगिन्द्रियाभावात् त्वगिन्द्रियसम्बन्धासम्भवेन स्पार्शनानुपपत्तिरिति। त्वगिन्द्रियासम्बन्धेऽपि स्पार्शनस्य अतिप्रसक्तिदोषेण स्वीकर्त्तुमशक्यत्वात्।

ननु केशाद्यवयवावच्छेदेन त्वगभावात् कथं त्वगिन्द्रियस्य सर्व्वशरीरव्यापित्वमुपपन्नमित्यत आह केशेत्यादि। तथाहि केशादीनां शरीरावयवत्वस्यैव अभावात् तत्र तत्र त्वचोऽभावेऽपि न सर्व्वावयवावच्छेदेन शरीरवृत्तित्वहानिरिति भावः। तदुक्तमुदयनेनापि "तदवसानं शरीरं नखलोमकेशदशनानां संयोगिद्रव्यमात्रत्वम्, त्वगिन्द्रियानाश्रयत्वादित्यभिप्रायः"। इति।

तेनेति—साक्षात्कारयोग्यताघटितार्थकत्वेन इत्यर्थः। तस्यापि वायोः स्पर्शस्य साक्षात्कारयोग्यताया अनपायात् नाव्याप्तिरिति भावः। नीरूपत्वेनेत्यादि—द्रव्यप्रत्यक्षे उद्भूतरूपवत्तायाः कारणत्वेन वायौ तदभावः प्रत्यक्षाभावप्रयोजकः कारणाभावस्य कार्य्याभावप्रयोजकताया आवश्यकत्वादिति भावः। व्यञ्जनेत्यादि—तथाहि पृथिव्याद्यवृत्तिस्पर्शस्य आश्रयतायाः पृथिव्यादौ

অসম্ভবেন পৃথিবীপ্রভৃতিভিন্ন এব কশ্চিত্তদাশ্রয় উপেয়:, স এব বায়ুরিতি ভাব: ।

ননু বায়ু: প্রত্যক্ষ: প্রত্যক্ষস্পর্শাশ্রয়ত্বাৎ ঘটবদিত্যাদিনা বায়ো: প্রত্যক্ষত্ব-মনুমাতুং শক্যমিতি চেন্ন প্রত্যক্ষস্পর্শাশ্রয়ত্বেন হেতুনা প্রত্যক্ষত্বসাধনে উদ্ভূত-রূপবত্ত্বস্য উপাধিত্বাৎ। বিস্তরস্তু অন্যত্রানুসন্ধেয়: ॥

ভাষ্যতাৎপর্য্য

যাহাতে সমবায় সম্বন্ধে বায়ুত্ব জাতি থাকে তাহাই বায়ু। স্পর্শ সংখ্যা পরিমাণ পৃথক্ত্ব সংযোগ বিভাগ পরত্ব অপরত্ব ও বেগাখ্য সংস্কার এই নয়টী উহার গুণ। উক্ত গুণ আছে বলিয়াই বায়ুকে দ্রব্য বলিয়া মানিতে হইবে। সাধারণ স্পর্শবত্ত্ব প্রভৃতিকে বায়ুর সাধর্ম্ম্য বলিলে পৃথিবী প্রভৃতিতেও স্পর্শবত্ত্ব প্রভৃতি ধর্ম্ম থাকায় অতিপ্রসঙ্গ হয়, কাজেই স্পর্শবিশেষকেই বায়ুর সাধর্ম্ম্য বলিতে হইবে। তাহা এই যে অনুষ্ণ ও অশীত অপাকজস্পর্শ ই বায়ুর সাধর্ম্ম্য। অর্থাৎ যে স্পর্শ উষ্ণ বা শীত নহে, অথচ তেজঃসংযোগে উৎপন্ন হয় নাই, উক্তরূপ স্পর্শ ই বায়ুর সাধর্ম্ম্য। তেজের স্পর্শ অশীত ও অপাকজ হইলেও অনুষ্ণ নহে এইজন্য অনুষ্ণপদে তেজের নিরাস হইল, জলের স্পর্শ অনুষ্ণ ও অপাকজ হইলেও অশীত নহে, এইজন্য জলের বারণ হইল। পৃথিবীর স্পর্শ অনুষ্ণ ও অশীত হইলেও অপাকজ নহে, এইজন্য অপাকজপদে পৃথিবীর ব্যাবর্ত্তন হইয়াছে।

এখন আপত্তি হইতেছে এই যে, বৈশেষিকদর্শনের মতে পরমাণুতেই পাক হইয়া রূপান্তরাদির উৎপত্তি হয়, কিন্তু দ্ব্যণুকাদি অবয়বীতে পাক বা পাকজ-স্পর্শাদির উৎপত্তি স্বীকার করা হয় না, তবে পার্থিব ঘটাদি অবয়বীতে যে স্পর্শ আছে, উহা যেমন অনুষ্ণ ও অশীত তেমনই অপাকজ অতএব তাহাতে কিরূপে অতিব্যাপ্তি দোষ বারণ করা যায়। তাহার উত্তর এই যে, এস্থলে অপাকজপদের অর্থ,— পাক হইতে অনুৎপন্ন নহে। কিন্তু যে দ্রব্যবিভাজকধর্ম্ম পাকজ স্পর্শের আশ্রয়ে বর্ত্তমান হয় না, তাদৃশধর্ম্মসমানাধিকরণ স্পর্শ। ঘটাদিতে যে দ্রব্যবিভাজক ধর্ম্ম আছে, উহা পৃথিবীত্ব, ঐ ধর্ম্ম পরমাণুতেও থাকে বলিয়া উহা পাকজস্পর্শের আশ্রয়ে অবর্ত্তমান ধর্ম্ম নহে। উক্তরূপ ধর্ম্ম তেজস্ত্ব, বায়ুত্ব ও জলত্বই হইতে পারে, এখন অনুষ্ণ ও অশীত পদদ্বারা যদি তেজ ও জল ব্যাবর্ত্তন করা হইল, তবে

একমাত্র বায়ুই উক্তরূপ ধর্ম্মের সমানাধিকরণস্পর্শের আশ্রয়পদে পাওয়া যাইবে, অতএব আর কোনও দোষের আশঙ্কা নাই। লঘুভাবে অপাকজপদের অর্থ পৃথিবীতে অবর্ত্তমান এইরূপ করিলেও চলিতে পারে।

সামান্যতঃ সংখ্যাবত্ত্ব প্রভৃতিও বায়ুর সাধর্ম্ম্য হইতে পারে না, কারণ সংখ্যাবত্ত্ব প্রভৃতি বায়ুভিন্ন দ্রব্যেও বর্ত্তমান আছে, অতএব রূপশূন্য-স্পর্শবদ্‌বৃত্তি সংখ্যাবত্ত্ব প্রভৃতিকেই বায়ুর সাধর্ম্ম্য বলিতে হইবে। পৃথিবী, জল, তেজ ও বায়ু, এই চারিটী স্পর্শবান্ হইলেও প্রথম তিনটী রূপবান্, রূপশূন্য নহে, অতএব রূপশূন্য-স্পর্শবদ্‌বৃত্তি সংখ্যা বায়ুতেই মাত্র থাকায় অতিব্যাপ্তি হইল না। পরত্ব অপরত্ব প্রভৃতি সাধর্ম্ম্যও ঐরূপেই বিবরণ করিতে হইবে। বায়ুতে রূপ না থাকায় উহাতে যে সংখ্যা পরিমাণ প্রভৃতি গুণ আছে, উহার চাক্ষুষ হয় না, কারণ গুণের চাক্ষুষ প্রত্যক্ষে আশ্রয়ে রূপবত্ত্ব থাকা প্রয়োজন হয়।

বায়ুতে অনুমান প্রমাণ দ্বারা বেগনামক সংস্কারও সিদ্ধ হইয়া থাকে। উক্ত অনুমানের প্রণালী এইরূপ, যথা—নোদনাদিব্যতিরেকেও যে তৃণাদি পদার্থে ক্রিয়া জন্মে দেখা যায়, উহা বিলক্ষণ ক্রিয়া বলিয়া উহা বেগবদ্‌দ্রব্যের অভিঘাতেই উৎপন্ন হইয়া থাকে। বেগবৎ পৃথিবী প্রভৃতির সে স্থলে সম্ভাবনা করা যায় না, এই জন্য বায়ুকেই ঐ বেগের আশ্রয় স্বীকার করিতে হয়। এই রূপে বায়ুতে বেগাখ্য সংস্কার সিদ্ধ হয়।

উক্ত বায়ু নিত্য বা অণু ও কার্য্য এই দুইভাগে বিভক্ত। কেবল নিত্য বা অণু-পরিমাণ বায়ু স্বীকার করিলে বায়ুর স্পর্শের প্রত্যক্ষ হইতে পারে না, কারণ মহত্ত্বকে প্রত্যক্ষের প্রতি কারণ বলা হইয়াছে। কেবল জন্য বায়ু স্বীকার করিতে গেলেও অবয়বের ধারা কোনও স্থানে বিশ্রান্ত না হওয়ায় অনবস্থা দোষ ঘটে, তাহাতে ক্ষুদ্র ও মহত্তর বায়ুর একরূপতাপ্রসঙ্গ দুর্ণিবার হইয়া ওঠে। কারণ অবয়বের স্বল্পতা ও আধিক্য-প্রযুক্তই বস্তুর পরিমাণের স্বল্পাধিক্য উপপন্ন হয়, অনবস্থা দোষ হইলে আর অবয়বের স্বল্পাধিক্য কিরূপে স্থির করা যায়। সকল বস্তুই অনন্ত অবয়বজন্য বলিয়া উহার স্থিরতা থাকে না।

উক্ত কার্য্য বা জন্য বায়ু শরীর ইন্দ্রিয় বিষয় ও প্রাণভেদে চারি প্রকার। বায়বীয় শরীর অযোনিজ অর্থাৎ উহা শুক্র ও শোণিতের সম্পর্ক ব্যতিরেকেই উৎপন্ন হইয়া থাকে। ঐ বায়বীয় দেহ বায়ুলোকে প্রসিদ্ধ আছে। বায়বীয়

দেহ কেবল বায়ু দ্বারা নির্ম্মিত হইলে উহা দ্বারা ধারণ আকর্ষণ প্রভৃতি করা অসম্ভব হয় বলিয়া তাহা দ্বারা ভোগ সম্ভব হয় না, এই জন্য পার্থিব অংশের সংযোগে উহা উপভোগের যোগ্য হয় বলিতে হইবে। পরন্তু পার্থিব অংশ ঐ দেহের সমবায়ি কারণ নহে, কেবল বায়ুই উহার সমবায়ি কারণ, পার্থিব অংশাদি নিমিত্ত কারণ। তাহার যুক্তি পূর্ব্বেই বিবৃত করা হইয়াছে।

সর্ব্বপ্রাণীরই যে ইন্দ্রিয় দ্বারা স্পর্শের উপলব্ধি বা প্রত্যক্ষ হয়, তাহাই বায়বীয় ইন্দ্রিয়, উহাকে ত্বগিন্দ্রিয় বলা হয়। ঐ ইন্দ্রিয় পৃথিবী প্রভৃতি দ্বারা অনভিভূত বায়বীয় অবয়বে নির্ম্মিত। ত্বগিন্দ্রিয় সর্ব্বশরীরব্যাপী, কারণ হস্তপদাদি বিশেষ কোনও অবয়বকে ত্বগিন্দ্রিয়ের আশ্রয় বলিলে অন্য স্থানের সহিত যুক্ত ঘটাদির উক্ত ইন্দ্রিয়জন্য প্রত্যক্ষ অসম্ভব হয় অথচ যে কোনও স্থানের সহিত যোগ হইলেই ত্বগিন্দ্রিয় জন্য প্রত্যক্ষ হইতে দেখা যায়। সেই সেই স্থানে ত্বগিন্দ্রিয় না থাকিলে ঐ সকল স্থানের সহিত যুক্ত ঘটাদি পদার্থে উক্ত ইন্দ্রিয়ের সম্বন্ধ না থাকায় কিরূপে স্পার্শন প্রত্যক্ষ হইতে পারে। সর্ব্বশরীর ব্যাপিয়া ত্বগিন্দ্রিয় আছে এ কথা স্বীকার করিলে আর উক্ত দোষ হয় না। কেশ নখ দন্ত ও লোম শরীরের অবয়ব নহে, উহা শরীরের উৎপত্তির পর উৎপন্ন হইয়া থাকে, অতএব কেশাদিতে ত্বক্ না থাকিলেও উহার সর্ব্বাবয়বব্যাপিত্ব অনুপপন্ন হইবে না।

যাহাতে সাক্ষাৎকারের যোগ্য স্পর্শ আছে, তাহাই বায়বীয় বিষয়। বায়বীয় ত্রসরেণুর স্পর্শও সাক্ষাৎকারের যোগ্য বলিয়া বায়বীয় ত্রসরেণু হইতেই বায়বীয় বিষয় ধরিতে হইবে। বাস্তবিক শরীর ইন্দ্রিয় ও প্রাণ ভিন্ন বায়বীয় জন্য বস্তুমাত্রই বিষয় পদে জ্ঞাতব্য।

বায়ুতে রূপ না থাকায় বায়ু প্রত্যক্ষ হয় না বটে, কিন্তু অনুমান দ্বারা উহার সিদ্ধি হয়। বায়ুর শব্দ স্পর্শ ও পত্রাদির ধৃতি ও কম্প ঐ অনুমানের উপযোগী। প্রথমতঃ স্পর্শ দ্বারা অনুমিতি এইরূপ, যথা—স্পর্শ গুণ বলিয়া যখন দ্রব্যাশ্রিত, তখন ব্যজনচালনের পর যে পৃথিব্যাদিতে অবর্ত্তমান স্পর্শের উপলব্ধি হয়, উহাও দ্রব্যাশ্রিত, আশ্রয়ীভূত উক্ত দ্রব্য যখন পৃথিব্যাদি সম্ভব হয় না, তখন উহাই বায়ু। শব্দ দ্বারা অনুমান, যথা—মর্ম্মরাদি বিলক্ষণ শব্দমাত্রই যখন বেগযুক্ত-স্পর্শবৎ দ্রব্যের অভিঘাতে উৎপন্ন হয়, তখন পত্রাদির মর্ম্মর শব্দও কোনও বেগযুক্ত স্পর্শবৎ দ্রব্যের অভিঘাতে উৎপন্ন, কারণ উহাও বিলক্ষণ শব্দ, যেমন দলদ্বয়ের বিভাগহেতু

উৎপন্ন শব্দাদি। উক্ত বেগযুক্ত স্পর্শবৎ দ্রব্য যখন পৃথিব্যাদি নহে, কারণ তাহা হইলে পত্রের প্রত্যক্ষের ন্যায় উহারও প্রত্যক্ষ হইত, অতএব উহাই পৃথিব্যাদি ভিন্ন বায়ুপদার্থ। এই রূপ অপরাপর অনুমানও অনুসন্ধেয়।

বায়ুর বক্রগতিই স্বভাব। কদাচিৎ কোনও বিশেষ কারণে বায়ুর সরল গতি হইলেও উহা তদীয় স্বভাব নহে। বায়ুই মেঘাদিকে আকাশমার্গে চালিত করে এবং ধারণ করিয়া রাখে। বায়ু প্রত্যক্ষ যোগ্য না হইলেও সম্মূর্চ্ছন অর্থাৎ তুল্যবেগযুক্ত বিরুদ্ধ উভয়দিক্ হইতে আগত বায়ুদ্বয়ের পরস্পর মিলনরূপ ক্রিয়া দ্বারা বায়ুর নানাত্ব অনুমিত হয়। তাৎপর্য্য এই যে যখন তুল্যবেগে উভয়দিক্ হইতে বায়ু প্রবাহিত হইতে থাকে, তখন যে বায়ু পশ্চিমদিক্ হইতে প্রবাহিত হয় তাহা পত্রাদিকে পূর্ব্বদিকে লইয়া যাইতে পারে, আবার যে বায়ু পূর্ব্বদিক্ হইতে প্রবাহিত হয়, তাহা পত্রাদিকে পশ্চিমদিকে লইয়া যাইতে পারে, কিন্তু উভয় বায়ু উভয়দিক্ হইতে তুল্যবেগে প্রবাহিত হওয়ায় পত্রাদি কোনও দিকেই নীত হয় না, এই অবস্থায় দুইটী বায়ু স্বীকার না করিলে একটী বায়ুর উক্তরূপ বিরুদ্ধদিকে ক্রিয়া উপপন্ন হইতে পারে না। নানাত্ব স্বীকার করিলে উভয়ের ক্রিয়াদ্বয় পরস্পর বিরোধী হওয়ায় পত্রাদির মধ্যস্থানে অবস্থানই সম্ভব হয় ইত্যাদি। অপ্রত্যক্ষ বায়ুদ্বয়ের পরস্পর সম্মেলনও তৃণাদিগতি দ্বারা অনুমিত হইয়া থাকে।

শরীরের অভ্যন্তরে রস মল ও ধাতুর প্রেরণাদি সম্পাদক বায়ুকেই প্রাণ-সংজ্ঞায় অভিহিত করা হয়। ঐ প্রাণবায়ুই ক্রিয়াভেদে প্রাণ অপান সমান উদান ও ব্যান এই পঞ্চবিধ সংজ্ঞা প্রাপ্ত হইয়া থাকে। যে বায়ু মুখ ও নাসিকা দ্বারা নিষ্ক্রম ও প্রবেশ করে, তাহার নাম প্রাণ। যে বায়ু মল প্রভৃতিকে অধোগামী করে, তাহার নাম অপান। যে বায়ু সমতাসম্পাদন করে, তাহার নাম সমান। যে বায়ু শরীরের অভ্যন্তরস্থ বস্তুকে উর্দ্ধের দিকে উত্থাপিত করে, তাহার নাম উদান। যে বায়ু নাড়ীর মুখে বিস্তৃত হয়, তাহার নাম ব্যান। কেহ কেহ প্রাণাদি সংজ্ঞা স্থানভেদে বর্ণনা করিয়া থাকেন, তাহাদের মতেও আলোচনা করিলে উক্তরূপ ক্রিয়াভেদেই সংজ্ঞা হইয়া থাকে।

प्रशस्तपादभाष्यम् ।

इहेदानीं चतुर्णां (१) महाभूतानां सृष्टिसंहारविधिरुच्यते। ब्राह्मेण मानेन वर्षशतस्यान्ते (२) वर्त्तमानस्य ब्रह्मणोऽपवर्गकाले संसारे खिन्नानां (३) सर्व्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्व्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्म्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः। तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेण उत्तरस्मिन्नुत्तरस्मिंश्च (४) सति (५) पूर्व्वपूर्वस्य विनाशः। ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्म्माधर्म्मसंस्कारानुविद्धाश्चात्मानस्तावन्तमेव कालम्। ततः पुनः प्राणिनां भोगभूतये महेश्वरस्य (६) सिसृक्षानन्तरं सर्व्वात्मगतवृत्तिलब्धा-

---

(१) चतुर्णामपि इति पाठान्तरम्।

(२) वर्षशतान्ते इति पाठान्तरम्।

(३) संसारखिन्नानामिति पाठान्तरम्।

(४) उत्तरस्मिन्नुत्तरस्मिन् इति पाठान्तरम्।

(५) पूर्व्वस्य पूर्व्वस्य इति पाठान्तरम्।

(६) महेश्वरसिसृक्षेति पाठान्तरम्।

दृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव वायाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव जलनिधौ (७) पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिप्रक्रमेण महापृथिवी समुत्पन्ना (८) संहतावतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेण उत्पन्नो महांस्तेजोराशि(९)-र्दैदीप्यमानस्तिष्ठति। एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽणुभ्यः(१०) पार्थिवपरमाणुसहितेभ्यो महदण्डमुत्पद्यते (११)। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्मा अतिशयज्ञानवैराग्यैश्वर्य्यसम्पन्नः प्राणिनां कर्म्मविपाकं विदित्वा कर्म्मानु-

---

(७) क्वचित् जलनिधाविति नास्ति।

(८) क्वचित् समुत्पन्नेत्यधिकम् नास्ति।

(९) केनचिदनभिभूतत्वात् इति क्वाप्यधिकम्।

(१०) पार्थिवादि इति पाठान्तरम्।

(११) महदण्डमारभ्यते इति पाठान्तरम्।

रूपज्ञान(१२)भोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णा-नन्यानि चोच्चावचानि भूतानि सृष्ट्वा आशयानुरूपै-र्धर्म्मज्ञानवैराग्यैश्वर्य्यैः संयोजयतीति।

[संज्ञाकर्म्म त्वस्मद्विशिष्टानां लिङ्गम्—२अ-१आ-१८सू। प्रत्यक्षप्रवृत्तत्वात् संज्ञाकर्म्मणः—२अ-१आ-१९सू। नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म्म - ५अ-२आ-१सू। एतेन विभागो व्याख्यातः—७अ-२आ-१०सू। पृथिवी-कर्म्मणा तेजःकर्म्म वायुकर्म्म च व्याख्यातम्—५अ-२-आ-१२सू। अन्यतर-कर्म्मज उभयकर्म्मजः संयोगजश्च संयोगः—७अ-२आ-९सू। संयोगाद्वा—१०अ-२आ-२सू। इत्येतानि सूत्राण्यालम्बनानि।]

जगदीशसूक्तिः

प्रसङ्गादाह चतुर्णामिति। चतुर्णां पृथिव्यादीनां महाभूतानां परमाण्वपेक्षया उत्कृष्टपरिमाणवतां तेन द्व्यणुकस्याप्युपग्रहः। सृष्टि-संहारस्य सृष्टिप्राक्कालीनप्रलयस्य तेन महाप्रलयस्य व्युदासः। विधिः क्रमः। सृष्टिसंहारयोरुत्पत्तिप्रलययोः विधिः कथ्यत इत्यर्थ इत्याचार्य्याः।

ब्राह्मेण मानेनेति—'मानुषेणैकवर्षेण देवानां दिनमुच्यते। तेषां शतत्रयं षष्टियुक्तं वर्षन्तु दैवतः। दैववर्षसहस्राणि द्वादशाहश्चतुर्युगम्। चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते।' इति स्मृतिसिद्धब्राह्मादि-मानेन यद्वर्षशतं तस्यान्ते ब्रह्मणोऽपवर्गकाले मुक्तिकाले। ब्रह्मेशान-प्रभृतीनामपीन्द्रादिवत् जीवप्रभेदत्वमतेनेदम्। ब्रह्मणः परमात्मनः अस्मदाद्यदृष्टोपगृहीतधातृदेहविच्छेदकाले इति वार्थः।

---

(१२) ज्ञानवैराग्यभोगेति पाठान्तरम्।

संसरतीति संसारः शरीरं तत्र खिन्नानां विविधदुःखानुभाविनाम्। निशीति-ब्राह्मेण मानेनेत्यनुषज्यते ;

चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते।

रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना। इति स्मृतेः।

निशीत्यस्य निशातुल्ये इत्यर्थ इति त्वाचार्य्याः। विश्रामार्थं खेदोपशमनार्थं, सकलभुवनपतेः त्रिभुवननिहन्तुः महेश्वरस्य परमात्मनः। सञ्जिहीर्षा संहारसामग्रीविशिष्टेच्छा तत्समकालं अदृष्टानां वृत्तिनिरोधे सतीत्यग्रेतनेऽन्वितमिदम्। सञ्जिहीर्षासमकालं सञ्जिहीर्षोत्तरकालमिति त्वाचार्य्याः। तेषाञ्चापरमाण्वन्तो विनाश इत्यग्रेतनेऽन्वयोऽभिप्रेतः।

यद्यपि शरीरादिकं महाभूतमेव तथाप्यत्र महाभूतपदं प्रागुक्त विषयपरम्। उपनिबन्धकं जनकम्। सर्व्वात्मगतेति-सर्व्वेषामात्मवृत्त्य-दृष्टानां वृत्तिः फलोपधानं तस्य निरोधे प्रतिबन्धे सतीत्यर्थः। फलानुत्-पत्त्या जन्यद्रव्यत्वावच्छिन्नं प्रति ब्रह्मरात्रित्वेन प्रतिबन्धकत्वमित्यभि-प्रायः। प्रलयहेतुभूतादृष्टमेव जन्यद्रव्यनिरोधकमिति त्वाचार्य्यमतन्तु प्रलयप्राक्क्षण एव तादृशादृष्टस्योत्पत्त्यभ्युपगमे शोभत इति ध्येयम्।

महेश्वरेति—महेश्वरेच्छासहितैरात्मपरमाणुसंयोगैर्जनितेभ्यः पर-माणुकर्म्मभ्य इत्यर्थः। पञ्चम्या जन्यत्वमर्थः, तच्च अग्रिमविभागे अन्वितम्। तत्संयोगनिवृत्तौ शरीराद्यारम्भकाणां परमाणुसंयोगानां निवृत्तावित्यर्थः। तेषां शरीराणामिन्द्रियाणाञ्च आ सम्यक् प्रकारेण द्व्यणुकादिनाशक्रमेणेति यावत्। परमाण्वन्तः परमाण्ववसानकः। प्रलये विषयसंज्ञकानां नाशे विशेषं दर्शयन्नाह तथेति। महाभूतानां विषयसंज्ञकानाम्। अनेनैवेति परमाणुक्रियाविभागादिक्रमेणैवेत्यर्थः। उत्तरोत्तरस्मिन्निति-प्रथमं पार्थिवस्यैव विषयस्य विनाशः, ततो जल-

स्योत्तरं तेजसः पश्चाद्वायोर्विनाश इत्यर्थः। अयञ्च क्रमः श्रुतिसिद्धत्वादुपात्त इत्याचार्य्याः।

ननु पृथिव्युदकज्वलनपवनानां क्रमेणैव ध्वंसवतः कालस्य प्रलयत्वानुपपत्तिः कार्य्यद्रव्यानधिकरणकालस्यैव तत्त्वादत आह तत इति। पृथिव्यादिचतुर्णां नाशोत्तरमेवेत्यर्थः। प्रविभक्ताः कार्य्यद्रव्यरहिताः। कार्य्यद्रव्यराहित्यं कार्य्यभावानधिकरणत्वेऽप्युपपद्यमानं न खण्डप्रलयत्वनिर्व्वाहकं महाप्रलयस्यापि तत्त्वादतस्तद्व्यावृत्त्यर्थमाह धर्म्मेति। धर्म्माधर्म्मभावनाख्यसंस्कारैरनुविद्धा विशिष्टा आत्मानश्चावतिष्ठन्त इति पूर्व्वेणान्वयः। चकाराद्गगनादिनित्यवर्गस्य पाकजरूपाद्यनित्यवर्गस्य चोपग्रहः। तावन्तमेव कालं ब्राह्ममानेन शतवर्षपर्य्यन्तं कालमित्यर्थः। तथाच कालः कार्य्यद्रव्यानधिकरणत्वात् खण्डप्रलयः न त्वन्यस्तथेति भावः। खण्डप्रलये धर्म्मादेः सत्त्वे प्रमाणमावेदयितुमुत्तरकालं सृष्टिं प्रतिपादयति तत इति। महाभूतानां सृष्टिसंहारयोर्द्वयोर्विधानस्य प्रतिज्ञातत्वात् संहारविधिमुक्त्वा सृष्टिमाह तत इति त्वाचार्य्यस्वरससिद्धस्तत इत्यस्यावतारक्रमः।

प्राणिनां संसारिणां भोगस्य सुखदुःखानुभवस्य भूतये निष्पत्त्यर्थं सिसृक्षायाः सृष्टिसामग्र्यपहितेच्छायाः अनन्तरम् उत्तरकालं सर्व्वाणि यान्यात्मगतानि अथ च वृत्तिलब्धानि लब्धवृत्तीनि लब्धफलोपधानानीत्यर्थः, अदृष्टानि। तत्सापेक्षेभ्यः तत्संयोगिभ्यः तदाश्रयात्मभिः संयोगिभ्यः। पवनपरमाणुषु कर्म्मोत्पत्तौ सत्यां तेषां परमाणूनां पूर्व्वदेशविभागादिक्रमेण जातेभ्यः परस्पर-संयोगेभ्यो यानि द्व्यणुकानि तदादिक्रमेण महावायुरुत्पन्नो नभसि आकाशे दोधूयमानोऽत्यर्थं कम्पमानस्तिष्ठति मूर्त्तान्तरानुत्पत्त्या तद्वेगस्याप्रतिहतत्वादिति भावः। तदनन्तरं महापवनोत्पत्त्यनन्तरं तस्मिन्नेव पवने आप्येभ्यो जलारम्भकेभ्यः परमाणुभ्यः प्रागुक्तरीत्या द्व्यणुकादिक्रमेण महान् सलिलनिधिः

समुद्र उत्पन्नः पोप्लूयमानोऽत्यर्थं प्लवनशीलस्तिष्ठति पवनाभिहतस्य प्लवनातिशये बाधकाभावादिति भावः।

तदनन्तरं सलिलनिधेरुत्पत्त्यनन्तरम्। तस्मिन्नेव सलिलनिधौ। संहता कठिना। देदीप्यमानः अत्यर्थं प्रकाशमानः। एवं वायुजलपृथिवीतेजःक्रमेण। अयञ्च क्रमः श्रुतिसिद्ध इत्युपात्तः। महेश्वरस्य अभिध्यानं ब्रह्माण्डोत्पत्तिगोचरं ज्ञानम् इच्छा वा तन्मात्रात्। न तु तदीयं शरीरमपेक्षणीयमिति मात्रशब्दस्यार्थः। तैजसेभ्य इति समवायिकथनम्। पार्थिवपरमाणुसहितेभ्य इति पार्थिवाद्युपष्टम्भकथनम्। तथा सत्येव तैजसाण्डस्य हिरण्मयत्वसम्भवात्। सर्व्वलोकानां तदण्डस्थानां पितामहम्। सर्व्वैः भूर्भुवःस्वरादिलोकैः सहितं प्रजासर्गे प्रजासृष्टिनिमित्तं नियुङ्क्ते 'प्रजास्त्वं सृजे'ति आज्ञापयति महेश्वर इत्यर्थादवगम्यते। अत एवाह स चेति। न च महेश्वरेणैव सहकारित्वेन प्रजानिर्म्माणसम्भवाद्व्यर्थं ब्रह्मणेति वाच्यम् शरीरनिष्पाद्यानामादिकार्य्याणां निःशरीरेणेश्वरमात्रेणानिष्पत्तेः तदर्थं ब्रह्मणोऽप्यपेक्षणीयत्वात्।

अथ ब्रह्मैव यद्यज्ञः स्यात्, कथं कर्म्म कुर्य्यात् ? यदि वा क्वचिदनुरक्तः स्यात्, कथं तदनिष्टमुत्पादयेत् ? यदि च अनीश्वरः स्यात्, जानानोऽप्यसौ सुदुष्करं वेधकर्म्म कथं साधयेदत उक्तं अतिशयज्ञानेत्यादि। यदा त्वीश्वर एव तत्तत्कार्य्यवशात् ब्रह्मादिदेहं परिगृह्णाति 'नमः कुलालेभ्यः कर्म्मकारेभ्यश्च [कर्म्मारेभ्यः'] इति श्रुतिप्रमाणकत्वादिति मतं, तदा ब्रह्मणोश्वरस्य नियोगः कार्य्यानुकूलतत्क्रतिसहकृतत्वरूपो बोध्यः।

कर्म्मविपाकमिति—प्राणिनां यानि कर्म्माणि तेषां विविधं पाकं फलोपधानं विदित्वेत्यर्थः। मानसान् अयोनिजान् भूतान् मरीच्यत्रिप्रभृतीन् सृष्ट्वा इत्यग्रेतनेनान्वयः। प्रजापतीन् दक्षादीन्। मनवः

स्वायम्भुवाद्याः। देवाः आदित्याः। ऋषयः भारद्वाजाद्याः। पितरः कव्यवालाद्याः। तेषां प्रत्येकं गणानित्यर्थः।

मुखेति—मुखाद् ब्राह्मणं बाहुभ्यां क्षत्रियं ऊरुभ्यां वैश्यं पादाभ्यां शूद्रमित्येवं चतुरो वर्णानित्यर्थः। तथाच श्रुतिः 'ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत' इति।

उच्चावचानि—उत्कृष्टापकृष्टानि भूतप्रेतादीनि। आशयः पूर्व्वजन्मसंस्कारः। तदनुरूपैस्तत्सदृशैरित्यर्थः। धर्म्मज्ञान-वैराग्यैश्वर्य्यैरित्युपलक्षणम्। अधर्म्माज्ञानावैराग्यानैश्वर्य्यैरित्यपि द्रष्टव्यम्।

सूक्तिदीपिका

पृथिव्यादीनां मरुदन्तानामनित्यद्रव्याणां निरूपणानन्तरं प्रतिप्रकरणं सृष्टिसंहारविधेर्निरूपणे ग्रन्थगौरवभिया एकोपक्रमेण तन्निरूपणाय नितरामपेक्षणीयायाः सङ्गतेः प्रदर्शनायाह प्रसङ्गादिति। एकसम्बन्धिज्ञानस्य अपरसम्बन्धिस्मारकतया सृष्टिसंहारक्रमसम्बन्धिनां पृथिव्यादीनां विज्ञानेन निरुक्तक्रमस्य स्मरणात् परमेश्वरसिद्ध्यनुकूलतया उपेक्षानर्हत्वाच्च स्मृतिविषयत्वे सति उपेक्षानर्हत्वरूपा सेयं सङ्गतिः प्रकृते समन्वेति।

चतुर्णामित्येतन्मात्रोक्तौ पृथिव्याद्यन्तर्गतानां कासाञ्चन चतुःसंख्यक-महाभूतव्यक्तीनां सृष्टिसंहारविधिनिरूपणेनापि प्रतिज्ञायाश्चरितार्थतया सर्व्वेषां पृथिव्यादीनां सृष्टिसंहारविधिनिरूपणमनपेक्षितं स्यादिति चतुर्णामित्यस्य पृथिव्यादीनामित्यर्थविवरणम्। पृथिव्यादीनां परमाणुपर्य्यन्ततया चतुर्णां पृथिव्यादीनामित्येतन्मात्रे स्थिते प्रतिज्ञेयं विसंवादिनी स्यादतो महाभूतानामिति। कन्दलीकारास्तु—'चतुर्णामित्युक्ते चानन्तरोक्तमेव वायुकार्य्यं शरीरमिन्द्रियं विषयः प्राण इति चतुष्टयं बुद्धौ निविशते, तन्निवृत्त्यर्थं महाभूतानामिति' प्राहुः। महत्त्वस्य त्रुटिपर्य्यन्तविश्रान्ततया द्व्यणुकमारभ्य सृष्टिसंहारविधिप्रदर्शनमप्रतिज्ञातार्थकतया नोपयुक्तं स्यादतो द्व्यणुकसाधारणं

महत्त्वमाह परमाणवपेक्षयेत्यादिना। कन्दलीकारास्तु 'विधिशब्दोपादानात् येन प्रकारेण महाभूतानामुत्पत्तिविनाशौ स प्रकारः कथ्यत इत्युक्तं, तेषाञ्च द्व्यणुकादिप्रक्रमेण उत्पत्तिरापरमाण्वन्तश्च विनाश इति अतो द्व्यणुकानामपि सृष्टिसंहारौ प्रतिज्ञातौ स्याता'मिति वदन्ति ; तन्न सम्यक् त्रसरेणोरुत्पत्तौ द्व्यणुकस्य अपेक्षणीयतया द्व्यणुकोत्पत्तेरपि वक्तव्यत्वेन गौणतया एव तल्लाभः, न तु मुख्यतया, अतो मुख्यतया तत्प्रतिज्ञानकल्पः श्रेयान्। महाभूतानां विनाशस्य तु द्व्यणुकपर्य्यवसायित्वेन द्व्यणुकनाशस्य तथापि अलाभश्चेत्यसमञ्जसश्च द्व्यणुकनाशप्रस्तावः स्यात्।

परमाणवपेक्षयेत्यादि—अत्र परमाणुद्व्यणुकयोर्द्वयोरेव परिमाणस्य अणुत्वेऽपि परमाणुगताणुपरिमाणापेक्षया द्व्यणुकगताणुपरिमाणस्य किञ्चिदाधिक्यमित्यभिप्रायः। अत एव परमाणुशब्दस्य कर्म्मधारयव्युत्पत्तिसिद्धत्वात् अणुत्वमादाय परमाणौ परमत्वं नानुपपन्नं भवति। उक्तञ्च मञ्जूषाकारैः— 'प्रकृते तु द्व्यणुकात्तदवयवोऽणुतरः, द्व्यणुकाणुत्वात्तदवयवाणुत्वमुत्कृष्टमित्यादिव्यवहारेण यथा अणुत्वत्वव्याप्यावुत्कर्षापकर्षौ एवं द्व्यणुकपरिमाणात् त्रसरेणुपरिमाणमुत्कृष्टं त्रसरेणुपरिमाणात् द्व्यणुकपरिमाणमपकृष्टमिति व्यवहारेण परिमाणत्वव्याप्यौ महत्त्वाणुत्वयोरुत्कर्षापकर्षौ स्यातामेवे'ति।

न चैवं 'महदारब्धस्य महत्तरत्ववदणुजन्यस्य अणुतरत्वप्रसङ्गा'दिति मुक्तावलीपंक्तिव्याख्याने अलीकस्य अणुतरत्वस्य आपत्तिः कथं सङ्गच्छत इति साम्प्रदायिकप्रश्नो नोपपद्यत इति वाच्यं परमाणुद्व्यणुकयोः परिमाणवैलक्षण्यास्वीकारपक्षमाश्रित्यैव तथा व्याख्यानस्य लब्धपदत्वात्। न च अणुतरपरिमाणस्याभ्युपगमे अणुजन्यस्य तथा परिमाणस्वीकारे का क्षतिरिति वाच्यं परमाणुपरिमाणस्यैव अणुतरपरिमाणतया द्व्यणुकपरिमाणजन्यपरिमाणवत्तया अभिमतस्य त्रसरेणोरचाक्षुषत्वप्रसङ्गात्। तदेवं परमाणुपरिमाणमपेक्ष्य स्थितमेव द्व्यणुकपरिमाणे किञ्चिदाधिक्यम्, अत एव 'परमाणवपेक्षया उत्कृष्टपरिमाणवता'मित्यर्थकरणात् द्व्यणुकलाभो नानुपपन्नः प्रतिभाति। 'महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति' मुक्तावलीपंक्तिरपि तदभिप्रायमूलिकैवेति केचिदाहुः।

निपुणास्तु 'प्रकृते जन्यत्वरूप एव परिमाणगत उत्कर्षो व्याख्येयः। एवञ्च द्व्यणुकपरिमाणस्याणुत्वेऽपि जन्यत्वादेव नानुपपत्ति'रिति प्राहुः। वस्तुतस्तु परमाणुपरिमाणापेक्षया द्व्यणुकपरिमाणे समुत्कर्ष औपचारिक एवाभ्युपगम्यते। अत एवोक्तमाचार्यैः—'परमाणुभ्योऽधिकपरिमाणतयोपचाराद् द्व्यणुकमपि महाभूतमुक्त'मिति। न चैवं मुक्तावल्यादिनिरुक्त-तारतम्यपदार्थानुपपत्तिरिति वाच्यम् तारतम्यं हि प्रकृते न न्यूनाधिकभावः। किन्तु अपकर्षानाश्रयाणुपरिमाणमिति समभिव्याहृतोऽर्थः। परमाणुपदघटकं परमत्वमपि नित्यत्वरूपोत्कर्षप्रतिपादकतया कर्म्मधारयसमासं नावरुन्धे। तदुक्तं मञ्जूषाकारैः—'अणुपरिमाणतारतम्यस्येति अपकर्षानाश्रयाणुपरिमाणस्येत्यर्थ' इति।

सृष्टिप्राक्कालीनेत्यादि—एतेन संसारप्रवाहस्य अनादित्वमुट्टङ्कितं भवति। निरुक्तप्रलयश्च जन्यद्रव्यानधिकरणकाललक्षणखण्डप्रलयरूपो ग्राह्यः।

तेनेत्यादि—तथाहि सर्व्वभावकार्य्यध्वंसलक्षणमहाप्रलये सृष्टिकारणीभूतानामदृष्टानामपि विलयेन परतः सृष्टेरसम्भवात् संहारानन्तरं सृष्टिकथनं विरुध्येतेति भावः। सृष्टिसंहारयोरित्याचार्य्यपरिगृहीतार्थस्तु सृष्टिक्रमसंहारक्रमयोर्द्वयोरेव निरूपणस्य मुख्यतया बोधकत्वेन प्राक्क्रमपरिहारे विनिगमकाभावात् परिहेयः।

जीवप्रभेदत्वमतेनेत्यादि—तथाहि यथा जीवविशेषा यागविशेषप्रसूतेनादृष्टेन स्वाराज्यमनुप्रविशन्ति, तथैव जीवभेदा एव कर्म्मविशेषानुगृहीतपुण्योपचयाद् ब्रह्मादिपदभाजोऽन्ते मुक्तिपदमनुप्रविशन्ति इति। अत एवाचार्य्याः—'ये ह्यसङ्कल्पितफलकर्म्मकर्त्तारः साकारोपासनापरिवासितचेतसो यतयोऽतस्ते हिरण्यगर्भपदवीमनुप्राप्यापवृज्यन्ते' इत्यागमशासनमनुशिष्टवन्तः।

अस्मदेत्यादि—जीवादृष्टानुसारेण सृष्ट्यादिनिष्पादनाय सृष्ट्यादिक्रियायाः शरीरसाध्यत्वनियमात् ईश्वर एव चतुर्म्मुखादिशरीरमुपगृह्य तत्तत्क्रिया निष्पादयति, यदा च सर्व्वेषामदृष्टानां कालवशात् वृत्तिप्रतिबन्धस्तदा तत्तद्देहस्य निष्फलतया परिहारः, स एव मोक्ष इति व्यपदिश्यते। तदुक्तमाचार्य्यैः 'यदा त्वीश्वर एव कार्य्यवशात् गृहीतदिव्यदेहो ब्रह्माद्यवस्थामापद्यते

इति पक्षः, तदा ब्रह्मणोऽपवर्गकाले देहापवर्गकाल इति व्याख्येय'मिति। परमेश्वरस्यैव ब्रह्मादिरूपत्वमिति विशेषेण प्रतिपादितं गदाधरेण अनुमितिनिरूपणे नमस्कारविचारे 'ईश्वरस्य सर्गादिकर्त्तृत्वे ब्रह्मादीनां तथात्वबोधकानामागमानामपि प्रामाण्यमिति सूचयितुं तस्य ब्रह्माद्यभेदाभिधान'मित्यादिना।

त्रिभुवननिहन्तुरिति—संहारकर्म्मणः प्रकृतत्वात् सकलभुवनपतेरित्यस्य यथाश्रुतार्थो न घटते, अत एव तथार्थविवरणम्। परमात्मन इति संहारमूर्त्तिरुद्रशरीरधारिणः परमेश्वरस्य इत्यर्थः। सृष्टिस्थितिसंहारकर्त्तृत्वरूपस्य परमपदार्थोत्कर्षस्य परमात्मशब्दप्रतिपाद्यत्वेन परमात्मन इत्यस्यैव तदर्थपरताया नासम्भव इति।

सञ्जिहीर्षोत्तरकालमित्यादि—ईश्वरेच्छाया नित्यत्वेनात्र ध्वंसघटितोत्तरत्वस्य असम्भवात् आचार्य्यमतं नानुगृहीतं जगदीशेन।

जन्यद्रव्येत्यादि—अत्र यथाक्रमं कालिकविशेषणता-तादात्म्यसम्बन्धावेव प्रतिबध्यप्रतिबन्धकतावच्छेदकसम्बन्धौ। शोभत इति—अन्यथा पूर्वं तादृशादृष्टसत्त्वे पूर्वमपि जन्यद्रव्यानुत्पादसम्भवात् प्रलयस्य कालविपर्य्ययो घटेत इति अशोभनमिदं स्यात्। परं प्रलयाव्यवहितपूर्वक्षणे तथाभूतादृष्टसमुत्पादासम्भवः।

आ सम्यगित्यादि—आचार्य्यास्तु आशब्दस्यावधित्वार्थकत्वमेवोपपादयन्ति। तदुक्तं 'यद्यपि परमाणवन्त इति वक्तुमुचितं, तथाप्यन्तशब्दस्यावयववचनत्वभ्रमनिरासेन परमाणूनामवधित्वमाविष्कर्त्तुमापरमाणवन्त इत्युक्तं, तेनैतदुक्तं भवति,—तावदयं विनाशो यावत् परमाणवोऽवसानमिति। न तु यथा दशान्तः पट इति' इति।

पाकजरूपादीत्यादिपदेन कालावच्छेदोपाधितया वर्त्तमानानां महाभूतसंक्षोभप्रभववेगजकर्म्मणां सन्तन्यमानानामुपग्रहः, अन्यथा कालावच्छेदानुपपत्तौ पुनः सृष्ट्यनुपपत्तेरिति बोध्यम्।

मूर्त्तान्तरानुत्पत्त्येत्यादि—तावत्कालपर्य्यन्तं वायुतिरिक्तमूर्त्तपदार्थानुत्पादेन इत्यर्थः। अमूर्त्तस्य आकाशादेः सतोऽपि वेगारोधकत्वात् मूर्त्तस्यैव वेगरोधकत्वनियमादिति भावः।

বাধকাভাবাদিতি—তদানীমবস্থিতস্য পবনস্য প্লবনানুকূলত্বাৎ অমূর্ত্তানাঞ্চ পূর্ব্বরীত্যৈব প্লবনবাধকত্বাসম্ভবাদিতি ভাবঃ।

তথা সত্যেবেতি—তৈজসভাগঃ পার্থিবভাগসম্বন্ধাদেব সুবর্ণং সম্পদ্যতে, অন্যথা পৃথিবীত্বনিয়তকাঠিন্যাদেঃ তত্রাসম্ভবাদত এব প্রকৃতস্য অণ্ডস্য তৈজসস্যাপি পার্থিবপরমাণুসমুপষ্টম্ভেন এব হিরণ্ময়ত্বমুপপদ্যতে, নান্যথেতি ভাবঃ।

নমু সর্ব্বমেবেদং সর্বজ্ঞসর্বশক্তিমদীশ্বরস্য সিদ্ধৌ সঙ্গচ্ছতে, সৈব নাস্তি, কুতঃ খল্বেবমিতি চেন্ন শরীরানপেক্ষোৎপত্তিকং বুদ্ধিমৎপূর্বকং কারণবত্ত্বাৎ ক্ষিতিঃ সকর্তৃকা কার্য্যত্বাদিত্যাদি-যুক্তয়ঃ, 'দ্যাবাভূমী জনয়ন্দেব একঃ বিশ্বস্য কর্ত্তা ভুবনস্য গোপ্তা' ইত্যাদ্যা আগমাশ্চ তৎসাধকতয়া অনুসর্ত্তব্যাঃ। এতদ্বিস্তরস্তু কিরণাবলী-কুসুমাঞ্জলিগ্রন্থাদাবনুসন্ধেয়ঃ।

ভাষ্যতাৎপর্য্য

ইতঃপূর্ব্বে ক্ষিতি, অপ্, তেজ ও মরুৎ এই চারিটী দ্রব্যের নিরূপণ করা হইয়াছে। ঐ চারিটী দ্রব্যই নিত্য ও অনিত্য দুই ভাগে বিভক্ত। অপর পাঁচটী দ্রব্য কেবল নিত্য, অতএব সৃষ্টি ও সংহার কেবল উক্ত চারিটী দ্রব্যেরই আছে, অন্য দ্রব্যের নাই। এই জন্য এই স্থানেই উক্ত দ্রব্যচতুষ্টয়ের সৃষ্টিসংহারবিধি বিবৃত করা হইতেছে। ক্ষিতি প্রভৃতির নিরূপণপ্রসঙ্গে প্রত্যেক স্থলে উহা বলিতে গেলে গ্রন্থের বিস্তৃতি হইয়া পড়ে, এই কারণে একই উপক্রমে গ্রন্থকার উক্ত বিবরণ করিয়াছেন। ভাষ্যগ্রন্থে মহাভূতপদে দ্ব্যণুকপর্য্যন্ত ভূতপদার্থ গ্রহণ করায় দ্ব্যণুকের সৃষ্টিসংহার নিরূপণ অসঙ্গত হইবে না।

উক্ত সৃষ্টিসংহার-পদের অর্থ সৃষ্টির পূর্ব্ববর্ত্তী সংহার, কারণ 'সৃষ্টি ও সংহার' এই রূপ অর্থ করিলে গ্রন্থকার যে প্রথম সংহারবিধি বিবৃত করিয়াছেন, তাহা অসঙ্গত হয়। কিন্তু প্রথম সৃষ্টি নিরূপণ করিয়া পরেই সংহার নিরূপণ করা উচিত। আর সৃষ্টির পূর্ব্ববর্ত্তী সংহার এই অর্থ করিলে প্রথম সংহারবিধি বলিয়া পরে সৃষ্টি-নিরূপণ করা অন্যায্য হয় না। যদিও কেহ বলেন যে সৃষ্টি ও সংহার উভয়ের নিরূপণই প্রকৃত স্থলে মুখ্যরূপে প্রতিজ্ঞাত হইয়াছে। পরন্তু প্রথম সৃষ্টিক্রমের আদর না

করিয়া সংহার-ক্রমকথনে সৃষ্টির অনাদিত্ব প্রতিপাদিত হইয়াছে। অর্থাৎ সংহার হইতে গেলে সৃষ্টি অবশ্যই প্রয়োজনীয়, সৃষ্টি না হইলে সংহার হইবে কাহার ? কাজেই প্রথমতঃ সৃষ্টিস্বীকার করিয়া উক্ত সৃষ্টবস্তুর সংহার বিবরণ করাই যুক্তিসঙ্গত। তথাপি অর্থের ক্রম ও শব্দের ক্রম উভয়বিধ ক্রমের সম্ভাবনা হইলে একটী পরিত্যাগ করা উচিত নহে, এই জন্য জগদীশ প্রকৃত অর্থেরই গ্রহণ করিয়াছেন। উক্ত মতে সৃষ্টির পূর্ব্বকালীন সংহার বলায় মহাপ্রলয়ও খণ্ডিত হইয়াছে। কারণ মহাপ্রলয়ে সমস্ত ভাব কার্য্য বস্তু নষ্ট হইয়া যায় বলিয়া উক্ত অবস্থায় অদৃষ্টেরও সত্তা না থাকায় পরে আর সৃষ্টি হইতে পারে না। অতএব উক্ত অর্থ করিলে যখন পরে সৃষ্টির কথা লাভ করা যায়, তাহাতেই বুঝিতে হইবে যে, উক্ত সংহার অবস্থায় অদৃষ্ট রহিয়াছে, তবে আর উহা মহাপ্রলয় হইতে পারে না। কিন্তু উহা খণ্ডপ্রলয় মাত্র। খণ্ডপ্রলয়ে নিখিলজন্য-দ্রব্যমাত্র নষ্ট হইয়া থাকে, অদৃষ্ট প্রভৃতি নষ্ট হয় না, কাজেই পরে সৃষ্টি হইতে আর বাধা হয় না।

জীবগণ নিজ নিজ কর্ম্মবশে উচ্চ উচ্চতর ও উচ্চতম পদ লাভ করিয়া থাকেন, ইহাই শাস্ত্রে নিরূপিত আছে, যেমন কোনও জীব শত অশ্বমেধ যাগ করিয়া ইন্দ্রত্ব লাভ করে, সেই রূপ ফলাকাঙ্ক্ষাশূন্য হইয়া বহুকাল যাবৎ যতিবৃত্তি প্রভৃতি অব-লম্বন করিয়া জীব ব্রহ্মপদও লাভ করিয়া থাকে, পরে ব্রহ্মার পরিমাণে শতবর্ষকাল জীবিত থাকিয়া তদীয় সৃষ্টিক্রিয়া প্রভৃতি সম্পাদনপূর্ব্বক শতবর্ষের অবসানে মুক্তিলাভ করিয়া থাকে।

আবার কাহারও মতে ভগবান্ পরমেশ্বরই জীবের অদৃষ্টানুসারে সৃষ্টি প্রভৃতি ক্রিয়া সম্পাদনের জন্য ব্রহ্মা, বিষ্ণু ও মহেশ্বরের শরীর অবলম্বন করিয়া সৃষ্টি প্রভৃতি ক্রিয়া সমাপনপূর্ব্বক যখন সকল জীবের অদৃষ্টকেই কার্য্যজননে নিরুদ্ধবৃত্তি অনুভব করেন, এবং ত্রিতাপতপ্ত জীবের বিশ্রাম কামনা করেন, তখনই সংহারেচ্ছা-প্রণোদিত হইয়া সংসারের সংহার করেন, এবং উক্ত দেহ পরিত্যাগ করিয়া থাকেন। তখন শরীর ও ইন্দ্রিয় প্রভৃতির কারণ পরমাণুসমূহ পরস্পর বিচ্ছিন্ন হইয়া যায় ও পরমাণুই পর্য্যবসিত থাকে।

মনুষ্যের চারিসহস্রযুগে ব্রহ্মার একদিন ও চারিসহস্রযুগে ব্রহ্মার একরাত্রি হইয়া থাকে। উক্ত রাত্রিকালে প্রলয় হয়, ঐ সময়ে কোনও জন্যদ্রব্য থাকে না। জন্যদ্রব্যের প্রতি ব্রহ্মার রাত্রি স্বতন্ত্রভাবে প্রতিবন্ধক ইহাই জগদীশের মত।

পৃথিবী জল তেজ ও বায়ু এই চারিটীর প্রথম পৃথিবী, পরে জল অনন্তর তেজ ও তদনন্তর বায়ুর ধ্বংস হয়। উক্তক্রমে সকলের ধ্বংস হইলেই খণ্ডপ্রলয় সিদ্ধ হইয়া থাকে। সেই সময়ে পৃথিবী প্রভৃতির পরমাণুসমূহ পৃথক্ পৃথক্ রূপে অবস্থান করে, এবং ধর্ম্ম অধর্ম্ম ও সংস্কারযুক্ত আত্মা, গগনাদি নিত্যবর্গ ও পাকজ-রূপাদি কতিপয় অনিত্যবর্গ ব্রহ্মার পরিমাণে শতবর্ষকাল উদাসীন ভাবে অবস্থান করে।

তদনন্তর আবার প্রাণিগণের অদৃষ্টানুসারে ভোগসম্পাদনের জন্য পরমেশ্বরের সৃষ্টির ইচ্ছা হইলে সকল আত্মগত অদৃষ্টের ফলোন্মুখতা অপেক্ষা করিয়া পবন-পরমাণুতে ক্রিয়া উৎপন্ন হওয়ায় তাহার পরস্পর সংযোগহেতু দ্ব্যণুকাদিক্রমে মহাবায়ু উৎপন্ন হইয়া আকাশে কম্পিতভাবে অবস্থান করিয়া থাকে। পরে সেই পবনের মধ্যেই জলীয় পরমাণুসমূহ ক্রমে পরস্পর মিলিত হইয়া মহান্ জলনিধিরূপে পরিণত হইয়া বায়ুর তাড়নে অবাধে তরঙ্গিত হইতে থাকে। অনন্তর সেই জলনিধির অভ্যন্তরেই পার্থিব পরমাণুসমূহ হইতে দ্ব্যণুকাদিক্রমে কাঠিন্যযুক্ত মহাপৃথিবী উৎপন্ন হইয়া থাকে। তদনন্তর সেই মহাজলনিধির মধ্যেই তৈজস পরমাণু হইতে দ্ব্যণুকাদিক্রমে মহাতেজোরাশি উৎপন্ন হইয়া তীক্ষ্ণরূপে দীপ্তি বিকীর্ণ করিতে থাকে।

এই রূপে চারিটী মহাভূত উৎপন্ন হইলে পরমেশ্বরের ইচ্ছায় পার্থিবপরমাণুর সহিত তৈজসপরমাণুর মিলনে মহান্ একটী হিরণ্ময় অণ্ড উৎপন্ন হয়। পরমেশ্বর উক্ত অণ্ডের মধ্যে ভূর্লোক ভুবর্লোক স্বর্লোক প্রভৃতি চতুর্দ্দশ ভুবনের সহিত চতুর্ম্মুখ ব্রহ্মাকে সৃষ্টি করিয়া প্রজাসৃষ্টিতে নিযুক্ত করেন। অতিশয় জ্ঞান বৈরাগ্য ও ঐশ্বর্য্যযুক্ত ব্রহ্মা পরমেশ্বরের নিয়োগে প্রাণিগণের কর্ম্মফল জানিয়া কর্ম্মানুরূপ জ্ঞান, ভোগ ও আয়ুঃসম্পন্ন মানসপুত্র মনু দেবর্ষি ও পিতৃগণ এবং মুখ, বাহু, উরু ও চরণ হইতে যথাক্রমে ব্রাহ্মণ, ক্ষত্রিয়, বৈশ্য ও শূদ্র এবং অপরাপর উন্নত অবনত প্রাণিগণ সৃষ্টি করিয়া কর্ম্মানুরূপ ধর্ম্ম, জ্ঞান, বৈরাগ্য ও ঐশ্বর্য্যাদির সহিত যুক্ত করিয়া দিয়া থাকেন।

কেহ বলেন যে ঈশ্বর যেরূপ নিজ ইচ্ছামাত্রেই হিরণ্ময় অণ্ড নির্ম্মাণ করেন, সেই রূপ অপর সহকারী কারণের যোগে ঈশ্বরই ত সকল নির্ম্মাণ করিতে পারেন, তবে আবার অতিরিক্ত সৃষ্টিকর্তা ব্রহ্মা স্বীকার করিবার প্রয়োজন কি? তাহার

উত্তর এই যে শরীরনিষ্পাদ্য কার্য্যসমূহ শরীরশূন্য ঈশ্বরের নির্ম্মাণ করা অসম্ভব, এই জন্যই শরীরযুক্ত একজন কর্ত্তা স্বীকার করিতে হইয়াছে।

प्रशस्तपादभाष्यम्

आकाशकालदिशामेकैकत्वादपरजात्यभावे सति पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति आकाशं कालो दिगिति। तत्र आकाशगुणाः शब्द-संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः। तत्र (१) शब्दः प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः। वाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः। श्रोत्रग्राह्यत्वाद्विशेषगुणभावाच्च न दिक्कालमनसाम्। (२) पारिशेष्याद् गुणो भूत्वा आकाशस्याधिगमे लिङ्गम्। शब्दलिङ्गत्वाविशेषा(३)देकत्वं सिद्धम्। तदनुविधानात्(४) पृथक्त्वम्। विभववचनात् परममहत्परिमाणम्। शब्द-

---

(१) कुत्रचित् तत्रेति नास्ति।

(२) परिशेषादिति पाठान्तरम्।

(३) लिङ्गाविशेषत्वादिति पाठान्तरम्। कुत्रचित् शब्दलिङ्गाविशेषादित्यपि।

(४) विधानादेकेति विधानादिवेति च पाठान्तरे।

कारणत्ववचनात्(५) संयोगविभागाविति। अतो गुणवत्त्वा(६)दनाश्रितत्वाच्च द्रव्यम्। समानासमानजातीयकारणाभावाच्च नित्यम्। सर्व्वप्राणिनाञ्च शब्दोपलब्धौ (७) निमित्तं श्रोत्रभावेन। श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः (८) शब्दनिमित्तोपभोगप्रापकधर्म्माधर्म्मोपनिबद्धः। तस्य च नित्यत्वे सति उपनिबन्धकवैकल्याद् वाधिर्य्यमिति।

[परिशेषाल्लिङ्गमाकाशस्य—२अ-१आ सू२७। तत्त्वभावेन—२अ-१आ-२९सू। शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च—२अ-१आ-३सू। तदनुविधानादेकपृथक्त्वञ्चेति—२अ-१आ-३१सू। विभवान्महानाकाशस्तथा चात्मा—७अ-१आ-२२सू। कारणगुणपूर्व्वकः कार्य्यगुणो दृष्टः—२अ-१आ-२४सू। कार्य्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवतामगुणः—२अ-१आ-२६सू। परत्र समवायात् प्रत्यक्षत्वाच्च नात्मगुणो न मनोगुणः—२अ-१आ-२७सू। संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः—२अ-२आ०-३१सू। द्रव्यत्वनित्यत्वे वायुना व्याख्याते—२अ-१आ-२८सू। श्रोत्रग्रहणो योऽर्थः स शब्दः—२अ-२आ-२१सू। इत्येतान्यालम्बनसूत्राणि]

जगदीशसूक्तिः

गर्गरोगर्त्तादिभेदेन आकाशस्य दण्डलवमुहूर्त्तादिभेदेन कालस्य पूर्वपश्चिमादिभेदेन दिशश्च नानात्वात् आकाशादिजातिमत्त्वेन पृथि-

---

(५) कारणवचनादिति पाठान्तरम्।

(६) गुणवचनवत्त्वादिति पाठान्तरम्।

(७) शब्दोपलम्भकेति पाठान्तरम्। क्वचित् शब्दोपलब्धिनिमित्तमिति च दृश्यते।

(८) नभःप्रदेश इति क्वचित् पाठः।

व्यादिसंज्ञेव आकाशादिसंज्ञापि द्रव्यत्वावान्तरजातिनिमित्तिकैवेति मतं निरस्यन्नाह आकाशेत्यादि। एकैकत्वं प्रत्येकनिष्ठभेदप्रतियोगित्वं ततोऽपरजातेर्द्रव्यत्वावान्तरजातेरभाववत्त्वे सतीत्यर्थः। तथाच आकाशं न द्रव्यत्वव्याप्यजातिमत् आकाशनिष्ठभेदाप्रतियोगित्वात् यन्नैवं तन्नैवं यथा घट इत्याद्यनुमानात् द्रव्यत्वावान्तरजातिनिरासात् न तन्निमित्तिका आकाशादिसंज्ञा। न च हेतोः स्वरूपासिद्धिः अग्रे प्रतिकर्त्तव्यत्वादिति भावः। पारिभाषिक्य इति—यद्यपि आधुनिकसङ्केतशालिन्येव संज्ञा पारिभाषिकी, प्रकृते च शब्दवत्त्वाद्युपाधिप्रवृत्तिनिमित्तकत्वादौपाधिक्येव संज्ञा वक्तुमुचिता, तथापि उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवत्त्वमेव पारिभाषिकसंज्ञात्वमित्यभिप्रायेणेदम् अनुगतोपाध्यवच्छिन्नसंज्ञाया एव औपाधिकत्वोपगमात्।

यत्तु निरवच्छिन्नसङ्केतशालित्वमेव पारिभाषिकत्वम् आकाशपदाद्धर्म्मान्तरानवच्छिन्नस्यैव गगनस्योपस्थितेः, अन्यथा आकाशं शब्दवदित्यादेः पौनरुक्त्यापत्तेः। न चैवं आकाशत्वमित्यादिप्रयोगो न स्यात् प्रकृत्यर्थतावच्छेदकधर्म्मस्यैव त्वतलाद्यर्थत्वादिति वाच्यं व्यावर्त्तकधर्म्मस्यैव त्वतलादिना भावप्रत्ययेनाभिधानादित्याचार्य्यमतं, तन्न सुचारु आकाशादिपदात् स्वरूपतो गगनादेर्भाने अनुभवविरोधात् कारणबाधाच्च।

न च शब्दवत्त्वाद्युपलक्षित एव धर्म्मिणि आकाशादिपदस्य शक्तिग्रहात् ताद्रूप्येणान्वयबोधो न तु तदपि शक्यतावच्छेदकमिति वाच्यं घटत्वादेरप्युक्तरीत्या शक्यतावच्छेदकत्वहान्यापत्तेः। सह प्रयोगस्य [पिकः कोकिल इत्यादिवत्] आकाशपदवाच्यः शब्दवानित्यर्थकत्वेनाप्युपपत्तेरिति संक्षेपः।

तत्र आकाशादित्रिकमध्ये। अत्र शब्दः स्वत एव, संख्यादिस्तु विशेषणान्तरावच्छिन्न एव आकाशस्य वैधर्म्यमित्यग्रे प्रतिपादयिष्यते।

अथ आकाशे धर्म्मिणि प्रत्यक्षं न मानम् तदसत्त्वात्, आरक्त-माकाशं धवलमाकाशमित्यादिचाक्षुषेण प्रभामण्डलस्यावगाहनात्, अन्यथा रूपस्यापि तत्रोपेयत्वे षड् गुणत्वव्याघातापत्तेः। किन्तु शब्दो द्रव्याश्रितो गुणत्वादित्यनुमानमेव तत्र मानमुपेयम्। तच्च पृथिव्यादिद्रव्यवृत्तित्वेनाप्युपपन्नं नातिरिक्तसाधकमतः पृथिव्यादिगुणत्वे बाधकमाह शब्द इत्यादिना। शब्दो न स्पर्शवद्विशेषाणां पृथि-व्यादिचतुर्णां गुण इति साध्यार्थः।

प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वादिति—परत्वापरत्वयोर्व्यभि-चारवारणाय सत्यन्तं प्रतिनियतेन्द्रियग्राह्यत्वे सतीत्यर्थकम्। तन्मात्रञ्च रूपरसादौ व्यभिचारि, अतो विशेष्यदलम्, स्वाश्रयसमवायिकारण-वृत्ति-सजातीयगुणपूर्वकजातीयान्यत्वादिति तदर्थः।

हेत्वन्तरमाह अयावदिति—स्वाश्रयनिष्ठध्वंसाप्रतियोगिवृत्तिगुण-त्वावान्तरजातिशून्यत्वादिति तदर्थः। हेत्वन्तरमाह आश्रयादिति—स्वाश्रयाविषयकसाक्षात्कारविषयत्वात् स्वाश्रयविषयकसाक्षात्कारविष-यान्यगुणत्वादिति वार्थः।

अथ शब्दो यदि न पृथिव्यादिगुणः कथं तर्हि वीणायां ध्वनि-रित्याकारको व्यवहारः? सत्यं शरीरे सुखमित्यादाविव वीणादेरव-च्छेदकतामात्रेण तथा प्रत्ययात्। उत्तानास्तु कथितहेतूनामप्रयोजक-त्वाद् वीणादिगुण एव शब्दः, शब्दविशेषं प्रति वीणात्वादिना हेतुत्वस्य आवश्यकत्वे समवायिकारणतायामेव तत्पर्य्यवसानस्य लाघवेनौचि-त्यात्। न च वीणागुणस्य कर्णासन्निकृष्टत्वेन श्रावणप्रत्यक्षानुपपत्तिः वीणावच्छेद्यशब्दव्यक्तेरपि तथात्वेन तन्मतेऽप्येतद्दोषस्य तुल्यत्वात्, वीचीतरङ्गन्यायेन वीणानवच्छेद्यशब्दस्यैव कर्णावच्छेद्यतायाः सिद्धान्त-सिद्धत्वात्, वीणावच्छेद्यशब्दस्यैव तत्तत्कर्णपर्य्यन्तव्यापित्वोपगमे तु वीणासमवेतशब्दस्यैव तत्तत्कर्णावच्छेद्यत्वस्वीकारस्यापि अदुष्टत्व-

सम्भवात्, तत्तत्कर्णावच्छिन्नशब्दस्य ग्रहं प्रति तत्तत्कर्णत्वेन हेतुत्व-कल्पनयैव अतिप्रसङ्गभङ्गे शब्दप्रत्यक्षं प्रति श्रवणसमवायस्य हेतुत्वे मानाभावादिति प्राहुः।

अथ मास्तु पृथिव्यादिचतुर्णां गुणः शब्दः, किन्तु आत्मगुण एव भविष्यति, तथापरतिरिक्तमाकाशं नायातमेव इत्यत आह वाह्येति—मानसान्यसाक्षात्कारविषयत्वादित्यर्थः। नात्मगुण इत्यग्रेतनेनान्वयः। शब्दो न बुद्धिमद्गुण इति तदर्थः। तेन आत्मत्वजातिशून्येश्वरीय-गुणत्ववादिनां न सिद्धसाधनस्यावकाशः।

हेत्वन्तरमाह आत्मान्तरेति—आत्मानमन्तराकृत्य ग्राह्यत्वात् आत्माविषयकप्रत्यक्षविषयत्वादिति यावत्। आत्मद्वयग्राह्यत्वादित्यर्थस्तु न युक्तः शब्दमात्रस्यैव पुरुषद्वयावच्छेद्यत्वेन स्वरूपासिद्धत्वादिति ध्येयम्।

आत्मन्यसमवायात् आत्मसमवेतान्यत्वात्। आत्मगुणान्यत्वस्यैव साध्यत्वान्न साध्याविशेषः। अहङ्कारेणैवेति—आत्मधर्म्मिकस्वाश्रयान्यत्व-प्रकारकप्रमाविषयत्वादित्यर्थः, अहं न शब्दवानिति प्रतीतेः प्रमात्वस्य सर्व्वसिद्धत्वादिति भावः।

मास्तामात्मगुणः शब्दः, तथापि दिगादिगुण एव स्यादत आह श्रोत्रेति। न दिक्कालमनसां प्रत्येकस्य गुणः श्रोत्रग्राह्यत्वादिति गुण-शब्दस्यानुषङ्गेण प्रयोगार्थः। श्रोत्रपदं ग्रहणस्य लौकिकत्वलाभार्थम्। विशेषगुणत्वाच्च चक्षुर्ग्राह्यगुणत्वव्याप्यजातिशून्यगुणत्वादित्यर्थः। पारि-शेष्यात् पृथिव्याद्यष्टद्रव्यगुणत्वबाधात्। गुणो भूत्वेति—शब्दो द्रव्यस्य गुणः गुणत्वादित्यनुमानमेव पृथिव्याद्यष्टगुणत्वबाधान् तदन्यद्रव्यगुणत्वं साधयदतिरिक्ताकाशस्य साधकमित्यर्थः।

ननु संख्या पृथिव्यादावपि सत्त्वात् कथमाकाशस्य वैधर्म्म्यमत आह (१) शब्दलिङ्गत्वाविशेषादिति—शब्दस्य यल्लिङ्गत्वं व्याप्यत्वं तद-

(१) शब्दलिङ्गादीति पाठान्तरम्।

विशेषादेकत्वं सिद्धं वैधर्म्यत्वेन। तथा च शब्दव्याप्यसंख्यावत्त्वमेव वैधर्म्यं, तच्च न पृथिव्यादाविति भावः। यद्यपि शब्दलिङ्गत्वादित्येव वक्तुमुचितं, तथापि पृथक्त्वसंख्यायामपि कुत्रचित् शब्दव्याप्यत्वमित्यर्थ-लाभार्थं शब्दलिङ्गत्वाविशेषादित्युक्तम्। अत एव शब्दानुविधाय्येव पृथक्त्वं वैधर्म्यमाह तदनुविधानादिति। तस्य शब्दस्य अनुविधानात् व्याप्यत्वात् पृथक्त्वं वैधर्म्यत्वेन सिद्धमित्यर्थः।

ननु परिमाणं द्रव्यमात्रे अतिप्रसक्तमतः शब्दसमवायिनिष्ठपरि-माणमेव आकाशस्य वैधर्म्यं वाच्यं, तच्चाप्रसिद्धं गगनस्य परिमाणवत्त्वे प्रमाणाभावादत आह(२) विभव(३)वचनादिति—महानाकाशस्तथा चात्मेति(४) सूत्रेण गगनस्य विभुत्ववचनादित्यर्थः, परममहत्त्वं परि-माणं सिद्धमिति पूर्वेणान्वयः।

संयोगविभागयोरपि द्रव्यमात्रे अतिप्रसक्तत्वादाह शब्देति। संयोगविभागपदाभ्यां शब्दासमवायिकारणयोः संयोगविभागयोरभि-धानात् संयोगविभागौ वैधर्म्यं, शब्दासमवायिकारणस्य मूर्त्तेन सह संयोगस्य विभागस्य गगनादन्यत्र असत्त्वादिति भावः।

यद्यपि प्रागुक्तधर्म्मिग्राहकमानेनास्य द्रव्यत्वं सिद्धं, तथापि संयोगादि-मत्त्वादपि तत् साधयितुं शक्यत इति तदप्याह अत इति—संयोगादि-मत्त्वादित्यर्थः। अत्र हेत्वन्तरमाह गुणवत्त्वादिति—अग्रिम-चकारयोजनया गुणवत्त्वाच्चेत्यर्थः। द्रव्यं द्रव्यत्ववत्। नित्यत्वे प्रमाण-माह अनाश्रितत्वादिति—असमवेतभावत्वादित्यर्थः। नित्यमित्यग्रे-तनेनान्वयः। अनाश्रितत्वादित्यस्य विभुत्वादित्यर्थः। तथा च द्रव्य-त्वस्यैव साधकोऽयं हेतुरिति यथाश्रुतमेव न्याय्यमिति वदन्ति।

तस्य नित्यत्वं साधयति समानेति। कारणमत्र समवायिकारणं,

---

(२) प्रमाणाभावादाहेति पाठान्तरम्। (३) विभु इति पाठान्तरम्।

(४) तथा चात्मा चेति इति पाठान्तरम्।

तच्च आकाशस्य सजातीयं विजातीयञ्च नास्ति। नहि आकाश-सजातीयमाकाशान्तरमस्ति, नापि तद्विजातीयं पृथिव्यादिकं तत्-समवायिकारणं घटादिकारणकस्य रूपादेरिव गुणत्वस्य कर्म्मत्वस्य वा प्रसङ्गात्। पृथिव्यादेस्तु सजातीयपृथिव्यादिरिव गुणकर्म्मणोस्तु विजातीयं द्रव्यमेव समवायिकारणम्।

तस्य इन्द्रियप्रकृतित्वं दर्शयति सर्वप्राणिनामिति। ननु विभुन-स्तस्य सर्वप्राणिनां शब्दोपलब्धिनिमित्तत्वे सर्वेषामेव सर्वशब्दोपलब्धि-प्रसङ्ग इत्यत आह श्रोत्रभावेनेति। ननु तथापि स दोषः, तस्य विभुनः श्रोत्रभावादित्यत आह श्रोत्रं पुनरिति। ननु श्रवणविवरसत्त्वे कथं कश्चिद् वधिर इत्यत आह शब्दनिमित्तेति। उपभोग्यवीणादिशब्दा विषयतया निमित्तानि यस्य तादृशो य उपभोगस्तत्प्रापकाभ्यां धर्म्माधर्म्माभ्याम् उपनिबद्ध इत्यर्थः। तथा च तादृशधर्म्माधर्म्मरहितस्य तादृशविवरसत्त्वेऽपि वाधिर्य्यमित्याह तस्य चेति।

सूक्तिदीपिका

अथ किमाकाशादिसंज्ञाया नैमित्तिकत्वं वा पारिभाषिकत्वं वा औपाधि-कत्वं वेति विचारयितुं पूर्वपक्षमुपन्यस्यन् पारिभाषिकतया उपसंहरति गर्गरी-त्यादिना।—गर्गरी घटश्चेत्यनर्थान्तरम्। तथाहि यः खलु गर्गर्य्यादिभेदेन आकाशादिभेदः समुपलभ्यते, स उपाधिकृत एव, न तु वास्तवः, अत आकाशत्वादौ नित्यानेकसमवेतत्वरूपजातिलक्षणसमन्वयाभावात् तदवच्छिन्न-सङ्केतवती आकाशादिसंज्ञा न नैमित्तिकी, परमाकाशत्वादेरुभयावृत्तिधर्म्मतया तदवच्छिन्नसङ्केतवत्त्वात् पारिभाषिक्येव। तदुक्तं स्वयमेव जगदीशेन शब्द-शक्तिप्रकाशिकायां 'जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मते'ति। 'उभया-वृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी' इति च। औपाधिकत्वमपि आका-शत्वादेरेकमात्रवृत्तिधर्म्मतयैव शक्यं निरसितुम्। अत एव शब्दशक्तिप्रकाशि-कायां 'शब्दादिकन्तु सखण्डत्वेन उपाधिरपि नानुगतो द्वितयावृत्तित्वादतः

पारिभाषिके नातिप्रसङ्ग' इत्युक्तम्। भूतादिसंज्ञैव 'औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तत' इति लक्षणसमन्वयादौपाधिकी भवति इति विभाव्यम्।

यद्यपि कालत्वदिक्त्वयोर्जातित्वनिराकरणं तत्तन्निरूपणावसरे कर्त्तव्यं, तथापि लाघवानुरोधेन प्रसङ्गादत्रैवोक्तमिति ध्येयम्।

तत इति पञ्चम्यर्थो हेतुत्वं, तच्च अपरजातेरभावेऽन्वेति। सति सप्तम्याः प्रयोज्यत्वमर्थः, स चार्थः पारिभाषिकत्वे अन्वेति। तथाहि आकाशनिष्ठभेदाप्रतियोगित्वव्याप्यापरजात्यभावप्रयोज्यमाकाशपदस्य पारिभाषिकत्वमित्यर्थः।

ननु कथमिदं सङ्गच्छते आकाशे सत्तावान्तरद्रव्यत्वजातेः सत्त्वेन व्यभिचारादित्यतः अपरजातिपदस्य द्रव्यत्वावान्तरजातिरूपमर्थमनुसन्धत्ते द्रव्यत्वेत्यादिना। तथा च सत्तावान्तरद्रव्यत्वजातेराकाशादौ सत्त्वेऽपि द्रव्यत्वावान्तरजातेरसत्त्वेन न क्षतिः। तदुक्तं मुक्तावल्यां 'आकाशकालदिशामेकव्यक्तिकत्वादाकाशत्वादिकं न जातिः, किन्तु आकाशत्वं शब्दाश्रयत्वम्' इति।

आकाशनिष्ठभेदाप्रतियोगित्वहेतोः प्रकृते पक्षमात्रवृत्तित्वेन साध्यहेत्वोः सहचारग्रहासम्भवाद्‚व्यतिरेकमुखेन व्याप्तिमुपसंहरति यन्नैवमित्यादिना।

हेतोरिति—आकाशनिष्ठभेदाप्रतियोगित्वहेतोरित्यर्थः।

स्वरूपासिद्धिरिति—घटादिभेदेन आकाशस्य भेदसत्त्वादाकाशनिष्ठभेदाप्रतियोगित्वस्य आकाशे अभावादित्यभिप्रायः।

अत्र इत्यादि—शब्दलिङ्गत्वाविशेषादेकत्वं सिद्धमित्यत्रेत्यर्थः। प्रतिकर्त्तव्यत्वादिति—अस्य दोषस्य निराकरिष्यमाणत्वादित्यर्थः। तथाहि यत आकाशादेर्घटादिभेदाद् भेदो न वास्तवः, परमौपाधिक एव, अतो न प्रकृतसाध्यसाधको हेतुः स्वरूपासिद्ध इति भावः।

यद्यपीत्यादि—ग्रन्थोऽयं 'यद्वाधुनिकसङ्केतशालि स्यात् पारिभाषिक'मिति पारिभाषिकलक्षणाभिप्रायमूलः। तन्मते आकाशपदादेरौपाधिकत्वमेवेति स्वयं तत्राप्युक्तं जगदीशेन।

अन्यथेति—गगनपदात् शब्दवत्त्वरूपधर्म्मान्तरावच्छिन्नस्य उपस्थितिपरिकल्पने इत्यर्थः। पौनरुक्त्यापत्तेरिति—घटो घट इत्यादिस्थल इव आकाशं शब्दवदित्यत्रापि उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्येन शाब्दबोधानुप-

पत्तेः उद्देश्यतावच्छेदकतासम्बन्धेन शाब्दबोधे अभेदसम्बन्धावच्छिन्नविधेयतावच्छेदकभेदस्य कारणतायाः क्लृप्तत्वेन प्रकृते धर्म्मितावच्छेदकतया भाते शब्दवत्त्वे अभेदसम्बन्धावच्छिन्नविधेयतावच्छेदकशब्दभेदलक्षणकारणबाधादिति भावः।

व्यावर्त्तकेत्यादि– तथाहि स्वप्रकृत्यर्थतावच्छेदक एव त्वतलाद्यर्थ इति न नियमः येन निरवच्छिन्नार्थबोधकाकाशपदात् त्वतल्प्रत्ययादिप्रयोगो नोपपद्यते, किन्तु व्यावर्त्तकधर्म्म एव, शब्दवत्त्वस्य च आकाशव्यावर्त्तकधर्म्मतया आकाशपदोत्तर-त्वतल्प्रत्ययस्य तत्परतया एव उपपत्तेर्न प्रयोगव्याघातापातः। आचार्य्यमतमिति—तदुक्तमाचार्य्यैः—'शब्दाश्रयत्वस्योपलक्षणतया तटस्थत्वात् अयमसौ देवदत्त इत्यत्रेदन्तावत्, अन्यथा शब्दगुणमाकाशमिति सहप्रयोगो न स्यात्। यद्येवमाकाशादिशब्देभ्यः परस्य त्वतलादेर्निरर्थकत्वमापद्येत इति चेत् न आकाशस्य स्वरूपमितिवदौपचारिकत्वात् व्यावृत्तिपरत्वाद्वेति' इति।

अनुभवेत्यादि—तथाहि गगनपदाद् गगनबोधानन्तरं शब्दाश्रयं प्रत्येमीत्याद्यनुभवापलापप्रसङ्गादिति। अतस्तादृशानुभव एव गगनपदस्य अवच्छिन्नार्थवाचकतालिङ्गमिति भावः। अथ तादृशानुभवे विप्रपन्नं प्रत्याह कारणबाधाच्चेति, निरवच्छिन्ने शक्तिग्रहरूपकारणविरहादित्यर्थः।

ताद्रूप्येणेत्यादि—ननु उपलक्षणप्रकारेण तत्र तत्रान्वयबोधस्वीकारे यस्य कस्याप्याकाशांशे उपलक्षणस्य सर्वत्रानियमेन भानमापद्येतेति चेन्न यत्र यद्धर्म्मं धर्म्मितावच्छेदकीकृत्य शाब्दबोधविषयत्वेन सङ्केतविषयत्वग्रहस्तद्धर्म्मप्रकारक एव बोधस्तत्र समुत्पद्यत इति नानियमः शङ्कनीयः। स्वयमन्यदूह्यम्।

अवच्छिन्नशक्तिपक्षे आकाशं शब्दवदित्यभेदान्वयबोधानुपपत्तिदोषमुद्धर्त्तुमाह—सह प्रयोगस्येत्यादि;—तथाहि यथा पिकः कोकिल इत्यादौ पिककोकिलशब्दयोरभिन्नार्थत्वेऽपि कोकिलादिशब्दस्य कोकिलादिपदवाच्यपरतया पौनरुक्त्यप्रयुक्ता न शाब्दबोधानुपपत्तिस्तथैव प्रकृतेऽपि आकाशादिपदस्य आकाशादिशब्दवाच्यपरतया नानुपपत्तिरिति भावः। अत एव किरणावलीभास्करे पद्मनाभमिश्राः 'सहप्रयोगस्तु पिकः कोकिल इतिवदुपपद्यत इति तत्त्व'मिति प्राहुः।

शब्दः स्वत एवेति—आकाशस्य वैधर्म्यमित्यग्रेणान्वेति। स्वत एवेति विशेषणान्तरानवच्छिन्न इत्यर्थः। तथाहि शब्दस्य आकाशमात्रवृत्तितया केवल-तद्वत्त्वस्यैव वैधर्म्यत्वोक्तिसम्भवादिति भावः। संख्यादिस्त्विति तु शब्दो भिन्नक्रमे। विशेषणान्तरावच्छिन्न इति—शब्दव्याप्यसंख्यावत्त्वादिरूपतया सामानाधिकरण्यसम्बन्धेन शब्दविशिष्टसंख्यादिरूपतया वा संख्यादिकमाकाश-वैधर्म्यं, न केवलसंख्यादिः, तस्य पृथिव्यादिसाधारणतया व्यभिचारादिति भावः।

ननु सिद्धे धर्म्मिणि धर्म्मचिन्ता, नासिद्धे, तत्कुतस्तस्यैव सिद्धिरित्याशङ्कते अथेत्यादिना। तथाहि प्रत्यक्षेण प्रमाणेन नाकाशसिद्धिरिति भावः।

प्रभेत्यादि—तदुक्तमाचार्य्यैः—'कथं तर्हि इह पक्षी नेह पक्षीति प्रत्यय इति चेत् आलोकमण्डलमाश्रित्येति ब्रूमः। तथापीहालोको नेहालोक इति कथमिति चेत् तदवयवानाश्रित्येति यत्किञ्चिदेतत्' इति।

अन्यथेति—निरुक्तचाक्षुषप्रत्यक्षस्य आकाशविषयकत्वाभ्युपगमे इत्यर्थः। रूपस्यापीति—संख्यादिगुणपञ्चकस्येव चाक्षुषेणावश्यमपेक्षणीयस्य उद्भूतरूप-वत्त्वस्येत्यर्थः।

स्पर्शवद्विशेषाणामित्याद्यर्थकरणेन विषेषगुणत्वनिषेधेन तदीयसामान्य-गुणत्वप्रसक्तिशङ्कापि निरस्ता।

शब्दस्य स्वकारणगगनगुणशब्दान्तरादिपूर्वकत्वात् स्वरूपासिद्धिरिति अकारणेत्यादेः स्वाश्रयेत्याद्यर्थविवरणम्। स्वाश्रयस्य समवायेन स्वाधिकरणस्य यत् समवायिकारणं तद्वृत्तीत्याद्यर्थः। न तु स्वाश्रयो यत् समवायिकारण-मित्यादिः, तथात्वे स्वाश्रयेत्यस्य वैयर्थ्यात् स्वरूपासिद्धितादवस्थ्याच्च। प्रति-योगिप्रसिद्धिश्च घटरूपादौ सुकरा, तस्य स्वाश्रयघटादिसमवायिकारणवृत्ति-स्वसजातीयकपालादिरूपात्मकगुणपूर्व्वकजातीयत्वात्। आकाशस्य नित्य-तया शब्दाश्रयीभूतगगनस्य कारणविरहादेव निरुक्तगुणपूर्वकजातीयत्वस्य शब्दे असम्भवात् स्वपदेन तस्योपादातुमशक्यतया न सम्भावितस्वरूपासिद्धि-रिति भावः।

न च तथापि गुणत्वमादाय शब्दस्य कारणगुणपूर्वकरूपादिजातीयतया स्वरूपासिद्धिस्तदवस्थेति वाच्यं गुणत्वव्याप्यजात्यैव प्रकृते साजात्यस्य विव-

च्छितत्वात्। खत्वस्य प्राचानतुगतत्वेन खपदेन रूपाद्युपग्रहे न रसादौ स्पर्शवद्विशेषगुणे व्यभिचारः। खत्वस्य प्रत्येकविश्रान्तत्वमभ्युपगच्छतां नव्यानान्तु स्वाश्रयसमवायिकारणवृत्तिसजातीयगुणपूर्वकं यद्यत् खं तत्तदन्यतमजातीयान्यत्वमर्थः। तेन रसादेरपि तदन्यतमान्तर्गततया तज्जातीयान्यत्वस्य तत्रासत्त्वान्न व्यभिचारशङ्कापि। पाकजरूपादेः कारणगुणपूर्वकत्वविरहेण तदन्यतमानन्तर्गततया तथैव व्यभिचार इति तादृशान्यतमान्यत्वनिवेशमनादृत्य तज्जातीयान्यत्वपर्य्यन्तानुसरणम्। अन्यत् स्वयमूहनीयम्।

स्वाश्रयनिष्ठेत्यादि—शब्दस्यापि स्वाश्रयनिष्ठध्वंसाप्रतियोगिपरममहत्परिमाणादिवृत्तिसत्तागुणत्वजातिमत्त्वात् स्वरूपासिद्धिरिति तद्वारणाय जातौ गुणत्वावान्तरत्वं विशेषणमुपगृहीतम्। जातिशून्यत्वञ्च समवायसम्बन्धावच्छिन्नप्रतियोगिताकजात्यभाव एव विवक्षणीयः, अन्यथा कालिकेन तादृशजातेः शब्दवृत्तितया स्वरूपासिद्धेः संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकतदभावमादाय रूपादौ व्यभिचारापत्तेश्च।

स्वाश्रयाविषयकेत्यादि—अत्र स्वाश्रयत्वं समवायेन विवक्षणीयम्, अन्यथा शब्दस्यैव कालिकेन सम्बन्धेन स्वाश्रयतया तदविषयकसाक्षात्कारविषयत्वस्य खस्मिन्नसम्भवेन स्वरूपासिद्धितादवस्थ्यादिति। रूपादिविषयकज्ञानमात्रस्य स्वाश्रयविषयकत्वानियमेन स्वाश्रयाविषयकज्ञानविषयत्वहेतोर्व्यभिचारप्रसङ्गेन साक्षात्कारपर्य्यन्तानुधावनम्।

स्वाश्रयविषयकेत्यादि—तथाहि आकाशस्य साक्षात्कारविषयत्वविरहेण शब्दविषयकसाक्षात्कारस्य आकाशाविषयकतया प्रकृतहेतुसमन्वयः।

स्वाश्रयनिष्ठविषयतानिरूपकतावच्छेदकलौकिकसाक्षात्कारत्वावच्छिन्ननिरूपितविषयताया एव प्रकृते प्रतियोगितावच्छेदकतया प्रवेशात् उपनयसन्निकर्षादिना शब्दविषयकप्रत्यक्षे आकाशस्य भानसम्भवेऽपि न क्षतिः, तादृशप्रत्यक्षनिरूपितस्वाश्रयविषयतायाः तादृशसाक्षात्कारत्वावच्छिन्नानिरूपितत्वात् साक्षात्कारत्वव्यञ्जकविषयताया एव तथात्वाभ्युपगमेन उपनयसन्निकर्षादिप्रयोज्यविषयतायास्तादृशत्वासम्भवात्। साक्षात्कारित्वव्यञ्जकत्वं वा विषयताविशेषणं देयम्।

अवच्छेदकतामात्रेणेति—तथाहि वीणायामित्यत्र सप्तम्यर्थो नाधिकरणत्वं,

किन्तु अवच्छेदकत्वमेव, इत्यश्च वीणायां ध्वनिरित्यस्य वीणावच्छेद्यो ध्वनिरित्येवार्थः, न तु वीणावृत्तिर्ध्वनिरिति भावः।

मानसान्येत्यादि—अत्रापि विषयतायां लौकिकसाक्षात्कारत्वावच्छिन्ननिरूपितत्वं साक्षात्कारित्वव्यञ्जकत्वं वा हेतुघटकमुपगन्तव्यमन्यथा मानसान्यसाक्षात्कारेऽपि उपनयसन्निकर्षादिना ज्ञानादेर्भानस्य अप्रत्यूहतया व्यभिचारस्य दुर्णिवारतापत्तेः। ज्ञानादेर्मानसान्यानुमित्यादिज्ञानविषयतया तथैव व्यभिचार इति साक्षात्कारपदमित्यादि ध्येयम्।

तेनेति—तादृशार्थकरणेनेत्यर्थः। तथाहि बुद्धिमत्त्वस्य जीवात्मपरमात्मोभयसाधारणतया ईश्वरीयगुणत्वस्यापि प्रकृते निषेधप्रत्ययादिति भावः।

लौकिकत्वलाभार्थमिति—अन्यथा दिगादिगुणस्यापि अलौकिकप्रत्यक्षविषयतया व्यभिचारात्। एतद्दोषविरहे ग्राह्यत्वमात्रेण एव हेतुना साध्यसिद्धिचारितार्थ्यात्।

शब्दस्येत्यादि—शब्दस्य यल्लिङ्गत्व व्याप्यत्वमित्यादि—जगदीशव्याख्यानलाभात् शब्दलिङ्गत्वाविशेषादित्येव भाष्यपाठो जगदीशाभिमत इत्याभाति। परे तु शब्दलिङ्गाविशेषादिति पाठमादृत्यापि लिङ्गपदस्य धर्म्मपरत्वेन तथा व्याख्यानमुपपादयन्ति। तन्न समीचीनम्, परत एव स्वयं जगदीशेन 'लिङ्गत्वाविशेषादित्युक्तम्' इत्यस्य उक्तत्वात्।

परममहत् परिमाणमिति मूलनिर्देशो धर्म्मपरः, अत एव परममहत्त्वं परिमाणं सिद्धमिति जगदीशेनार्थो निरुक्तः। परममहतः परिमाणमिति षष्ठीतत्पुरुषाद्वा प्रकृतसिद्धिः।

द्रव्यमित्यादि—समवायसम्बन्धस्य साध्यताघटकसंसर्गतामभिप्रेत्य द्रव्य मित्यस्य द्रव्यत्ववदित्यर्थविवरणम्। तेन द्रव्यत्वविषयकज्ञानस्यापि विषयितया द्रव्यमित्याकारकतया नार्थान्तरमिति प्राहुः।

असमवेतेत्यादि—असमवेतत्वस्य ध्वंसप्रागभावयोरपि सत्त्वात् तन्मात्रस्य हेतोर्व्यभिचार इति भावत्वपर्य्यन्तानुधावनम्।

ভাষ্যতাৎপর্য্য

সৃষ্টি ও সংহার নিরূপণের পর উদ্দেশক্রমলব্ধ আকাশ পদার্থের নিরূপণ করিতে যাইয়া প্রথমতঃ আকাশ শব্দটী পারিভাষিক বা নৈমিত্তিক এই আলোচনা করা উচিত। যে শব্দ নিজ শক্তি দ্বারা জাতিবিশিষ্টের বোধক হয়, তাহাকে নৈমিত্তিক ও যে শব্দ শক্তিদ্বারা একব্যক্তিমাত্রে বর্ত্তমান ধর্ম্মবিশিষ্টের বোধক হয়, তাহাকে পারিভাষিক কহে। ঘট গর্ত্ত প্রভৃতি ভেদে আকাশ ভিন্ন বলিয়া প্রতীত হইলেও উহা বস্তুতঃ অভিন্ন, কেবল ঘটাদিরূপ উপাধিভেদেই উহার ভেদ প্রতীত হইয়া থাকে; অতএব আকাশত্ব অনেকসমবেত না হওয়ায় উহা যখন জাতি নহে, তখন আকাশত্ববিশিষ্টবোধক আকাশশব্দ নৈমিত্তিক হইতে পারে না; কিন্তু আকাশত্ব কেবল এক ব্যক্তিতেই বর্ত্তমান বলিয়া উক্ত আকাশত্ববিশিষ্টের বোধক আকাশপদ পারিভাষিক সংজ্ঞা বুঝিতে হইবে। ঐ রূপ কালপদার্থের দণ্ড মুহূর্ত্তাদিভেদে ভেদপ্রতীতি এবং দিকের পূর্ব্ব পশ্চিমাদি ভেদে ভেদপ্রতীতিও ঔপাধিক, বাস্তবিক নহে, অতএব কালত্ব ও দিক্ত্ব ধর্ম্মও একৈকমাত্রবৃত্তি বলিয়া কাল ও দিক্ সংজ্ঞাও পারিভাষিক। কাল ও দিকের নিরূপণ প্রসঙ্গে কালশব্দ ও দিক্শব্দের পারিভাষিকত্ব পৃথক্ পৃথক্ রূপে বলিতে গেলে গ্রন্থগৌরব হয়, এই জন্য এইস্থানে একই প্রসঙ্গে উক্ত ব্যাখ্যা ভাষ্যকার করিয়াছেন।

শব্দ, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ ও বিভাগ এই ছয়টী গুণ আকাশের বৈধর্ম্ম্য। তন্মধ্যে শব্দ স্বতই আকাশের বৈধর্ম্ম্য, সংখ্যা প্রভৃতি অপর পাঁচটী পৃথিবী প্রভৃতিতেও বর্ত্তমান হওয়ায় কেবল সংখ্যাদি আকাশের বৈধর্ম্ম্য হইতে পারে না, পরন্তু শব্দব্যাপ্যসংখ্যা শব্দব্যাপ্যপরিমাণাদিকেই আকাশের বৈধর্ম্ম্য বলিতে হইবে।

কেহ বলেন যে শব্দ বীণাশঙ্খ প্রভৃতি স্পর্শবৎ পদার্থের গুণ, উহা আকাশের গুণ নহে। তাহার প্রত্যুত্তর দিবার জন্য ভাষ্যকার তিনটী হেতুর উপন্যাস করিয়া শব্দ স্পর্শবৎপদার্থ পৃথিবী জল তেজ ও বায়ুর গুণ নহে ইহাই ব্যবস্থাপন করেন। তাহার প্রথম প্রয়োগ এইরূপ যথা,—যে হেতু শব্দ প্রত্যক্ষ অথচ অকারণগুণপূর্ব্বক অর্থাৎ স্বাশ্রয়ের সমবায়িকারণে বর্ত্তমান সজাতীয়গুণপূর্ব্বকজাতীয় নহে, অতএব উহা স্পর্শবৎ পদার্থের গুণ নহে। যে

সকল বস্তুতে উক্ত হেতু আছে, তাহা স্পর্শবৎ পদার্থের গুণ হয় না। শব্দের আশ্রয় আকাশ নিত্য বলিয়া স্বপদে শব্দ ধরিলে স্বাশ্রয়ের সমবায়িকারণই অসিদ্ধ হয়, অতএব স্বপদে শব্দ ধরিতে না পারায় উক্তরূপ হেতু শব্দে থাকিতে বাধা হয় না। যাহারা স্বাশ্রয়পদে বীণাশঙ্খ প্রভৃতি গ্রহণ করেন, তাহাদের মতেও স্বাশ্রয়ের সমবায়িকারণে অবয়বে শব্দ না থাকায় পক্ষে হেতু থাকিতে কোনও প্রতিবন্ধক দেখা যায় না। বীণাপ্রভৃতির অবয়বে যে শব্দ তাহা বীণাশব্দের কারণ ইহা কোনও রূপেই স্বীকার করা চলে না। পরমাণুরূপে অকারণগুণপূর্ব্বকত্ব থাকিলেও উহা প্রত্যক্ষ নহে, অতএব প্রত্যক্ষপদ দ্বারা উক্ত স্থলে ব্যভিচার বারণ করা হইয়াছে। জগদীশ পরত্ব ও অপরত্বে ব্যভিচার বারণের জন্য উক্ত বিশেষণ গ্রহণ করিয়াছেন। উহার অর্থ প্রতিনিয়ত ইন্দ্রিয়গ্রাহ্যত্ব, পরত্ব ও অপরত্ব প্রতিনিয়ত ইন্দ্রিয়গ্রাহ্য নহে, কারণ উহা যেমন চক্ষুরিন্দ্রিয় দ্বারা গৃহীত হয়, সেইরূপ ত্বগিন্দ্রিয়াদি দ্বারাও গৃহীত হইয়া থাকে। দ্বিতীয় হেতুদ্বারা প্রয়োগ এইরূপ যথা—যে বস্তুতে অযাবদ্‌দ্রব্যভাবিত্ব অর্থাৎ প্রত্যক্ষত্ব এবং স্বাশ্রয়বৃত্তি ধ্বংসের অপ্রতিযোগী পদার্থে বর্ত্তমান গুণত্বব্যাপ্য জাতির অভাব থাকে, তাহা স্পর্শবৎ পদার্থের গুণ নহে, অতএব শব্দে যখন প্রত্যক্ষত্ব এবং স্বাশ্রয়বৃত্তি ধ্বংসের অপ্রতিযোগী পদার্থে বর্ত্তমান গুণত্বব্যাপ্য জাতির অভাব আছে, তখন উহা স্পর্শবৎ পৃথিবী প্রভৃতির গুণ নহে। স্বাশ্রয়নিষ্ঠ ধ্বংসের অপ্রতিযোগী নিত্য-গুণবৃত্তি গুণত্ব গ্রহণ করিয়া স্বরূপাসিদ্ধি হইতে পারে, এই জন্য গুণত্বাবান্তর জাতিকে প্রতিযোগিরূপে নিবেশ করা হইয়াছে। এমন কোনও শব্দ নাই, যাহা স্বাশ্রয়নিষ্ঠ ধ্বংসের প্রতিযোগী হয় না, অতএব স্বরূপাসিদ্ধির আশঙ্কা নাই।

তৃতীয় হেতুর প্রয়োগ এইরূপ যথা—শব্দ যখন স্বাশ্রয়বিষয়ক সাক্ষাৎকার বিষয়ীভূত গুণভিন্ন, তখন উহা স্পর্শবৎ পদার্থের গুণ নহে। যে বস্তুর সাক্ষাৎকার নিয়তই স্বাশ্রয়বিষয়ক হয় না, তাহা স্পর্শবৎ পদার্থের গুণ হইতে পারে না। স্পর্শবদ্‌গুণের অনুমিতি প্রভৃতি জ্ঞান স্বাশ্রয়কে বিষয় না করিয়াও হইতে পারে, এইজন্য সাক্ষাৎকার বলা হইয়াছে। সাক্ষাৎকারপদদ্বারা লৌকিক বিষয়তানিবেশই বুঝিতে হইবে, তাহা না হইলে শব্দাদির সাক্ষাৎকারে আকাশা-দিরও অলৌকিক ভানে বাধা না থাকায় স্বরূপাসিদ্ধি দোষ ঘটিতে পারে। শব্দকে বীণাপ্রভৃতির গুণ স্বীকার না করিলেও বীণাদিকে অবচ্ছেদক স্বীকার করায়

'বীণায়াং ধ্বনিঃ' ইত্যাদি প্রয়োগের অনুপপত্তি হয় না। এতদ্বিষয়ে বিস্তৃত বিবরণ সূক্তিপ্রভৃতি হইতে জ্ঞাতব্য।

এখন আপত্তি হইতেছে এই যে,—শব্দ স্পর্শবৎপদার্থের গুণ হইতে না পারিলেও স্পর্শবদ্ভিন্ন আত্মার গুণ হইতে বাধা কি? তাহার উত্তরে ভাষ্যকার চারিটী হেতুদ্বারা শব্দের আত্মগুণত্বও নিষেধ করিয়াছেন। উহার প্রথম হেতুর প্রয়োগ যথা—শব্দ যখন বহিরিন্দ্রিয়জন্য প্রত্যক্ষের বিষয়, তখন উহা আত্মার গুণ নহে। আত্মার গুণ কখনও বহিরিন্দ্রিয়জন্য প্রত্যক্ষের বিষয় হইতে পারে না, অতএব কিরূপে শ্রোত্রগ্রাহ্য শব্দ আত্মার গুণ হইবে।

এস্থলে আত্মগুণ শব্দে চেতনের গুণ বুঝিতে হইবে, অতএব যাহারা শব্দকে ঈশ্বরের গুণ বলিয়া স্বীকার করেন, তাহাদের মতে সিদ্ধসাধন হইবে না। আত্মগুণশব্দে যদি আত্মত্বজাতিবিশিষ্টের গুণ হইত, তবে আত্মত্বজাতির ঈশ্বরে অসত্তাহেতু উক্ত দোষ হইত। কারণ তাহারা শব্দকে আত্মার গুণত স্বীকার করেন না; পরন্তু জীবাত্মভিন্ন পরমাত্মার গুণই স্বীকার করেন, অতএব তন্মতে শব্দে আত্মগুণত্বাভাব অসিদ্ধ নহে।

দ্বিতীয় হেতু যথা—শব্দ যখন আত্মাকে বিষয় না করিয়া যে প্রত্যক্ষ উৎপন্ন হয়, তাহার বিষয়, তখন উহা আত্মার গুণ নহে। আত্মগুণ সুখপ্রভৃতির প্রত্যক্ষ 'আমি সুখী আমি দুঃখী' এইরূপে আত্মাকে বিষয় করিয়াই হইয়া থাকে।

তৃতীয় হেতু যথা—শব্দ যখন আত্মাতে সমবায় সম্বন্ধে থাকে না. তখন উহা আত্মগুণ নহে, আত্মার গুণ অবশ্যই আত্মাতে সমবায় সম্বন্ধে থাকিবে। আত্মগুণান্যত্ব সাধ্য ও আত্মসমবেতান্যত্ব প্রকৃত হেতু, অতএব সাধ্যাবিশেষ দোষ হইবে না।

চতুর্থ হেতু যথা—শব্দ যখন আত্মবিশেষ্যক স্বাশ্রয়ভেদপ্রকারক যথার্থ জ্ঞানের বিষয়, তখন উহা আত্মগুণ নহে। আত্মার গুণ সুখ প্রভৃতি ধর্ম্মে আত্মবিশেষ্যক স্বাশ্রয়ভেদপ্রকারক যথার্থজ্ঞানবিষয়ত্ব থাকিতে পারে না. প্রকৃত যথার্থজ্ঞান, এইরূপ যথা,—'আত্মা শব্দাশ্রয় নহে'। শব্দ আত্মার গুণ হইলে উক্তরূপ জ্ঞান যথার্থ হয় না এবং শব্দে উক্ত বিষয়ত্বরূপ হেতু থাকিতে পারে না, অতএব উক্ত হেতুর নিশ্চয়দ্বারাই ফলত অভিপ্রায় সিদ্ধ হয়।

শব্দ দিক্ কাল ও মনের গুণও হইতে পারে না, কারণ শব্দ শ্রোত্রগ্রাহ্য এবং

বিশেষগুণ, দিক্ কাল ও মনে কোনও বিশেষগুণ নাই ও উক্ত ত্রিতয়ের গুণ শ্রোত্রগ্রাহ্য হয় না। অতএব দেখা যায় যে শব্দ গুণ বলিয়া উহা দ্রব্যাশ্রিত, অথচ উহা যখন পৃথিবী প্রভৃতি উক্ত আটটী পদার্থের গুণ হইতে পারে না, তখন উহার আশ্রয়রূপে অতিরিক্ত একটী দ্রব্যই স্বীকার করিতে হইবে, উহাই আকাশ নামে প্রসিদ্ধ।

শব্দব্যাপ্য আকাশগত একত্বসংখ্যা প্রভৃতি আকাশের বৈধর্ম্ম্য ইহা পূর্ব্বেই বলা হইয়াছে। গগনের বিভুত্ব সূত্রকার বলিয়াছেন, অত এব উহার পরমমহৎ-পরিমাণ, শব্দের কারণরূপে সংযোগ ও বিভাগ উক্ত রূপেই আকাশের বৈধর্ম্ম্য।

আকাশ গুণবৎ বলিয়া উহা দ্রব্য, উহার সমানজাতীয় বা অসমানজাতীয় কারণ না থাকায় উহা নিত্য। ঐ আকাশ কর্ণকুহররূপ উপাধিযুক্ত হইয়া শ্রোত্ররূপে শব্দপ্রত্যক্ষের কারণ হইয়া থাকে। শব্দমূলক উপভোগ পুরুষের অদৃষ্টাপেক্ষী, অত এব দুরদৃষ্টপ্রযুক্ত যাহার ইন্দ্রিয় বিকলতা প্রাপ্ত হয়, তাহার ভোগহেতু শুভাদৃষ্টের অভাব বশতই বধিরতা হইয়া থাকে। অতএব কর্ণবিবরের তুল্যতা থাকিলেও কেহ শ্রবণশীল ও কেহ বধির এইরূপ পার্থক্যের অনুপপত্তি হয় না।

प्रशस्तपादभाष्यम्

कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम्। तेषां विषयेषु पूर्व्वप्रत्ययविलक्षणाना-(१)मुत्पत्तावन्यनिमित्ताभावाद् (२) यदत्र निमित्तं स कालः। सर्व्वकार्य्याणाञ्च उत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात्। क्षणलवनिमेषकाष्ठाकलामुहूर्त्तयामाहोरात्रार्द्धमासमासर्त्त्वयनसंवत्सरयुगकल्प-

(१) विलक्षणप्रत्ययानामिति पाठान्तरम्।

(२) निमित्तासम्भवादिति पाठान्तरम्।

मन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुः * । तस्य गुणाः संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः । काललिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात् पृथक्त्वम् । कारणे काल इति वचनात् परममहत्परिमाणम् । कारणपरत्वादिति (३) वचनात् संयोगः । तद्विनाशकत्वाद्विभाग इति । तस्याकाशवत् द्रव्यत्वनित्यत्वे सिद्धे (४) । काललिङ्गाविशेषादञ्जसा एकत्वेऽपि सर्वकार्य्याणा(५)मारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदात् मणिवत् पाचकवद्वा नानात्वोपचार इति ।

[अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि—२अ-२आ-६सू । नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति—२अ-२आ-९सू । तत्त्वंभावेन—२अ-२आ-८सू । तदनुविधानादेकपृथक्त्वञ्चेति—२अ-१आ-३१सू । कारणे कालः—७अ-१आ-२५सू । कारणपरत्वात् कारणापरत्वाच्च—७अ-२आ-२२सू । द्रव्यत्वनित्यत्वे वायुना व्याख्याते—२अ-२आ७सू । इत्येतान्यालम्बनसूत्राणि ।]

जगदीशसूक्तिः

कालमाह परापरेति । परापरपदे भावप्रधाने परत्वापरत्वार्थके ।

---

* सूक्तौ महाप्रलयशब्दस्य अव्याख्यानात् महाप्रलयेति पाठो न सूक्तिसम्मतः प्रतिभाति ।

(३) परत्वादिवचनादिति कारणमहत्त्वादिवचनादिति च पाठान्तरे ।

(४) तस्येत्यारभ्य सिद्धे इत्यन्तसन्दर्भः सर्वत्रादर्शे नास्ति ।

(५) सर्वभूतकार्य्याणामिति पाठान्तरम्

ते चात्र दैशिकपरत्वापरत्वभिन्ने परत्वापरत्वे कालिके बोध्ये। ज्येष्ठः परः कनिष्ठः अपर इति प्रतीतिविषयौ हि गुणविशेषौ परत्वापरत्वे, तद्बुद्धिः कनिष्ठजन्मनोऽन्तरे यावन्तस्तपनपरिस्पन्दास्तदपेक्षया बहुतरतपनपरिस्पन्दान्तरितजन्मनि ज्येष्ठे बहुतरतपनपरिस्पन्दान्तरितजन्मत्वज्ञानेन परत्वम्, अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वज्ञानेनापरत्वञ्च कनिष्ठे जन्यत इति हि गुणनिरूपणे वक्ष्यते। तथाच तादृश-परत्वापरत्वयोः व्यतिकरः मिलनं, स च यौगपद्यायौगपद्यचिरक्षिप्र-प्रत्ययाश्चेति द्वन्द्वः। ते लिङ्गानि ज्ञापकानि यस्य स काल इत्यर्थः।

ननु कथं परत्वापरत्वयोः कालज्ञापकत्वमिति चेदित्थम् उक्ततपन-परिस्पन्दास्तावत्सु (१) कालेषु प्रत्यासन्ना एव परत्वापरत्वोत्पादकाः, अन्यथा युगपदुत्पन्नयोरपि तैः परत्वापरत्वे उत्पद्येताम्। अत्रोत्पद्य-मानयोस्तयोरसमवायिकारणं तत्तपनपरिस्पन्दविशिष्टद्रव्यस्य ज्येष्ठ-कनिष्ठवृत्तिसंयोगो वाच्यः; तद्विशिष्टद्रव्यञ्च न कालं विना अन्यत् सम्भवति, अन्यद्रव्यस्य तपनपरिस्पन्दवैशिष्ट्याप्रतीतेः। कालस्य च तदानीमिदानीं परिस्पन्दा इति प्रतीत्या विषयीकरणात् तदानी-मित्यस्य च कालरूपत्वात्; इत्थञ्च परत्वापरत्वे काललिङ्गे इति बोध्यम्। इदमुपलक्षणम् पुष्पफलादीनां कादाचित्कत्वमपि तल्लिङ्गम्। न च पुष्पादीनां राशिविशेषस्थ-रविणैव सम्भवात् कादाचित्कत्वं न कालानु-मापकमिति वाच्यं पुष्पादिना सह रवेः सान्निध्याभावेन कालस्यैव तत्-सान्निध्यघटकत्वात्।

यौगपद्यमेककालता, अयौगपद्यमनेककालता, चिरत्वं दीर्घ-कालता, क्षिप्रत्वमल्पकालता। अत्र च कालशब्देन सूर्य्यगत्यादयः कालोपाधय उच्यन्ते। कालस्यैकत्वादेव तेषां प्रत्ययैः कालानुमानं कालस्यासिद्धत्वेन साध्यज्ञानाभावादित्यतोऽन्यथानुपपत्त्या कालकल्पक-

---

(१) स्पन्दान्तरितेषु इति पाठान्तरम्।

मेवानुमानमित्याह तेषामिति। पूर्व्वप्रत्ययतो विलक्षणानां विषयेषु घटादिषु तेषां प्रत्ययानामुत्पत्तावित्यन्वयः। पूर्वप्रत्ययो हि पूर्वसिद्ध-द्रव्यत्वादिप्रत्ययः, ततो विलक्षणानां विलक्षणयौगपद्यायौगपद्यचिर-क्षिप्रादिविषयाणामित्यर्थः। तथाहि घटा युगपदुत्पद्यन्ते युगपन्न-श्यन्तीत्यादिप्रत्ययेषु तावद् युगपत्ता पूर्वघटादिप्रत्ययतो विलक्षणो विषयः। स च प्रत्यय ऐन्द्रियको नातीन्द्रियं कालं विषयीकर्त्तुं शक्नोति, अत एकां सूर्य्यक्रियां पूवसिद्धत्वेनानुमितां विषयीकरोति, उत्पद्यमानघटादेश्च प्रत्यासत्त्यभावात् सूर्य्यक्रियाधिकरणकत्वासम्भवात् अन्यथानुपपत्त्या तत्प्रत्यासत्तिघटकः कालः कल्प्यत इत्यर्थः।

यदत्र निमित्तमिति—यदत्र प्रत्यासत्तिघटकमित्यर्थः। तस्य समस्तकार्य्यपदार्थकारणत्वमाह सर्वकार्य्याणामिति। उत्पत्तिराद्य-क्षणसम्बन्धः, स्थितिः स्वप्रागभावध्वंसानधिकरणकालसम्बन्धः, विनाशो ध्वंसः, तद्धेतुः। अत एव सर्वोत्पत्तिमन्निमित्तकारणत्वमस्य साधर्म्य-मुक्तं प्राक्।

तद्धेतुत्वे प्रमाणमाह तद्व्यपदेशादिति। तेन कालेन उपाधी-भूतसूर्य्यक्रियाप्रत्यासत्तिघटकेन सहाधिकरणतया विशिष्य व्यपदेशा-दित्यर्थः। भवति हि इदानीमुत्पन्नः श्वः परश्वो वा उत्पत्स्यते इदानीमस्तीति व्यपदेशैरधिकरणत्वेन विशिष्य कालो व्यपदिश्यत इति। उत्पत्त्यादिव्यवहारान्तरस्यापि हेतुतामाह क्षणलवेति। स्वजन्यविभागानधिकरणं कालः क्षणः, क्षणद्वयं लवः, अक्षिपक्ष्म-संयोगनिमित्तकर्म्माधिकरणं कालो निमेषः, अष्टादशनिमेषास्तु काष्ठा, त्रिंशत्तु ताः कला, मुहूर्त्तयामादयः प्रसिद्धा एव। प्रलयः संहारकाल उक्त एव। एषां व्यवहाराणां हेतुश्च हेतुभूतज्ञानविषय इत्यर्थः।

द्रव्यत्वेन तस्य गुणानाह तस्य गुणा इति। संख्यासु मध्ये तस्य

एकत्वमेव संख्येत्याह काललिङ्गेति। काललिङ्गे परत्वापरत्वे प्रागुक्त-समस्तज्येष्ठकनिष्ठवृत्तीनां तद्द्वयानां स्वज्ञानेनोत्पादका अन्तरा वर्त्तमानास्तपनपरिस्पन्दास्तत्प्रत्यासत्तिघटकस्य॰ कालस्य अविशेषादेकेनैव कालेन निर्वाहे अनेकत्वकल्पनायां गौरवादिति भावः। तथाच काललिङ्गीभूतपरत्वापरत्वयोः सूर्य्यप्रत्यासत्तिघटककालविशेषस्य अविशेष एव परम्परया काललिङ्गपरत्वापरत्वयोरविशेषो बोध्यः, तस्मादित्यर्थः। यद्यपि कालघटौ द्वाविति प्रतीतिविषयो द्वित्वमपि काले वर्त्तत इत्येकत्वमात्रानुपपत्तिः, तथापि स्वसजातीयद्वितीयवृत्तिसंख्यारहितत्वे सति एकत्वं सिद्धमित्यर्थः। तदनुविधानादिति एकत्वानुविधानादित्यर्थः। य एकः सोऽन्यस्मात् पृथगित्यनुविधानम्। कारणे काल इति कारणे कालाख्ये इति(७) हि सूत्रकारवचनं परत्वापरत्ववतोः समस्तज्येष्ठकनिष्ठयोस्तपनपरिस्पन्दप्रत्यासत्तिकारणे काले परममहत्त्वं सिध्यतीति तत्सूत्रार्थः। समस्तज्येष्ठकनिष्ठप्रत्यासत्तिकारणत्वञ्च नाविभुनः सम्भवति, विभुनः परममहत्त्वमावश्यकमिति तत्सूत्रेण प्रतिपादितमित्यर्थः।

कारणपरत्वादिति—कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे इति सूत्रम्; कारणपरत्वादित्याद्योरर्थश्च कारणं परत्वस्य कारणमपरत्वस्य तच्च काल इति बोध्यम्। तस्माद्धेतोः ज्येष्ठे परत्वात् कनिष्ठे चापरत्वात् परत्वापरत्वे तयोः सिद्धे इति। कालस्य हेतुत्वञ्च सूर्य्यस्पन्दाधिकरणतया तत्प्रत्यासत्तिघटकस्यास्य संयोगद्वारेत्यतः कालस्य संयोग इत्यर्थः।

तद्विनाशकत्वादिति—परापरपुरुषक्रियया हि तादृशपुरुषकालविभागः, स च पूर्वसंयोगविनाशकतयैव सिद्ध इत्यतस्तद्विनाशकत्वादित्यर्थः। तस्य आकाशवदिति—आकाशस्य गुणवत्त्वाद् यथा द्रव्यत्वं

(७) कालाख्ये ति इति पाठान्तरम्।

समानासमानजातीयकारणाभावात् नित्यत्वञ्च तथा कालस्यापीत्यर्थः।

ननु कालस्यैकत्वे नित्यत्वे च कथमतीतानागतवर्त्तमानतया स व्यवह्रियते अतीतानागतभेदेन एकत्वासम्भवात् अतीतानागतयोर्नाशप्रागभावप्रतियोगिरूपत्वेन नित्यत्वासम्भवाच्च इत्यत आह काललिङ्गेति। काललिङ्गाविशेषादेकत्वं सिद्धमिति प्रागुक्तम्। तच्च व्याख्यातमेव। तस्मादञ्जसा तत्त्वेन एकत्वे सिद्धे तस्य कालस्य नानात्वोपचार इत्यन्वयः। उपचारे हेतुमाह सर्वकार्य्याणामिति। प्रारम्भः आद्या कृतिः, तत्सान्निध्यादिह प्रागभाव एव आरम्भः, क्रिया च व्यापारः, अभिनिर्वृत्तिः फलं, स्थितिः विद्यमानता, निरोधो ध्वंसः, एतैरुपाधिभिः नानात्वोपचारः। तथाहि भविष्यति पट इत्यत्र पटस्य धर्म्मिणोऽसत्त्वेऽपि तदीयप्रागभावसम्बन्धौपाधिकी कालस्य भविष्यत्ता। कुरुते घटमित्यत्र घटासत्त्वेऽपि तद्धेतुकुम्भकारव्यापारविद्यमानत्वौपाधिकी कालस्य वर्त्तमानता। स्मारयति पूर्व्वानुभवोऽनुभूतमर्थमित्यत्र पूर्वानुभवासत्त्वेऽपि तत्फलस्य स्मरणस्य विद्यमानतौपाधिकी कालस्य वर्त्तमानता। एवं चकार घटमित्यत्र घटकुम्भकारयोर्विद्यमानत्वेऽपि घटोत्पादक्रियाप्रध्वंसौपाधिकी कालस्य अतीततेत्यर्थः।

औपाधिके व्यवहारे दृष्टान्तमाह मणिवदिति—स्फटिकादिमणिवदित्यर्थः। स्फटिकमणेरेकत्वेऽपि यथा जवापुष्पनीलोत्पलादिसान्निध्यौपाधिकरक्तनीलादित्वेन नानात्वव्यवहारस्तथेत्यर्थः। ननु जवारक्तिमादेः स्फटिकावृत्तित्वेन भ्रान्त्यैव व्यवहारः, काले वृत्तिना प्रागभावादिना तूपाधिना न भ्रान्त्या व्यवहार इति दृष्टान्तदार्ष्टान्तिकवैषम्यमित्यत आह पाचकवदिति॥ उपलक्षणमिदम् पुरुषस्यैकत्वेऽपि तद्वृत्तिपचनपठनक्रियौपाधिको हि [यथा], पाचकपाठकतया नानात्वव्यवहारस्तथेत्यर्थः।

——

सूक्तिदीपिका

कालमाहेति उद्देशक्रमप्राप्तमिति शेषः। भावप्रधाने इति—परत्वापरत्वयोरेव काललिङ्गत्वात् धर्मिणोः काललिङ्गत्वाभावादिति भावः। दैशिकेत्यादि—दैशिकपरत्वापरत्वयोः दिग्लिङ्गत्वान्न ताभ्यां कालकल्पना सम्भवतीति विशेषलक्षणया तद्भिन्नपरत्वापरत्वपरिग्रहः।

वक्ष्यत इति—स्वयं भाष्यकारेणेति शेषः। तदुक्तम्—'वर्त्तमानकालयोरनियतदिग्देशसंयुक्तयोर्युवस्थविरयो रूढश्मश्रुकार्कश्यवलिपलितादिसान्निध्ये सति एकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थविरे विप्रकृष्टा बुद्धिरुत्पद्यते, ततस्तामपेक्ष्य परेण कालप्रदेशेन संयोगात् परत्वस्य उत्पत्तिः। स्थविरं चावधिं कृत्वा यूनि सन्निकृष्टा बुद्धिरुत्पद्यते, ततस्तामपेक्ष्य अपरेण कालप्रदेशेन संयोगादपरत्वस्योत्पत्ति'रिति।

मिलनमिति—सामानाधिकरण्यमित्यर्थः। तच्च विषयितासंसर्गावच्छिन्नं कालिकसंसर्गावच्छिन्नं वा मन्तव्यं, समवायेन तयोर्विरुद्धत्वात्। व्यतिकरो व्यत्यय इति श्रीधराचार्य्याः, तथाहि परत्वापरत्वयोर्यो व्यतिकरो व्यत्ययः वैयधिकरण्यमिति यावत्, सोऽपि काललिङ्गम् इत्यर्थः। तादृशस्वल्पाधिकतपनपरिस्पन्दाधिष्ठानकालविशेषसम्बन्धभेदेनैव तयोस्तथात्वस्य उपपादयितव्यत्वात्। प्रकारान्तरेण तदसम्भवात्।

तयोरसमवायिकारणमित्यादि—अत्र 'ज्येष्ठे परत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः, परत्वापरत्वे च सासमवायिकारणके भावकार्य्यत्वात्, असमवायिकारणञ्च तयोः कालपिण्डसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धि'रिति प्राहुः।

ननु आकाशदिगात्ममनोभिः सह पिण्डसंयोगविशेषाणां तथात्वसम्भवात् किमित्यतिरिक्तकालकल्पनमिति चेन्न आकाशादिभिः पिण्डसंयोगविशेषाणां तथात्वे स्वीकर्त्तव्ये विनिगमनाविरहात् आत्ममनसामनन्तत्वाच्च कारणगौरवमित्येक एव लाघवात् कालः कल्प्यते, येन सार्द्धं पिण्डसंयोगाः परत्वापरत्वासमवायिकारणतां लभन्ते इति प्राञ्चः। उपस्कारविवृतिकारादयोऽपि पिण्डमार्त्तण्डोभयसंयुक्त-किञ्चिद्विभुद्रव्यसंयोग एव अपरत्वादिकार्य्ये असम-

वायिकारणम्। तादृशस्वभावत्वं न गगनादेरित्यादिसन्दर्भैस्तमेवार्थं प्रतिपादयन्ति।

तत्प्रत्यासत्तिघटक इत्यादि—तथाहि घटा युगपदुत्पद्यन्त इत्यादेः एकस्यां सूर्य्यक्रियायां घटा उत्पद्यन्त इत्यर्थकस्य घटादौ सूर्य्यक्रियाधिकरणकत्वप्रत्यायकस्य साक्षात्सम्बन्धेन घटसूर्य्यक्रिययोराधेयाधारभावे बाधेन स्वाश्रयकालसंयुक्ततपनाश्रितत्वादिरूपया परम्परया उपपत्तेः कर्त्तव्यतया कालसिद्धिरप्रत्यूहा।

समस्तकार्य्येत्यादि जन्यत्वावच्छिन्नं प्रति निमित्तकारणत्वं कालस्य साधर्म्यमित्यर्थः। अत्र कार्य्यतावच्छेदकसंसर्गतया कालिकस्य कारणतावच्छेदकसंसर्गतया च अभेदस्य प्रवेशः। अत एव न दिगदृष्टादावतिप्रसङ्गः।

स्वप्रागभावेत्यादि—स्वस्य यौ प्रागभावध्वंसौ तयोरनधिकरणं स्वप्रागभावानधिकरणं स्वध्वंसानधिकरणञ्च इत्यर्थः। यः कालः तेन सह सम्बन्धः। एतेन उत्पत्तेः पूर्वं तत्क्षणे च स्वप्रागभावस्य स्वनाशोत्तरं स्वध्वंसस्य च सत्त्वात् न वस्तुनस्तदा तदा स्थितिव्यवहारः। तत्सत्तायाः स्थितिभिन्नत्वात्।

हेतुभूतज्ञानेति—व्यवहारं प्रति व्यवहार्य्यज्ञानस्य कारणतायाः क्लृप्तत्वेन तथाभूतक्षणादिव्यवहारे क्षणादिज्ञानस्य अवश्यं हेतुताया उपेयतया नासङ्गतिरिति भावः।

स्वसजातीयेत्यादि—न च कालवृत्तिद्रव्यत्वादिना घटादेरपि स्वसजातीयत्वेन तद्दोषतादवस्थ्यमिति वाच्यं साजात्यस्य प्रकृते द्रव्यविभाजकधर्मेण विवक्षितत्वात्। न चैवमपि कालस्य एकत्वात् द्रव्यविभाजकधर्मेण स्वसजातीयद्वितीयाप्रसिद्ध्या सत्यन्तदलाप्रसिद्धिरिति वाच्यम् स्वविशिष्टान्यैकत्व एव समुदितग्रन्थतात्पर्य्यात्। स्ववैशिष्ट्यञ्च स्वतादात्म्य-स्वाश्रयसजातीयद्वितीयवृत्तिसंख्यासमानाधिकरणत्वैतदुभयसम्बन्धेन। एवञ्च कालवृत्त्येकत्वस्य स्वाश्रयसजातीयद्वितीयवृत्तिसंख्यासमानाधिकरणत्वासम्भवेन स्वपदेन प्रकृते तस्योपादातुमशक्यतया घटादिवृत्त्येकत्वस्यैव तथात्वेन कालवृत्त्येकत्वे स्वविशिष्टत्वस्याक्षतत्वाददोषः। सम्बन्धघटकसाजात्यमपि पूर्व्ववत् द्रव्यविभाजकरूपेण प्रतिपत्तव्यम्, अन्यथा तद्दोषतादवस्थ्यात्। संख्यायां वृत्तित्वं समानाधिकरणत्वघटकमधिकरणत्वं वृत्तित्वञ्च समवायसम्बन्धेन विवक्षणीयम्, अन्यथा

कालिकादिसम्बन्धमादाय तथैवाप्रसिद्धेः। बहुव्यक्तिकानामपि घटादीनां प्रत्येकमेकत्वस्याबाधितत्वेन यथाश्रुतैकत्वसंख्यापरिग्रहे अर्थान्तरमपि स्वसजातीयेत्याद्यर्थानुसरणबीजमनुसन्धेयम्।

एतैरुपाधिभिरिति—तथाहि एकस्यापि कालस्य किञ्चिद्धर्म्मविशिष्टस्य क्षणत्वं किञ्चिद्धर्म्मविशिष्टस्य मुहूर्त्तत्वं किञ्चिद्धर्म्मविशिष्टस्य च दिनत्वमित्यादिरीत्या उपाधिभूतक्षणादिमात्रवृत्तिधर्म्मभेदेनैव तथा तथा व्यवहाराः, न तु केवलस्य तथा। अत एव सिद्धान्तमुक्तावल्यां 'कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषय' इति प्राह। दिनकरीये तु 'तादृशोपाधीनामेव क्षणत्वादिव्यवहारविषयत्वं, न तु महाकालस्येत्यपि द्रष्टव्य'मित्याहुः। क्षणत्वं स्ववृत्तियावद्ध्वंसवत्त्वमिति पक्षताप्रकरणे जगदीशः। तत्र उत्पन्नं द्रव्यं यावदगुणम्, उत्पन्ने चान्यतन्तुसंयोगे वा यावन्न पटः, उत्पन्ने कर्म्मणि यावन्न विभागः, तावत्कालः क्षणः। अथवा सामग्री कार्य्यरहिता क्षण इत्युदयनाचार्य्याः।

अयञ्च कालः कालिकेन सर्व्वेषां नित्यद्रव्यातिरिक्तानां वा अधिकरणमिति 'कालो हि जगदाधारः कालाधारो न विद्यत', इत्यादि सङ्गच्छते। द्वितीयकल्पे जगत्पदेन नित्यद्रव्यातिरिक्तस्य विशेषलक्षणया परिग्रहादिति भावः।

ভাষ্যতাৎপর্য্য

সম্প্রতি কালপদার্থ নিরূপণ করা হইতেছে। পৃথিবী প্রভৃতি দ্রব্যের ন্যায় কালও একটী দ্রব্য আছে। উহা কালিক পরত্ব ও অপরত্ব অর্থাৎ জ্যেষ্ঠত্ব ও কনিষ্ঠত্ব দ্বারা এবং বস্তুদ্বয়ের এককালতা ভিন্নকালতা দীর্ঘকালতা ও অল্পকালতা দ্বারা সিদ্ধ হইয়া থাকে। যে বস্তু কালানুসারে পূর্ব্বে উৎপন্ন হইয়াছে, তাহাতে পরত্ব ও যে বস্তু কালানুসারে পরে উৎপন্ন হইয়াছে, তাহাতে অপরত্ব গুণ থাকে। ক্ষণে ক্ষণে অনবরত সূর্য্যের স্পন্দন হইতেছে, যাহার জন্ম ও স্থিতিকালের মধ্যে অপর বস্তু অপেক্ষায় সূর্য্যের স্পন্দন অধিক হইয়াছে এই জ্ঞান হয়, তাহাতে আপেক্ষিক পরত্ব এবং যাহার জন্ম ও স্থিতিকালের মধ্যে উক্ত অপর বস্তু

অপেক্ষায় সূর্য্যের স্পন্দন অল্প হইয়াছে এই জ্ঞান হয়, তাহাতে আপেক্ষিক অপরত্ব উৎপন্ন হইয়া থাকে। উক্ত সূর্য্যের স্পন্দনক্রিয়া ঐ বস্তুর সহিত সাক্ষাৎ অসম্বন্ধ বলিয়া তাহাকে সাক্ষাৎসম্বন্ধে পরত্ব ও অপরত্বের কারণ বলা যায় না, পরন্তু পরম্পরায় উক্ত পরিস্পন্দবিশিষ্ট দ্রব্যের সংযোগবিশেষকেই সাক্ষাৎ অসমবায়িকারণ বলিতে হয়। উক্ত দ্রব্য কাল ব্যতীত অপর কোনও কৢপ্ত দ্রব্য হওয়া অসম্ভব, এই জন্য কালনামে একটী অতিরিক্ত দ্রব্য সিদ্ধ হইয়া থাকে। 'তখন এই বস্তু উৎপন্ন, এখন এই বস্তু উৎপন্ন' ইত্যাদিরূপে কালের প্রতীতি হয়। পুষ্প ও ফল প্রভৃতির কদাচিৎ উৎপত্তিদ্বারাও কাল সিদ্ধ হইতে পারে। কারণ পুষ্পাদির সহিত রাশিবিশেষে অবস্থিত সূর্য্যাদির সম্বন্ধ নাই, সম্বন্ধ থাকিলে বরং উহাকেই পুষ্পফলাদির কদাচিৎ উৎপত্তির কারণ বলা যাইত। কিন্তু পুষ্পাদির সহিত সূর্য্যের সম্বন্ধ ধরিতে গেলেও কালকে গ্রহণ করিয়া পরম্পরায়ই উক্ত সম্বন্ধ ব্যবস্থাপন করিতে হইবে, অতএব কাল বলিয়া একটী অতিরিক্ত দ্রব্য স্বীকার না করিয়া গত্যন্তর নাই।

উৎপন্ন বস্তুসমূহের পরত্ব অপরত্ব যৌগপদ্য অযৌগপদ্য চিরস্থায়িত্ব অচিরস্থায়িত্ব প্রভৃতির প্রতীতিও কালব্যতিরেকে অসম্ভব। কারণ সূর্য্যক্রিয়ার আধিক্য ও ন্যূনতা প্রভৃতি দ্বারাই পরত্ব ও অপরত্বাদি নির্ব্বাচন করিতে হইবে, পরন্তু সূর্য্যক্রিয়ার সহিত ঘটাদি জন্য বস্তুর মুখ্য কোনও সম্বন্ধ না থাকায় উহা উপপাদন করা সম্ভব হয় না, কালকে দ্বার করিয়াই উক্ত সম্বন্ধ উপপাদন করা যায়, অতএব ঐ সম্বন্ধের ঘটকরূপে কাল অনুমিত হইতে পারে।

কাল সকল কার্য্যের উৎপত্তি স্থিতি ও বিনাশের কারণ, এই জন্যই সকল জন্য বস্তুর প্রতি নিমিত্তকারণত্ব কালের সাধর্ম্ম্য পূর্ব্বেই নিরুক্ত হইয়াছে। উক্ত কালপদার্থই ক্ষণমুহূর্ত্তাদি ব্যবহারের হেতু, অর্থাৎ কাল একমাত্র হইলেও উপাধিভেদে উহাতে ক্ষণ লব নিমেষ প্রভৃতি ব্যবহার হইয়া থাকে।

কালপদার্থে সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ ও বিভাগ এই কয়টী মাত্র গুণ আছে। কালে সংখ্যার মধ্যে কেবল একত্বসংখ্যা আছে, কারণ ফলের সন্দেহস্থলে লাঘবানুসারে পদার্থের সিদ্ধি হইয়া থাকে, অতএব একমাত্র কাল দ্বারাই যখন পরত্বাপরত্ব প্রভৃতির উপপত্তি হয়, তখন আর অনেক কাল স্বীকার করিয়া গৌরব স্বীকারে প্রয়োজন কি ?

কালের সহিত অন্য দ্রব্যাদি আদান করিয়া দ্বিত্বের প্রতীতি হইলেও এই

একত্বপদে স্বসজাতীয়দ্বিতীয়রাহিত্য বিবক্ষিত হওয়ায় দোষ হয় না। উক্ত সাজাত্য দ্রব্যবিভাজক পৃথিবীত্বাদি ধর্ম্ম লইয়া বলা হইয়াছে, অতএব কালের দ্রব্যবিভাজক ধর্ম্মরূপে সজাতীয় দ্বিতীয় বস্তু না থাকায় দোষের সম্ভাবনা নাই। ঘটাদিপদার্থে উক্তরূপ একত্ব অসম্ভব, কারণ এক ঘটের সহিত পৃথিবীত্ব আদান করিয়া অপর ঘটের সজাতীয়তা রহিয়াছে।

পৃথক্ত্ব ধর্ম্ম একত্বের ব্যাপক বলিয়া কালে একত্বসিদ্ধি দ্বারা পৃথক্ত্বও সিদ্ধ হইবে। অতএব কালে একত্বের ন্যায় পৃথক্ত্ব ধর্ম্মও আছে বুঝিতে হইবে।

কালপদার্থে পরমমহৎ পরিমাণ আছে। কারণ সকল জ্যেষ্ঠ ও কনিষ্ঠবৃত্তি পরত্বাপরত্বের কারণ সূর্য্যক্রিয়ার সহিত সম্বন্ধঘটক বস্তু পরমমহৎ ভিন্ন হইতে পারে না। অণুপরিমাণ বা মধ্যমপরিমাণ বস্তুর সার্ব্বত্রিক সম্বন্ধের অভাববশতই উহা অসম্ভব হয়।

সূর্য্যক্রিয়ার সহিত কালদ্বারা পরম্পরায় সম্বন্ধ রাখিতে হইলে উক্ত বস্তুর সহিত কালের সংযোগ ব্যতীত উহা সম্ভব হইতে পারে না, এই জন্য কালে সংযোগগুণ আছে ইহাও বুঝিতে হইবে। পরত্ব ও অপরত্বযুক্ত পুরুষের ক্রিয়াদ্বারা উক্ত সংযোগের নাশক বিভাগ হইয়া থাকে; অতএব কালে বিভাগগুণও আছে স্বীকার করিতে হইবে।

আকাশ যেমন গুণের আশ্রয় বলিয়া দ্রব্য এবং সমানজাতীয় ও অসমানজাতীয় কোনও কারণ না থাকায় নিত্য বলিয়া সিদ্ধ হইয়াছে, সেইরূপ কালও গুণের আশ্রয় বলিয়া দ্রব্য এবং সমানাসমানজাতীয় কারণের অভাববশতঃ নিত্য বলিয়া সিদ্ধ জানিবে। কালের একত্ব ও নিত্যত্ববিষয়ে অনুপপত্তির বারণ পূর্ব্বেই করা হইয়াছে।

প্রশস্তপাদভাষ্যম্

दिक् पूर्व्वापरादिप्रत्ययलिङ्गा। मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तेष्वेव द्रव्येष्वेतस्मादिदं (१) पूर्व्वेण दक्षिणेन

---

(১) द्रव्येषु तस्मादिदमिति पाठान्तरम्।

पश्चिमेनोत्तरेण पूर्व्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण (२) उत्तरपूर्व्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति (३) सा दिगिति ; अन्यनिमित्तासम्भवात्। तस्यास्तु गुणाः संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः। कालवदेते सिद्धाः। दिग्लिङ्गाविशेषादञ्जसा एकत्वेऽपि दिशः परममहर्षिभिः श्रुतिस्मृतिलोक-व्यवहारार्थं (४) मेरुं प्रदक्षिणमावर्त्तमानस्य भगवतः सवितुर्ये संयोगविशेषा(५)स्तेषां लोकपालपरिगृहीत-दिग्देशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः संज्ञाः कृताः, ततोऽभक्त्या दश दिशः सिद्धाः। तासामेव देवतापरिग्रहात् (६) पुनर्दश संज्ञा भवन्ति माहेन्द्री वैश्वानरी याम्या (७) नैर्ऋती वारुणी वायव्या कौवेरी (८) ऐशानी ब्राह्मी नागी चेति।

[इत इदमिति यतस्तद्दिश्यं लिङ्गम्—२अ-२आ-१०सू। तत्त्वम्भावेन—२अ-२आ-१२सू। तदनुविधानादेकपृथक्त्वञ्चेति—२अ-१आ-३१सू। गुणैर्दिग्व्या-

---

(२) दक्षिणपश्चिमेन पश्चिमदक्षिणेन इति पाठान्तरम्।

(३) प्रत्ययापन्ना भवति इति पाठान्तरम्।

(४) संव्यवहारार्थमिति पाठान्तरम्।

(५) संयोगास्तेषामिति संयोगविभागा इति च पाठान्तरम्।

(६) परिग्रहवशादिति परिगृहीतत्वादिति च पाठान्तरम्।

(७) यामी इति पाठान्तरम्।

(८) वायवी चान्द्रमसी इति पाठान्तरम्।

व्याता—७अ-१आ-२४सू। कारणपरत्वात् कारणापरत्वाच्च—७अ-२आ-२२सू। कार्य्यविशेषेण नानात्वम्—२अ-२आ-१३सू। आदित्यसंयोगाद् भूतपूर्व्वाद् भविष्यतो भूताच्च प्राची—२अ-२आ-१४सू। तथा दक्षिणा प्रतीची उदीची च—२अ-२आ-१५सू। एतेन दिगन्तराणि व्याख्यातानि—२अ-२आ-१६सू। इत्येतान्यालम्बनसूत्राणि]

जगदीशसूक्तिः

दिशमाह दिगिति। लिङ्गं प्रमाणं पूर्वापरादिप्रत्यय एव तादृश-प्रमाणमित्यर्थः। एतादृशप्रत्ययस्य जनकत्वेन दिक् सिध्यतीत्यर्थः। तदेव विशदयति मूर्त्तद्रव्यमिति। अमूर्त्तद्रव्यस्य पूर्वादिप्रत्ययावधित्वं पूर्वादिप्रत्ययविषयत्वञ्च न दृष्टमित्यत उभयत्र मूर्त्तत्वम्। काले पूर्वापरव्यवहारस्त्वतीतत्वाद्यौपाधिक एवेति बोध्यम्। पूर्वेणेत्यादिकं स्वार्थिकेणप्रत्ययान्तं पाणिनिमते, स्वमते तु स्वार्थिकतृतीयान्तम्। इदं पूर्वमित्यादिरर्थः। अन्यनिमित्तासम्भवादिति—पूर्वस्यां दिशीत्येवमेव हि व्यवहारो, न च दिशोऽन्यत्तन्निमित्तं भवितुमर्हति। कालो यदि तन्निमित्तं तदा पूर्वकाल इत्यादिरेव व्यवहारः। पूर्व-दिग्वर्त्तिनि वर्त्तमानवस्तुन्यपि सत्त्वात्।

द्रव्यत्वेन तत्र संख्यादिगुणपञ्चकमाह तस्यास्त्विति। कालवदेत इति—यथा काललिङ्गकालिकपरत्वापरत्वाविशेषात् कालस्य एकत्वं, तथा दिग्लिङ्गदैशिकपरत्वापरत्वाविशेषात् दिशोऽप्येकत्व-मित्यर्थः। तथाहि एकदेशमधिकृत्य कश्चित् पूर्वः कश्चिदपर इति प्रतीत्या पूर्वापरयोः वस्तुनोः परत्वापरत्वे विषयीक्रियेते। अन्तरा बहुतरसंयुक्तसंयोगाल्पतरसंयुक्तसंयोगज्ञानञ्च तयोरुत्पादकम्। तयोरसमवायिकारणानि च ते संयोगाः परापरवस्तुनोः प्रत्यासत्त्यभावादनुपपन्ना अतः प्रत्यासत्तिघटिका दिक् कल्प्यते। तस्याश्च समस्तपरा-

परप्रत्यासत्तिघटकत्वमविशिष्टमित्येकत्वमेव दिश इत्यर्थः। दिग्लिङ्ग-कल्पमानदिशोऽविशेषेण दिग्लिङ्गस्याविशेषः। यथा काले एकत्वानुविधानात् पृथक्त्वं तथा दिश्यपि। पूर्वदर्शितसूत्रात् [यथा] काले परममहत्त्वं तथा दिश्यपि। यथा पूर्व्वदर्शितापरसूत्रात् काले संयोगस्तथा दिश्यपि। यथा काले तद्विनाशकत्वात् विभागस्तथा-दिश्यपीत्यर्थः।

ननु यदि दिगेकैव तदा कथं प्राच्यादयो दश दिश इति व्यवहार इत्यत आह दिगलिङ्गाविशेषादिति। दिग्लिङ्गाविशेषो व्याख्यात एव। तस्मादञ्जसा तत्त्वेन दिश एकत्वे सिद्धेऽपि परममहर्षिभिः मरीच्याद्यैः प्राच्यादिभेदेन दशविधा दिशः संज्ञाः कृता इत्यर्थः। किमर्थमित्यत आह श्रुतिस्मृतिलोकव्यवहारार्थमिति। 'प्राचीप्लवने(१) देशे यजेते'ति 'न प्रतीचीशिराः शयीते'ति श्रौतो व्यवहारः। 'आयुष्यं प्राङ्मुखो भुङ्क्ते' इति स्मार्त्तः। 'दक्षिणेन याहो'त्यादिः लौकिको व्यवहारः, तदर्थमित्यर्थः।

ताः संज्ञाः किं पारिभाषिक्यः किं वा नेत्यत आह अन्वर्था इति। अन्येषामनुगतस्वार्था अन्येषां सम्बन्धस्वार्था इत्यर्थः। स्वार्थो हि दिशोऽन्येषां सम्बन्ध इत्यन्वर्था प्राच्यादिसंज्ञा इत्यर्थः। केषां सम्बन्ध-स्वार्था इत्यत्राह भगवतः सवितुरिति लोकपालपरिगृहीतेति च। मेरुं पर्वतं प्रदक्षिणं यथा स्यात् तथा आवर्तमानस्य वेष्टयतो भगवतः सवितुर्ये संयोगविशेषाः पूर्व्वाचलोपरिभागावच्छिन्ना आकाशसंयोग-विशेषाः तेषामिन्द्रादि(२)लोकपालपरिगृहीतदिग्देशानाञ्च सम्बन्ध-स्वार्थाः(३) संज्ञा इत्यर्थः। दिग्देशानामित्यत्र चार्थः पूरणीयः। तथाच एकस्या एव दिशः तादृशरविसंयोगतादृशदिग्देशोपाधिक्यः दश संज्ञा

(१) प्रवणे इति क्वचित् पाठः।

(१) तेषामिन्द्रियादि इति क्वचित् पाठः।

(२) सम्बन्धः स्वार्थाः इति क्वचित् पाठः।

इत्यर्थः। प्राच्यादिभेदेनेति—प्राच्यवाचीप्रतीच्यादिभेदेन भिन्नाः संज्ञा इत्यर्थः। प्रथममत्र अञ्चति सूर्य्य इति प्राची। अवाक् तदनन्तरमत्र अञ्चति सूर्य्य इत्यवाची। प्रतीपमत्र अञ्चतीति प्रतीचीत्यादि यथा-कथञ्चिदन्यानुगतस्वार्थता बोध्या नक्षत्रमण्डलापेक्षया यतः पृथिवी सा दिगधः। पृथिव्यपेक्षया नक्षत्रमण्डलं यतः सा दिग् ऊर्द्ध्वा इति बोध्यम्। अवान्तरादूर्द्ध्वाधोव्यवहारश्च वह्निज्वाला यत्र याति तदूर्द्ध्वं, गुरुद्रव्यं यत्र पतति तदध इत्येवं रीत्या।

ननु सूर्य्यसंयोगवशात् लोकपालपरिगृहीतदिग्देशवशाच्च दिशां भेदेन संज्ञादशकं प्रसक्तमत आह ततोऽभक्त्येति। अभक्त्या अभेदेन तद्देशदिशां भेदापरिग्रहेण दशविधाः संज्ञा इत्यर्थः। तासामेवेति उपाधिभेदेन भिन्नत्वेन व्यवह्रियमाणानां तासां दिशामेवेत्यर्थः।

सूक्तिदीपिका

कालाकाशयोरिव दिशोऽपि एकमात्रव्यक्तित्वात् कालत्वाकाशत्ववत् दिक्त्वमुपाधिरेव, न तु सामान्यमिति निरुक्तमेवाधस्तात्। तेनैव दिक्त्वा-भिसम्बन्धाद्दिगित्यस्य सूचितप्रायत्वेन न पुनस्तदभिधानम्। दिशो लक्षणन्तु दिग्विशेषणतासम्बन्धावच्छिन्नकार्य्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारण-त्वम्। तथाहि सिद्धान्ते दैशिकविशेषणतासम्बन्धेन जन्यत्वावच्छिन्नं प्रति तादात्म्येन दिशः कारणतया प्रकृतलक्षणं दिशि नानुपपन्नं भवति कालिकविशेषणतासम्बन्धावच्छिन्नकार्य्यतानिरूपिततादृशकारणत्वस्य काले सत्त्वात्तत्रातिप्रसङ्गः स्यादिति दिग्विशेषणतायाः कार्य्यतावच्छेदकसंसर्ग-तया निवेश इति वदन्ति।

जनकत्वेनेति—तथाहि तादृशप्रत्ययरूपकार्य्येण कारणस्य अनुमानात् दिक्सिद्धिरिति भावः। यद्यपि दिक्कृताभ्यां परत्वापरत्वाभ्यामपि दिक्-सिद्धिः सम्भवति, तथापि तदुपेक्षया पूर्व्वादिप्रत्ययस्य लिङ्गत्वाभिधानं गुण-प्रकरणे तयोस्तल्लिङ्गत्वस्य वक्ष्यमाणताभिप्रायेणेति विवृतमाचार्य्यैः।

जनकत्वञ्च पूर्व्वापरादिप्रत्यये प्रयोजकत्वरूपं ग्राह्यम्; तथा च पूर्व्वापरादिप्रत्यये पूर्व्वत्वापरत्वादिकं जनकं, तत्र च तत्तद्दिक्संयोगस्तत्र च दिगिति परम्परया दिशो हेतुत्वम्; विशेषतः पूर्व्वापरादिप्रत्यये साक्षाद्दिशोऽकारणत्वादिति ध्येयम्। अत एव 'परत्वापरत्वबुद्धिं प्रति परत्वापरत्वे तत्र दिक्पिण्डसंयोगस्तत्र दिगिति क्रमेण परम्परया दिशस्तद्बुद्धौ निमित्तत्वं बोध्य'मिति मुक्तावलीदिनकरीये।

परत्वापरत्वे पक्षीकृत्य भावकार्य्यत्वं हेतूकृत्य असमवायिकारणवत्त्वसिद्ध्या कालस्थलोक्तरीत्या संयोगस्य असमवायिकारणत्वे सिद्धे तादृशसंयोगाश्रयतया कालसिद्धिमभिप्रयन्ति। नहि तादृशसंयोगाश्रयो दिगन्यः सम्भवति आकाशादीनां विनिगमनाविरहेण गौरवप्रसङ्गात् मूर्त्तानाम् अव्यापकतया तथात्वासम्भवात्।

अमूर्त्तद्रव्यस्य सर्व्वगततया पूर्व्वादिप्रत्ययावधित्वं पूर्व्वादिप्रत्ययविषयत्वं वा नोपपद्यते तयोरमूर्त्तद्रव्यत्वेन विरोधादत एव मूर्त्तद्रव्यमवधिं कृत्वेत्यादि। अवधित्वं स्वरूपसम्बन्धविशेष एव।

तस्याश्च समस्तेत्यादि—न च परापरत्वाभिमतव्यक्तिभेदेन दिशो भेदसत्त्वेऽपि प्रत्यासत्तेः शक्योपपादनत्वेन कथमित एव दिश एकत्वमिति वाच्यं दिशोऽनेकत्वेन तदुपपत्तावपि गौरवस्य अपह्नोतुमशक्यतया प्रत्यासत्तिघटिकाया एकस्या एव दिशः सिद्धेः।

प्रथममत्रेत्यादि—अन्ये पुनरन्यथैव संज्ञाभेदबीजमुन्नयन्ति, यथा—यत्पुरुषस्य उदयगिरिसन्निहिता या दिक्, सा तत्पुरुषस्य प्राची; एवमुदयगिरिव्यवहिता या दिक्, सा प्रतीची; यत्पुरुषस्य सुमेरुसन्निहिता या दिक्, सा उदीची; तद्व्यवहिता त्ववाची। एकस्या एव दिशः पुरुषभेदेन विपरीतदिक्संज्ञाभागित्वेन पुरुषविशेषनियन्त्रणम्। निष्कर्षे तु यन्मूर्त्तादुदयगिरिसन्निहितं यन्मूर्त्तं सा ततः प्राचीत्यादि। तदपेक्षया उदयगिरिसन्निहितत्वञ्च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षया अल्पतरोदयगिरिसंयुक्तसंयोगवत्त्वम् इत्यादिरूपेण अर्थो बोध्यः। एवञ्च मथुरायाः प्राच्यः प्रयाग इत्यादौ मथुरानिष्ठोदयगिरिसंयोगपर्य्याप्तसंख्याव्याप्यसंख्यापर्य्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयाग इत्यन्वयधीः प्रतिपत्तव्या। तादृशसंख्या-

ব্যাপ্যত্বঞ্চ তাদৃশসংখ্যাসমানাধিকরণপ্রতিযোগ্যবৃত্তিভেদপ্রতিযোগিতাবচ্ছেদকত্বং, ন তু ব্যাপকসামানাধিকরণ্যাদিরূপং, তদুপগ্রহে স্বস্মিন্নপি স্বনিরূপিততাদৃশব্যাপ্যত্বানপায়াৎ মথুরাদাবপি মথুরাদ্যবধিকপ্রাচ্যত্বাদিব্যবহারপ্রসঙ্গাৎ। এতদ্বিস্তরস্তু গ্রন্থান্তরে দ্রষ্টব্যঃ। সপ্তপদার্থীকারাস্তু রৌদ্রীং নাম একাদশীং দিশমপ্যাবেদয়ন্তি। তদুক্তং সপ্তপদার্থ্যাং 'দিগৈন্দ্রী আগ্নেয়ী যাম্যা নৈর্ঋতী বারুণী বায়বী কৌবেরী ঐশানী নাগী ব্রাহ্মী রৌদ্রী চেত্যেকাদশবিধা' ইতি। 'রৌদ্রী অন্তরিক্ষপ্রদেশ' ইতি মাধবসরস্বতীকৃত-সপ্তপদার্থীমিতভাষিণ্যাম্। 'রৌদ্রী দশানামপি দিশাং মধ্যভাগ' ইতি জিনবর্দ্ধনসূরিকৃত-সপ্তপদার্থীটীকায়ামুক্তমুপলভ্যতে। সর্বাভিরেতাভির্দিক্‌সংজ্ঞাভিঃ তত্তদ্দিগোঽধিদৈবতাঃ স্মৃতাঃ।

দীধিতিকৃৎপ্রভৃতয়স্তু দিক্কালয়োরীশ্বররূপতামঙ্গীকুর্বতে। নব্যাস্তু দিক্কালয়োরীশ্বরস্বরূপত্বং তত্তজ্জীবরূপত্বং বেত্যত্র বিনিগমকাভাবাৎ তাবিমাবতিরিচ্যেতে ইতি প্রাহুঃ।

ভাষ্যতাৎপর্য্য

আকাশ এবং কালের ন্যায় দিক্‌ও একটী দ্রব্য। উহাতে যে দিক্‌ত্ব ধর্ম্ম আছে উহা জাতি নহে, উপাধিমাত্র, ইহা পূর্ব্বেই বলা হইয়াছে। কাল যেরূপ কালিকবিশেষণতাসম্বন্ধে সকল জন্যবস্তুরই উৎপত্তির কারণ, সেইরূপ দিক্ দৈশিকবিশেষণতাসম্বন্ধে সকল জন্যবস্তুর উৎপত্তির কারণ। উক্ত কার্য্যকারণভাব দ্বারাই দিক্‌পদার্থের লক্ষণও নির্ব্বচন করা যাইতে পারে। পূর্ব্ব পশ্চিম প্রভৃতি প্রতীতি দ্বারা উক্ত দিক্‌পদার্থের সিদ্ধি করিতে হইবে। দৈশিক পরত্ব ও অপরত্বদ্বারাও দিক্‌পদার্থের সিদ্ধি হইয়া থাকে। যথা দূরবর্ত্তী বস্তুতে পরত্ব ও অদূরবর্ত্তী বস্তুতে যে অপরত্বের জ্ঞান হয়, ঐ পরত্ব ও অপরত্ব বিশেষ কারণ অপেক্ষা করিয়া থাকে। বিশেষ কারণ ব্যতীত উহার উৎপত্তি হইলে অবিশেষরূপে সকল বস্তুতেই তুল্যভাবে পরত্ব ও অপরত্বের সম্ভব হইত। মূর্ত্তপদার্থবিশেষরূপ উপাধিবিশিষ্ট দিক্ ও পরাপর পদার্থের সংযোগগত অল্পতা ও ভূয়স্ত্বকেই যথাক্রমে অপরত্ব ও পরত্বের কারণ

বলিতে হইবে। উক্ত সংযোগের আশ্রয়রূপে দিক্‌ও পরম্পরায় সিদ্ধ হয়। অন্য কোনও দ্রব্য উক্ত সংযোগাদির আশ্রয় বলা যায় না, কারণ মূর্ত্তদ্রব্য সকল মূর্ত্ত বস্তুর সহিত সংযুক্ত হইতে পারে না বলিয়া সকল মূর্ত্তদ্রব্যের পরত্বাপরত্বের কারণ সংযোগের আশ্রয় তাহাকে কিরূপে বলা যাইতে পারে। আত্মাপ্রভৃতি বিভু পদার্থের একটীকে কারণ বলিতে গেলে অপরটীকেই বা বলিতে বাধা কি? অতএব বিনিগমনার অভাববশতঃ সকলকেই কারণ বলিতে হইলে মহাগৌরব হইয়া ওঠে, অতএব একমাত্র বিভুদিক্‌ স্বীকার করিয়া গৌরবাদি দোষ নিরাস করিতে হইবে।

কালপদার্থের ন্যায় দিক্‌পদার্থেও সংখ্যাপ্রভৃতি পাঁচটী গুণ আছে। সংখ্যা একত্ব, পরিমাণ পরমমহত্ত্ব, পৃথক্‌ত্ব, সংযোগ ও বিভাগ এই পাঁচটীই দিক্‌পদার্থের গুণ।

উহার বিশেষ কারণ জগদীশসূক্তিতে বিশেষরূপে বিবৃত হইয়াছে। এখন আপত্তি হইতেছে এই যে, যদি দিক্‌ কেবল একটীই থাকে, তবে পূর্ব্ব পশ্চিম প্রভৃতি রূপে বিভিন্নব্যবহার কিরূপে উপপন্ন হইতে পারে। তাহার উত্তর এই যে দিক্‌ কেবল এক হইলেও উপাধিভেদে উহার নানাত্ব ব্যবহার হইয়া থাকে। একটী একটী বিশেষ মূর্ত্তবস্তুকে উপাধিরূপে আদান করিয়া বিভু একমাত্র দিক্‌পদার্থেরও ঘটাকাশ পটাকাশাদির ন্যায় পূর্ব্ব পশ্চিমাদিরূপে বিভিন্ন ব্যবহার সুসঙ্গত হইতে পারে।

দিক্‌পদার্থের বিভিন্নরূপে অন্যপদার্থের যোগবশতঃ দশপ্রকার সংজ্ঞা হইতে পারে যথা—প্রথম যে দিকে সূর্য্য উদিত হন্‌, সেই দিক্‌ প্রাচী, তদনন্তর সূর্য্য যে দিকে গমন করেন সেই দিক্‌ অবাচী, বিপরীত যে দিকে সূর্য্য গমন করেন, সেই দিক্‌ প্রতীচী ইত্যাদিরূপে সূর্য্যের সম্পর্ক লইয়া দিকের সংজ্ঞা পরিবর্ত্তিত হয়।

কেহ কেহ বলেন যে, যে বস্তু হইতে যে বস্তু উদয়গিরির নিকটবর্ত্তী, তাহাই তাহার পূর্ব্বদিক্‌, এবং যে বস্তু হইতে যে বস্তু উদয়গিরির বিপ্রকৃষ্ট, তাহাই তাহার পশ্চিম দিক্‌ ইত্যাদি। ইহারা সকলেই মূর্ত্ত কোনও উপাধিবিশেষকেই দিক্‌শব্দে ধরিয়া লইয়া থাকেন, কাজেই পূর্ব্ব পশ্চিম ইত্যাদি ব্যবহারে দিকের একত্ব বিঘটিত হয় না।

দীধিতিকার প্রভৃতি দিক্‌ ও কাল বলিয়া অতিরিক্ত পদার্থ স্বীকার না

করিয়া উহা ঈশ্বরস্বরূপ কল্পনা করিয়া লইয়াছেন। কিন্তু নব্যসম্প্রদায় বলেন যে, দিক্ ও কালকে ঈশ্বরস্বরূপ কল্পনা করিব, অথবা জীবস্বরূপ কল্পনা করিব, তাহার কোনও বিনিগমনা না থাকায় প্রত্যেকস্বরূপই কল্পনা করা যাইতে পারে, তাহাতে মহাগৌরব হয়, অতএব উহা অতিরিক্ত স্বীকার করিয়া গৌরব নিরাস করাই শ্রেয়। বিস্তৃত গ্রন্থান্তরে জ্ঞাতব্য।

প্রশস্তপাদভাষ্যম্

আত্মত্বাভিসম্বন্ধাদাত্মা। তস্য সৌক্ষ্ম্যাদপ্রত্যক্ষত্বেঽপি (১) করণৈঃ শব্দাদ্যুপলব্ধ্যনুমিতৈঃ শ্রোত্রাদিভিঃ সমধিগমঃ ক্রিয়তে। বাস্যাদীনামিব(২) করণানাং কর্ত্তৃপ্রযোজ্যত্বদর্শনাত্(৩) শব্দাদিষু প্রসিদ্ধ্যা চ প্রসাধকোঽনুমীয়তে। ন শরীরেন্দ্রিয়মনসা(৪)মজ্ঞত্বাত্, ন শরীরস্য চৈতন্যং ঘটাদিবদ্ভূতকার্য্যত্বাত্ মৃতে চাসম্ভবাত্। নেন্দ্রিয়াণাং করণত্বাত্ উপহতেষু বিষয়াসান্নিধ্যে চানুস্মৃতিদর্শনাত্। নাপি মনসঃ করণান্তরানপেক্ষিত্বে যুগপদালোচনস্মৃতিপ্রসঙ্গাত্ স্বয়ং করণভাবাচ্চ পরিশেষাদাত্মকার্য্যত্বাত্ (৫) তেনাত্মা

---

(১) সৌক্ষ্ম্যাদপ্রত্যক্ষত্বে সতি ইতি পাঠান্তরম্।

(২) ইবেতি ক্বচন পুস্তকে নাস্তি।

(৩) ক্বচিত্ পুস্তকে কর্ত্তৃপদং নাস্তি।

(৪) মনসাং চৈতন্যেতি পাঠান্তরম্।

(৫) কার্য্যং জ্ঞানমিতি পাঠান্তরম্। অন্যত্র কার্য্যত্বাদিত্যধিকম্।

समधिगम्यते। शरीरसमवायिनोभ्याञ्च हिताहित-प्राप्तिपरीहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां (६) रथ-कर्म्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठातानु-मीयते। प्राणादिभिश्चेति।

कथं? शरीरपरिगृहीते(७) वायौ विकृतकर्म्मदर्शनात् भस्त्राध्मापयितेव निमेषोन्मेषकर्म्मणा नियतेन दारु-यन्त्रप्रयोक्तेव देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्त-त्वात् गृहपतिरिव अभिमतविषयग्राहककरणसम्बन्ध-निमित्तेन मनःकर्म्मणा गृहकोणेषु पेलकप्रेरक इव दारकः नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनात् अनेकगवाक्षान्तर्गतप्रेक्षक-वदुभयदर्शी कश्चिदेको विज्ञायते।

सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते। ते च न शरीरेन्द्रियगुणाः, कस्मात्? अहङ्कारेणैक-वाक्यताभावात् प्रदेशवृत्तित्वात् अयावद्द्रव्यभावि-त्वात् वाह्येन्द्रियाप्रत्यक्षत्वाच्च(८) तथा अहं-शब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति।

तस्य गुणा बुद्धि-सुख-दुःखे-च्छा-द्वेष-प्रयत्न-धर्म्मा-धर्म्म-

---

(६) प्रवृत्तिनिवृत्तिभ्यामित्यंशः क्वचिन्न वर्त्तते।

(७) विगृहीते इति पाठान्तरम्।

(८) वाह्येन्द्रियाग्राह्यत्वाच्च इति पाठान्तरम्।

संस्कार-संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः। आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। धर्म्माधर्म्मावात्मान्तरगुणानामकारणत्ववचनात्। संस्कारः स्मृत्युत्पत्तौ कारणवचनात्। व्यवस्थावचनात् (९) संख्या। पृथक्त्वमप्यत एव। तथाचात्मेति वचनात् परममहत्परिमाणम्। सन्निकर्षजत्वात् सुखादीनां संयोगः। तद्विनाशकत्वाद्विभाग इति

[ज्ञाननिर्द्देशे ज्ञाननिष्पत्तिविधिरुक्तः—८अ-१आ-२सू। इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः—३अ-१आ-२सू। सोऽनपदेशः—३अ-१आ-३सू। कारणाज्ञानात्—३अ-१आ-४सू। कार्य्येषु ज्ञानात्—३अ-१आ-५सू। आत्मेन्द्रियार्थसन्निकर्षाद्द यत् निष्पद्यते तदन्यत्—३अ-१आ-१८सू। प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्—३अ-१आ-१९सू। प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि—३अ-२आ-४सू। यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद्दृष्टं लिङ्गं न विद्यते—३अ-२आ-६सू। सामान्यतो दृष्टाच्चाविशेषः—३अ-२आ-७सू। तस्मादागमिकः—३अ-२आ ८सू। अहमिति शब्दस्य व्यतिरेकान्नागमिकम्—३अ-२आ-९सू। यदि दृष्टमन्वक्षमहं देवदत्तोऽहं यज्ञदत्त इति—३अ-२आ-१०सू। दृष्टयात्मनि लिङ्गे एक एव दृढ़त्वात् प्रत्यक्षवत् प्रत्ययः—३अ-२आ-११सू। देवदत्तो गच्छति यज्ञदत्तो गच्छतीत्युपचाराच्छरीरे प्रत्ययः—३अ-२आ-१२सू। सन्दिग्धस्तूपचारः—३अ-२आ-१३सू। अहमिति प्रत्यगात्मनि भावात्परत्राभावादर्थान्तरप्रत्यक्षः—३अ-२आ-१४सू। देवदत्तो गच्छतीत्युपचारादभिमानात्तावच्छरीरप्रत्यक्षोऽहङ्कारः—३अ-२आ-१५सू। सन्दिग्धस्तूपचारः—३अ-२आ-१६सू। न तु शरीरविशेषाद्द यज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः—३अ-

(९) वचनाभिसम्बन्धादिति पाठान्तरम्।

२आ-१७सू। अहमिति मुख्ययोग्याभ्यां शब्दवद्व्यतिरेकाव्यभिचाराद् विशेषसिद्धेर्नागमिकः—३अ २आ-१८सू। व्यवस्थातो नाना—३अ-२आ-२०सू। शास्त्रसामर्थ्याच्च—३अ-२आ-२१सू। आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात्—६अ-१आ-५सू। आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः—९अ-२आ-६सू। विभवान्महानाकाशस्तथा चात्मा—७अ-१आ-२२सू। इत्येतान्यालम्बनत्वमूह्यानि।]

जगदीशसूक्तिः।

आत्मानमाह आत्मत्वेति। समवायिन ज्ञानाश्रयतावच्छेदकमात्मत्वं जातिरीश्वरात्मसाधारणी। सा च अन्यात्मन्यप्रत्यक्षत्वेऽपि योगिव्यक्तेरात्मनि मनसा प्रत्यक्षीक्रियते। परमाणावप्रत्यक्षमपि पृथिवीत्वद्रव्यत्वादिकं घटादाविव चक्षुषा मानसप्रत्यक्षस्यापि तस्य अनुमेयत्वमप्याह तस्य सौक्ष्म्यादिति। सौक्ष्म्यं वहिरिन्द्रियग्रहणयोग्यताविरहः। तस्मादप्रत्यक्षत्वेऽपि वहिरिन्द्रियाप्रत्यक्षत्वे सत्यपि करणैः श्रोत्रादिभिः तस्य अधिगमः अनुमितिरित्यर्थः।

ननु करणानां श्रोत्रादीनामतीन्द्रियत्वात् कथं तैरनुमानमित्यत आह शब्दाद्युपलब्ध्यनुमितैरिति। शब्दाद्युपलब्धिभिः श्रोत्राद्यनुमानं यथा—शब्दाद्युपलब्धयः करणसाध्याः पुरुषव्यापारत्वात् दात्रादिकरणकच्छिदिक्रियावदिति। श्रोत्रादिभिरात्मानुमितिस्तु यथा—श्रोत्रादीनि कर्त्तृव्यापार्य्याणि करणत्वात् वासीवत् इति। वासी छिदाकरणयन्त्रविशेषः। वास्यादौ साध्यहेत्वोः सहचारं दर्शयति वास्यादीनामिवेति। आत्मनि प्रमाणान्तरमपि दर्शयति शब्दादिषु प्रसिद्धा चेति। शब्दादिष्विति षष्ठ्यर्थे सप्तमीत्यर्थः। शब्दादीनां प्रकृष्टया सिद्ध्या ज्ञानेन प्रसाधको ज्ञाता अनुमीयत इत्यर्थः। तदनुमानं यथा—

ज्ञानं क्वचिदाश्रितं कार्य्यत्वात् गन्धवदिति। आश्रितत्वञ्च समवायेन बोध्यम्। तेन न शरीरेण सिद्धसाधनम्।

ननु शरीरे बहिरिन्द्रिये मनसि वा समवेतं ज्ञानमस्तु इत्यत आह न शरीरेन्द्रियेति। एषां नाधिगम इत्यनुषङ्गः। अत्र हेतुमाह अज्ञत्वादिति। तेषां ज्ञानानाश्रयत्वादित्यर्थः। एषां प्रत्येकं चैतन्याभावं ग्राहयति न शरीरस्य चैतन्यमिति। चैतन्यं ज्ञानं तन्न शरीरस्य। तत्र हेतुमाह घटादिवदिति। भूतत्वात् कार्य्यत्वाच्च हेतुद्वयम्। घटादिवदिति दृष्टार्थः।

ननु अप्रयोजकमिदं भूतस्य कार्य्यस्य वा चैतन्याश्रयत्वे को विरोध इत्यत आह मृते चेति। यदि शरीराश्रितं चैतन्यं स्यात्, मृते शरीरेऽपि स्यात्तत्र तदसम्भवात् न शरीराश्रितं चैतन्यमित्यर्थः। बहिरिन्द्रियाणां चैतन्याभावं ग्राहयति नेन्द्रियाणामिति। न बहिरिन्द्रियाणामित्यर्थः। हेतुमाह करणत्वादिति। जलानयनकरणघटादिरत्र दृष्टार्थः। अत्राप्यप्रयोजकत्वमाशङ्क्यान्यदाह उपहतेष्विति। अर्थस्मृतिर्हि(१) ज्ञानविशेषः, सा यदि श्रोत्रादीन्द्रियसमवेता स्यात्, तदा वाधिर्य्यादिहेतुरोगविशेषादिना उपहतेष्विन्द्रियेषु सत्सु स्मृतिर्न स्यादाश्रयस्योपहतत्वात्, उपहतेष्वपि दृश्यमाना तु स्मृतिः आश्रयान्तरमधिगमयतीत्यर्थः।

स्मृतेरिन्द्रियानाश्रयत्वे हेत्वन्तरमप्याह विषयासान्निध्यादिति। इन्द्रियेण स्वेन जन्यैव स्मृतिरिन्द्रियसमवेता वाच्या, अन्यथा अतिप्रसङ्गात्, तथाच इन्द्रियस्य प्रतिरोधकात् विषयविनाशात् विषयस्य इन्द्रियासान्निध्यात् इन्द्रियेण तदजननेऽपि दृश्यमाना स्मृतिराश्रयान्तरमधिगमयतीत्यर्थः। न च स्वजन्यानुभवजन्यसंस्कारसत्त्वात् तत्-

(१) अनुस्मृतिर्हि इति पाठान्तरम् स्यात्।

स्मृतिरिति वाच्यं संस्कारस्येन्द्रियावृत्तित्वात्, अन्यथा इन्द्रियस्य उपघाते नाशे वा स्मृतिर्न स्यात्।

नन्वेवं भूतत्वेन कार्य्यत्वेन वा चैतन्यस्य शरीरावृत्तित्वे उपघाते विषयासान्निध्ये च स्मृतिदर्शनात् वहिरिन्द्रियावृत्तित्वे चाभूते अजन्ये अनुपहते केनाप्यप्रतिरुद्धे विषयसन्निकर्षे च मनोरूपेन्द्रिये चैतन्यमास्तामित्यत आह नापि मनस इति। अयमभिप्रायः—ज्ञानाश्रयत्वेनानुमीयमानं मनो ज्ञानकर्त्तैव (२) स्यात् न ज्ञानकरणं (३) तथा च चक्षुरादीन्द्रियाणां युगपत् स्वस्वसन्निकर्षे मनसस्तदिन्द्रियसन्निकर्षापेक्षां विना युगपदनेकस्य आलोचनस्य जननप्रसङ्गादित्यर्थः। करणस्येव कर्त्तुरेकव्यापारमात्रजननियमाभावात्।

अथ यदिन्द्रियसंयुक्तं मनस्तन्द्रियविषयविषयकमेव ज्ञानं मनसा स्वस्मिन् जन्यत इति चेत्तथापि ज्ञानाश्रयतयैव सिद्धं मनो न करणतयेत्यतस्तदेवात्मेति पर्य्यवसितं, मन इति तस्य संज्ञामात्रभेदः स्यात्। तथाच आत्मा तावतैव सिद्ध एव स्यात्, परन्तु युगपदनेकव्यापारापत्तिवारणार्थम् एकमात्रव्यापारजननहेतु करण(४)मनुमातुमवशिष्यते। तच्च मनोग्रन्थे वक्ष्यत इति भावः।

ननु करणतयैव मनोऽनुमाय तत्रैव ज्ञानाश्रयतानुमाप्यत इत्यत आह स्वयं करणभावाच्चेति। स्वस्मिन्नित्यर्थे स्वयमिति। करणतया अनुमाने स्वस्मिन् मनसि ज्ञानकरणभावात् ज्ञानकरणत्वात् न ज्ञानाश्रयत्वमित्यर्थः। ज्ञानाश्रयासिद्धौ निराश्रयस्य ज्ञानस्यैव असिद्धौ तत्करणानुमानं न सम्भवति। ज्ञानाश्रयानुमाने च ज्ञानकरणभिन्न एवासौ सिद्ध इति मनसः करणतामात्रं, ततो न ज्ञानाश्रयत्वमित्यर्थः। आत्मकार्य्यत्वादिति चैतन्यस्येति शेषः।

---

(२) ज्ञानकर्त्रेव इति पाठान्तरम् स्यात्।

(३) कारणमिति पाठान्तरम्।

(४) – हेतुं करणमिति पाठः क्वचित्।

ननु शब्दादीनां ज्ञानेन तदाश्रय आत्मा अनुमीयत इत्युक्तं आत्म-पदार्थसाधने च न स्वात्ममात्रसाधनमुद्देश्यम्, किन्तु सकलात्मसाधनमेव; तथा च परज्ञानस्याप्रत्यक्षत्वेन अनुमात्रा अज्ञातत्वात् कथं तज्ज्ञानेन तदनुमानमित्यतः सकलात्मसाधकप्रत्यक्षहेतुना तत् साधयति शरीर-समवायिनीभ्यामिति। प्रयत्नवान् विग्रहस्य शरीरस्य अधिष्ठाता संयोगी, अर्थात् स्वपरसाधारण आत्मा अनुमीयत इत्यर्थः। केन हेतुना अनुमीयत इत्यत्राह प्रवृत्तिनिवृत्तिभ्यामिति। प्रवृत्तिनिवृत्ती यत्न-विशेषौ तत्पदद्वयस्य तज्जन्यक्रियापरत्वेन प्रवृत्तिनिवृत्तिजन्यक्रियाभ्या-मित्यर्थः। क्रियामात्रस्य वाय्वादौ व्यभिचारात् प्रवृत्तिनिवृत्तिजन्य-क्रिये एव प्रत्येकं हेतू। तयोः क्रिययोः प्रवृत्तिनिवृत्तिजन्यतां ग्राह-यति हिताहितेति। तयोः प्राप्तिपरीहारौ यथासंख्यं बोध्यौ। तद्-योग्याभ्यामित्यर्थः। वाय्वादिक्रिया तु न वाय्वादेर्हिताहितप्राप्तिपरी-हारयोग्या। शरीरं प्रयत्नवत्संयुक्तं हिताहितप्राप्तिपरीहारयोग्यक्रिया-वत्त्वादित्यनुमाने हेतोः पक्षवृत्तित्वं साधयति शरीरेति। शरीरं सम-वायि ययोस्ताद्दशीभ्यामित्यर्थः। अत्र दृष्टान्तमाह रथकर्म्मणीति। प्रयत्नवतः सारथेः रथाधिष्ठानं यथा रथकर्म्मणा अनुमीयत इत्यर्थः। हेत्वन्तरमाह प्राणादिभिश्चेति। आदिना शरीराभ्यन्तरीणापानादि-समस्तवायुपरिग्रहः।

ननु प्राणादेः प्रयत्नवदनधिष्ठितशरीरेऽपि सम्भवोऽस्तु कथं तेषु व्याप्तिरिति पृच्छति कथमित्यनेन। उत्तरयति शरीरपरिगृहीत इति। वायोर्हि स्वाभाविकी तिर्य्यग्गतिः, तस्य ऊर्द्ध्वाधोगतिरूपं कर्म्म तु विकृतं, तद्दर्शनात् शरीराधिष्ठाता प्रयत्नवाननुमीयत इत्यर्थः। अत्र दृष्टान्तः भस्त्रेति। भस्त्रा कर्म्मकारस्य वायुप्रेरकचर्म्मपुटकम्; तदा-ध्मापयिता तदीयवायुक्रियाजनकः कर्म्मकार इवेत्यर्थः। प्रयोगस्त्वेवं जीवच्छरीरं प्रयत्नवदधिष्ठितं सम्मूर्च्छनरहितविकृतक्रियवाय्वाश्रयत्वात्

भस्त्रावदिति। हेत्वन्तरमाह निमेषोन्मेषेति। नियतेन वाय्वाद्याघातजन्यभिन्नतया नियतेन स्वाभाविकेन निमेषोन्मेषरूपचक्षुःपक्ष्मकर्म्मणा विग्रहस्य अधिष्ठाता प्रयत्नवाननुमीयत इत्यर्थः। दारुयन्त्रनिमेषोन्मेषकर्म्मणा दारुयन्त्रप्रयोक्ता शिल्पीव। प्रयोगस्त्वेवं—जीवच्छरीरं प्रयत्नवदधिष्ठितं वाय्वाद्यभिघातजन्यभिन्ननिमेषोन्मेषवत्त्वात् तादृशनिमेषोन्मेषविशिष्टदारुयन्त्रवदिति।

हेत्वन्तरमाह देहस्येति। देहस्य वृद्धिः पुष्टिः, क्षतभग्नयोः संरोहणं पूर्वावस्थावत्करणम्, आदिना चेष्टापरिग्रहः। तन्निमित्तत्वादित्यर्थः। प्रयत्नवान् देहस्याधिष्ठाता अनुमीयत इत्यनुषङ्गः। अत्र दृष्टान्तो गृहपतिरिवेति। गृहस्य वृद्धिक्षतभग्नसंरोहणैर्यथा तत्कारको गृहपतिरित्यर्थः। आदिपदग्राह्येण हेतुना अनुमाने तु न गृहपतिर्दृष्टान्तः गृहस्य चेष्टाभावात् प्रयत्नाधीनशरीरक्रियाया एव चेष्टात्वात्। प्रयोगस्त्वेवं—जीवच्छरीरं प्रयत्नवदधिष्ठितं वृद्ध्यादिमत्त्वात् वृद्ध्यादिमद्गृहादिवदिति। हेत्वन्तरमाह अभिमतेति। बहुषु वस्तुषु पुरःस्थितेष्वपि यत्र वस्तुनि दिदृक्षा सोऽभिमतो विषयः, तद्ग्राहकं करणं चक्षुः, तत्सम्बन्धनिमित्तेन मनःकर्म्मणा विग्रहस्याधिष्ठाता प्रयत्नवाननुमीयत इत्यर्थः। विषयेन्द्रियसंयोगहेतोर्मनःकर्म्मणः प्रयत्नवन्तं विना अन्याप्रयोज्यत्वात्, अन्यथा सुषुप्तस्यापि मनसा तादृशसंयोगजननापत्तेः। गृहकोण इत्यादिरत्र दृष्टान्तः। पेलकं खेलाविशेषं कुर्व्वतां शिशूनां जतुगुटिका। गृहकोणेषु व्यवस्थिते गुटिकान्तरे वस्त्वन्तरे वा पेलकप्रेरको दारकः शिशुरिवेत्यर्थः। अभिमतविषयगुटिकासंयोगहेतुगुटिकाकर्म्मणापि तत्प्रेरकः शिशुरनुमीयते। प्रयोगस्त्वेवं—मनः प्रयत्नवदधिष्ठितम् अभिमतविषयसंयोगहेतुगतिमत्त्वात् यथोक्तदारकप्रेरितपेलकवदिति। अभिमतसंयोगस्तु चक्षुषस्तद्धेतुक्रियमनसः, पेलके त्वभिमतः संयोगः स्वस्यैवेति विशेषो बोध्यः।

रसनेन्द्रियविकारेणापि तदनुमानमाह नयनविषयेति। नयनविषयस्तिन्तिड्याद्यम्लद्रव्यं तस्यालोचनं चक्षुषा ग्रहणं तदनन्तरं रसानुस्मृतिः, तदीयाम्लरसस्मरणम्, तत्क्रमेणेति। तत्क्रमेण रसनेन्द्रियस्य विक्रियाया रसनायाः स्रणिकाविर्भावणरूपस्य विकारस्य दर्शनात् उभयदर्शी अम्लद्रव्य-तद्रसद्वयदर्शी तदुभयज्ञाता आत्मा अनुमीयत इति परत्रान्वयः। क्रमेणेत्यत्र क्रमश्च अम्लरसस्मरणानन्तरं तद्ग्राहकस्यातीन्द्रियस्यानुमानम्, ततस्तदिन्द्रियस्य विकारदर्शनादित्यर्थः। रसनेन्द्रियविकारस्य अम्लद्रव्यरस-तदुभयज्ञानं विना अनुपपत्तेः, तदुभयज्ञानञ्च तदुभयज्ञातारं तच्छरीराधिष्ठातारं विनानुपपत्तेरिति क्रमेण शरीराधिष्ठाता तदुभयदर्शी अनुमीयत इत्यर्थः। अत्रोभयदर्शित्वमात्रे दृष्टान्तमाह अनेकगवाक्षेति। गवाक्षो गृहच्छेदेन जालमार्गः अनेकतदन्तरैः अनेकतच्छिद्रैः प्रेक्षकपुरुषवदित्यर्थः, तस्याप्युभयदर्शित्वात्।

सुखादिगुणैरपि तदनुमानमाह सुखदुःखेत्यादि। सुखादिकं द्रव्यसमवेतं गुणत्वादित्यनुमानेन सुखादिगुणैर्गुणी अनुमीयत इत्यर्थः। ननु शरीरसमवेतत्वेन इन्द्रियसमवेतत्वेन वा अर्थान्तरं स्यादित्यत आह ते च गुणा इति। कस्मादिति—शरीरगुणत्वाभावः कस्मादिति पृच्छति, अहङ्कारेणेति तदुत्तरम्, अहमिति बुद्धिविशेषेणेत्यर्थः। तदेकवाक्यताभावादित्यर्थः(१),—अत्र अभावपदं विरोधिपरम्(२), एकवाक्यतापदञ्च सामानाधिकरण्यानुभवपरं, तथाच अहङ्कारेण सामानाधिकरण्यानुभवविरोधादित्यर्थः। तथाहि योऽहं जन्मान्तरे कृतपुण्यकर्म्मा सोऽहमिदानीं सुखी, योऽहं कृतपापकर्म्मा सोऽहमिदानीं दुःखी, योऽहं पुण्यकर्म्म करोमि सोऽहं जन्मान्तरे सुखमिच्छामि, दुःखञ्च द्वेष्मि,

(१) भावादित्यर्थ इत्यत्र भावादिति इत्येवं पाठः स्यात्।

(२) विरोधिपरमित्यत्र विरोधपरमिति पाठः स्यात्।

योऽहं जन्मान्तरे सुखमिच्छामि सोऽहं धर्म्मार्थं यज (३) इत्येवमहन्त्वेन येषां सुखादीनां सामानाधिकरण्यमनुभूयते,तेषां सुखादीनां शरीरवृत्तित्वविरोधादित्यर्थः। न हि अहन्त्वसामानाधिकरण्येनानुभूयमानयोर्जन्मद्वयीयपुण्यसुखाद्योः शरीरवृत्तित्वं सम्भवति, जन्मद्वये शरीरभेदात् जन्मद्वयवर्त्त्यभिन्नपदार्थेनैवोपपत्तेः, स एव आत्मा सुखाद्याश्रयः।

ननु योऽहं गौर आसं सोऽहमिदानीं दुःखात् कृशः, योऽहं कृश आसं सोऽहमिदानीं स्थूल इत्यत्राहंपदार्थसमानाधिकरणगौरत्वकृशत्वादीनां बुद्धिः शरीराभेदमवगाहत इति नात्माभेदं गौरत्वादेरात्मन्यभावादिति चेन्न, तत्र शरीरे अहंपदार्थाभेदबुद्धेर्भ्रमत्वात् पूर्वोपदर्शितप्रतीत्या बाधितत्वेन प्रमात्वबाधात् अवस्थाभेदेन शरीरभेदात् शरीराभेदबुद्धेरपि तत्र भ्रमत्वात्। न चैवं चैत्रगृहे जातस्य शिशोरवस्थाभेदेन शरीरभेदे चैत्रपुत्रत्वव्याघात इति वाच्यं चैत्रपुत्रशरीरारम्भकारब्धशरीरान्तरस्यापि चैत्रपुत्रत्वस्वीकारात्। एवमिन्द्रियगुणत्वाभावोऽपि बोध्यः इन्द्रियाणामपि जन्मद्वये भेदात्।

सुखादीनां शरीरेन्द्रियगुणत्वाभावे हेत्वन्तरमप्याह प्रदेशेति। एकदेशमात्रवृत्तिगुणत्वादित्यर्थः। इदञ्च शरीरेन्द्रियसंयोगविभागयोर्व्यभिचारि, अतो न शरीरेन्द्रियगुणा इत्यस्य न स्पर्शवद्विशेषगुणा इत्यर्थः। तेनोक्तसंयोगि श्रोत्रेन्द्रियनिष्ठशब्दे च न व्यभिचारः।

हेत्वन्तरमाह अयावद्द्रव्येति। सुखादयो न शरीरस्य इन्द्रियस्य वा गुणाः अयावद्द्रव्यभावित्वात्, स्वाश्रयद्रव्ये सत्यपि तत्र स्वसमानजातीययावतामभावादित्यर्थः। सुखादीनामाश्रयो हि कदाचित् सुखादिजातीययावतामभाववान्, शरीरमिन्द्रियं वा न कदाचित् स्वगुणरूपादिजातीयानां यावतामभाववदित्यर्थः। अत्र चोत्पत्तिक्षणं विनेति बोध्यं, तत्क्षणे शरीरेन्द्रिययोरप्यगुणत्वात्। हेत्वन्तरमाह वाह्येन्द्रि-

(३) कर्म्मार्थं यजत इति प्रथमादर्शपाठः।

येति। बाह्येन्द्रियप्रत्यक्षवृत्तिगुणत्वव्याप्यजातिराहित्यादित्यर्थः ; तेने-न्द्रियगुणस्य बाह्येन्द्रियाप्रत्यक्षत्वेऽपि न तत्र व्यभिचारः यथोक्त-राहित्याभावात्। सुखादिकन्तु तद्रहितमेवात्मसाधकम्।

प्रत्यक्षमाह अहंशब्देनेति। अत्र विषयीकृतत्वादिति पूरणीयम्। अहंशब्दपदञ्च अहमित्येवप्रत्यक्षपरम् (४) तथाचाहमितिप्रत्यक्षविषय-त्वादित्यर्थः। ईदृशप्रत्यय[क्ष]स्य न शरीरं विषयः, अहं शरीरीति भेदेन प्रतीतेरिति भावः। ननु अहमिति प्रत्ययः पृथिव्यादिकमेव विषयी-करोत्वित्यत्राह पृथिव्यादिशब्देति, अहं पृथिवीतिशब्दप्रयोगाभावा-दित्यर्थः।

आत्मनो गुणानाह तस्य गुणा इति। एषु गुणेषु सूत्रकारसम्मति-माह आत्मलिङ्गेति। आत्मनो लिङ्गानि साधकानि तेषामधिकारे कथने बुद्ध्यादयः सिद्धा इत्यर्थः। बुद्ध्यादीनां तद्गुणत्वाभावे तल्लिङ्ग-वचनानुपपत्तेरिति भावः।

धर्माधर्मसिद्धौ तत्सम्मतिमाह धर्माधर्माविति। विहितनिषिद्ध-कर्मभ्यां धर्माधर्मौ जन्येते, कालान्तरभाविनोः सुखदुःखयोः विहित-निषिद्धकर्मभ्यां साक्षाज्जनयितुमसामर्थ्येन तद्व्यापारौ स्थिरौ धर्मा-धर्मौ कल्प्येते। तत्र व्यधिकरणावपि धर्माधर्मौ भिन्नात्मनि सुख-दुःखे जनयेतामित्यत्र सूत्रकारेणोक्तम्—आत्मान्तरगुणानामात्मान्तर-* गुणेष्वकारणत्वादिति,—व्यधिकरणधर्माधर्मात्मकगुणानां व्यधिकरण-सुखदुःखात्मकगुणाजनकत्वादिति तदर्थः। ततो धर्माधर्मौ सिद्धा-वित्यर्थः। धर्माधर्माभावे ईदृशाकाङ्क्षासमाधानयोरसम्भवादिति भावः।

संस्कारसिद्धौ सूत्रकारसम्मतिमाह संस्कारः स्मृत्युत्पत्ताविति।

---

(४) अहमित्येवप्रत्यक्षेति पाठः स्यात्।

* आत्मान्तरगुणानामात्मान्तरेऽकारणत्वादिति उपस्कारादिसम्मतः पाठः, तत्र तथैव व्याख्यानात्।

'आत्ममनसोः संयोगात् संस्काराच्च स्मृति'रिति सूत्रं, स्मृत्युत्पत्तौ संस्कारस्य हेतुत्वकथनात् संस्कारस्तद्वचनात् सिद्ध इत्यर्थः। संख्यायां सूत्रकारसम्मतिमाह व्यवस्थावचनात् संख्येति। 'नानात्मानो व्यवस्थात' इति सूत्रम्, अहमयमित्यादिव्यवस्थावशादात्मानो नानेति तदर्थः *। नानात्वञ्च बहुत्वसंख्येत्यतस्तद्वचनात् संख्या सिद्धेत्यर्थः। तद्वचनादेव पृथक्त्वसिद्धिरित्याह अत एवेति। अत एव बहुत्वसंख्यायाः पृथक्त्वाभावे असम्भवादित्यर्थः।

आत्मनि परममहत्त्वपरिमाणे सूत्रकारसम्मतिमाह तथा चात्मेति। 'विभवान्महानाकाशस्तथा चात्मे'ति तत्सूत्रम्। तथाचेति आकाशतुल्य एवेत्यर्थः। तत्राकाशतुल्यत्वेनात्मकथनात् परममहत्त्वमित्यर्थः। ननु आत्मनो विभुत्वं कुत इति चेन्न अविभुत्वे शरीरावच्छिन्नं वाच्यं, अवच्छिन्नद्रव्यत्वे च मूर्त्तत्वं वाच्यं, तच्च मूर्त्तं यदि नित्यं तदा परमाणुत्वप्रसङ्गः नित्यमूर्त्तस्य परमाणुत्वनियमात्। तदस्त्वसौ परमाणुरिति चेन्न (१) प्रत्यक्षज्ञानादिगुणाश्रयत्वबाधात्। अथास्त्वसाववयवीति चेन्न अवयविनोऽनित्यत्वनियमेन उत्पत्तिविनाशप्रसङ्गात्। तथा च तस्मिन् नष्टे शुभाशुभकर्म्मफलभोक्ता कश्चिन्न स्यादित्यर्थः। तत्र संयोगविभागौ साधयति सन्निकर्षजत्वात् सुखादीनामिति। सन्निकर्षः संयोगः सुखादीनां तज्जन्यत्वादित्यर्थः। स च संयोगः शरीरात्मनोः, तदनपेक्षत्वे शरीरानवच्छिन्नात्मभागेऽपि सुखाद्युत्पत्तिप्रसङ्गादित्यर्थः। एवमात्ममनःसंयोगश्च, तदनपेक्षत्वे सर्व्वदा सुखाद्युत्पत्तिप्रसङ्गात्।

तद्विनाशकत्वादिति—तादृशसंयोगस्य तावन्न सार्व्वदिकत्वं (२)

---

* सर्व्वत्रैव वैशेषिकसूत्रादर्शेषु 'व्यवस्थातो नाना' इति तत्सूत्रं समुपलभ्यते। परन्तु जगदीशसूक्त्यादर्शपाठाद्यनुसारेणायं पाठो गृहीतः। तत्रापि व्यवस्थात इत्यत्र प्रथमादर्शे 'व्यवस्थेति' इति पाठोऽस्ति।

(१) चेन्न इत्यत्र चेदित्येतन्मात्रं प्रथमादर्शे। (२) अत्र सार्व्वत्रिकत्वमिति पाठः क्वचित्।

तथात्वे नित्यतापत्तेः सदैव सुखाद्युत्पत्तिप्रसङ्गाच्च। ततस्तस्य विनाशो वाच्यः, विभागेनैव नाश इत्यतस्तद्विनाशकत्वाद्विभागसिद्धिरित्यर्थः।

सूक्तिदीपिका

लक्षणस्य उद्देशक्रमानुसारितया यथोद्देशं दिक्पदार्थनिरूपणानन्तरम् आत्मनो लक्षणमाह मूले आत्मत्वेत्यादिना। आत्मानमाहेति सूक्तौ उद्देशक्रमानुसारेणेति शेषः। आत्मत्वाभिसम्बन्धादात्मा इतरेभ्यो भिद्यत इति साध्यबोधकपदसम्बन्धेन सम्पूर्णवाक्यमवसेयम्। आत्मत्वाभिसम्बन्धमन्तर्भाव्य आत्मा पक्षीकर्त्तव्य इति वार्थः।

ननु सुखादिसमवायिकारणतावच्छेदकतया सिद्धाया आत्मत्वजातेः सुखादिविरहिणि परमात्मनि अभावात् तत्रैव भागासिद्धो हेतुः, प्रकृतात्मपदेन परमात्मनोऽलाभेन तस्य दशमद्रव्यत्वापत्तिश्चेत्यत आह समवायेनेत्यादि। तथाहि ज्ञानाधिकरणताया ईश्वरेऽप्यनपायात् आत्मत्वस्य ईश्वरवृत्तित्वं नानुपपन्नमिति भावः। अन्नंभट्टादिभिः 'ज्ञानाधिकरणमात्मा' इत्यादिलक्षणैरेव ईश्वरसाधारणस्य आत्मलक्षणस्य तत एव कृतमुपन्याससुपलभामहे।

कालिकादिसम्बन्धेन कालादेर्ज्ञानाश्रयतायामविवादात् आत्मत्वस्य ईश्वरवत् तत्रापि सत्त्वप्रसङ्गेन व्यभिचारशङ्कया समवायेनेति सम्बन्धविशेषोपक्षेपः।

एतेन परमेशप्रतिपादकाः कर्म्मधारयसमासनिष्पन्नपरमात्मपदप्रयोगादयोऽपि सम्यगुपपद्यन्ते। अन्यथा परमश्चासावात्मा चेति विग्रहवाक्यादौ परमेश्वरमुद्दिश्य आत्मपदप्रयोगादिरसङ्गतः स्यादिति भावः।

अन्यात्मनीति—अयोगिन आत्मनीत्यर्थः। मनसेति—योगजधर्म्मानुगृहीतेन मनसेत्यर्थः। योगिव्यक्तेरपि यावन्न योगजधर्म्मसमवधानं तावत् तदीयमनसापि तत्प्रत्यक्षासम्भवादिति भावः। ननु अयोगिव्यक्तेरपि अहं जानामीत्यादिप्रत्यक्षेण धर्म्मितावच्छेदकतया आत्मत्वस्य अवगाहनात् कथमन्यात्मनि तत्प्रत्यक्षापलाप इति चेत् न मोक्षजनकतत्त्वज्ञानस्य सर्वदार्शनिकोपादेयतया

तस्यैव परमप्रयोजनकत्वेन प्रकृतेऽपि योगजधर्म्मानुगृहीतमनोजनितस्यात्मत्वावच्छिन्नविषयकप्रत्यक्षस्य उपग्रहात्। अथवा अन्यात्मनि इत्यस्य स्वभिन्नात्मनीत्यर्थः। योगिव्यक्तेरित्यस्य च उपलक्षणतया अयोगिव्यक्तेरपीत्यर्थः। तथाहि स्वभिन्नात्मनि आत्मत्वस्य अप्रत्यक्षत्वेऽपि स्वात्मनि योगिनो वा अयोगिनो वा आत्मत्वस्य प्रत्यक्षं भवत्येव इति भावः।

ननु आत्मनः परममहत्त्वात् अणुत्वलक्षणं सूक्ष्मत्वं तत्र बाधितमेव योगिप्रत्यक्षे परमाण्वादौ व्यभिचारश्च इत्यतः सौक्ष्म्यादित्यस्य बहिरिन्द्रियेत्याद्यर्थविवरणम्। तस्य च बहिरिन्द्रियजन्यलौकिकप्रत्यक्षायोग्यत्वमर्थः।

ननु स्वयमेव आत्मनो मानसप्रत्यक्षविषयत्वमङ्गीकृत्य तस्य पुनरप्रत्यक्षत्ववचनमुन्मत्तप्रलपितं स्यादित्यतः अप्रत्यक्षत्वे सतीत्यस्य बहिरिन्द्रियाप्रत्यक्षत्वे सतीत्यर्थकथनम्। एतेन बहिरिन्द्रियेण आत्मनोऽनुपलब्धेरात्मा असिद्ध इति लौकायतिकादिमतं निरस्तं, बहिरिन्द्रियप्रत्यक्षमात्रस्य वस्तुसाधकताया अपसिद्धान्तत्वात्।

कर्त्तृव्यापार्य्याणीति—कर्त्तृप्रयोज्यव्यापारवन्ति इत्यर्थः। तथाहि कर्त्तृत्वेन तत्र आत्मा सिद्ध इति भावः। न्यायकन्दल्यादौ 'यत्करणं तत् केनचित् कर्त्रा प्रयुज्यते कार्य्यं व्यापार्य्यते, यथा वास्यादिकं वर्द्धकिना'। इत्यादिदर्शनात् कर्त्तृव्यापार्य्याणीत्यस्य कर्त्तृप्रयोज्यानीति वार्थः।

षष्ठ्यर्थ इत्यादि—षष्ठीसप्तम्योरर्थं प्रति भेदो नास्तीति प्राचां प्रवादात् सप्तम्या विषयत्वार्थकत्वस्य भूयो दृष्टचरत्वाच्च तदुक्तिश्चिन्त्या।

सविषयकार्थबोधकधातुयोगे कर्त्तृत्वस्य आश्रयत्वलक्षणतया ज्ञातेत्यस्य ज्ञानाश्रय इत्यर्थः। प्रसाधक इति पदस्य कर्त्तरि वुण्प्रत्ययनिष्पन्नत्वेन ज्ञानकर्त्तृत्वरूपार्थलाभः।

तेनेत्यादि—शरीरस्य अवच्छेदकतासम्बन्धेन ज्ञानाश्रयस्य समवायेन ज्ञानाश्रयत्वविरहात् ततो ज्ञानाश्रयीभूतदेहातिरिक्तात्मनोऽसिद्धा नार्थान्तरमिति भावः।

न शरीरेन्द्रियेत्यादि—ननु चैतन्याभावलक्षणस्य अज्ञत्वस्य शरीरेन्द्रियमनःसु चैतन्याभावसाधकतयोपन्यासे सन्दिग्धासिद्धो हेतुः सिद्धसाधनं वा इत्यतः समाधत्ते एषामित्यादिना। तथाहि प्रकृतग्रन्थो न शरीरेन्द्रियमनःसु

चैतन्याभावसाधनपरः, किन्तु श्रोत्रादिभिः करणैर्ज्ञातृत्वेन तदनुमानप्रतिषेधपर इति भावः।

ननु तत्रापि तद्दोषतादवस्थ्यम् अज्ञत्वस्य तेषु संशयास्पदत्वात् सन्दिग्धस्य हेतोः साधकत्वासम्भवादित्यतः तदपि साधनान्तरेण अनुमितमित्याह एषां प्रत्येकस्येत्यादिना।

चैतन्यं ज्ञानमित्यादि—तथाचायं प्रयोगः—शरीरं चैतन्याभाववत् भूतत्वात् कार्य्यत्वाच्च घटादिवत्। द्वन्द्वात् परः श्रूयमाणः प्रत्येकमभिसम्बध्यते इति नयेन भूतकार्य्यत्वादित्यतो भूतत्वात् कार्य्यत्वाच्च इति हेतुद्वयलाभो नानुपपन्नः। भूतकार्य्यत्वमित्यखण्डैकहेतुत्वपक्षस्तु भूतेत्यंशस्य वैयर्थ्यशङ्कया प्रत्युक्तः; तदुक्तमाचार्य्यैः 'भूतकार्य्यत्वादिति भूतत्वात् कार्य्यत्वाच्चेत्यर्थः। अन्यथा असमर्थविशेषणो हेतुः स्या'दिति। कन्दलीकारादयस्तु भूतकार्य्यत्वादिति विशिष्टमेव हेतुमुपाददते।

अत्रेदमवधेयम्—कार्य्यस्य देहादेः चैतन्याश्रयत्वे कार्य्यभावमात्रस्य प्रध्वंसप्रतियोगितया स्वाश्रयनाशोत्तरं ज्ञानोपार्जितसंस्कारादेरन्यजन्मनि सुतरामसम्भवेन जातमात्रस्य स्तन्यपानादिप्रवृत्तिर्नोपपद्यते, अनायत्या च अदृष्टादेरपि तत्रैवोपेयतया कृतहानाकृताभ्यागमादिदोषोऽपि दुष्परिहरतामापद्यत इति।

मनसः स्वतन्त्रतया चैतन्याभावसाधनस्य अनुपदमेव क्रियमाणत्वात् इन्द्रियपदेन वहिरिन्द्रियमात्रं परिगृहीतम्।

आश्रयस्योपहतत्वादिति—तथाहि स्मृतिं प्रति अनुभवस्य कारणतायाः कॢप्तत्वेन कार्य्यकारणयोरेकाधिकरणनियमात् अनुभवितृत्वेन अभिमते इन्द्रिये स्मरणेन भाव्यं, तच्चोपहतपूर्वमिति तत्र स्मृतिरेवानुपपन्ना स्यादिति, अतः स्थिरः कश्चिदाश्रयः कल्पनीयः, यस्मिन्नाश्रये अनुभवितरि इन्द्रियोपघाते सत्यपि स्मृतिः सुसङ्गच्छेत, स एवायमात्मेति भावः। उक्तमाचार्य्यैः 'स्मृतिसंस्कारानुभवाः समानाश्रया इति नियमः। तथा च इन्द्रियेषु चैतन्याश्रयेषु स्वीक्रियमाणेषु तेषामुपघाते अन्धादिभिः पूर्वमनुभूतानां रूपादीनामस्मरणप्रसङ्गा'दिति। किञ्च इन्द्रियाणां चैतन्यस्वीकारे सर्व्वेषामेव तेषां तुल्यतया चैतन्यवत्त्वस्याभ्युपगन्तव्यतया पृथगिन्द्रियेषु विरुद्धेच्छासम्भवात् प्रवृत्त्याद्यनुपपत्तिदोषादयोऽपि ऊदाहार्य्याः।

अभूत इत्यादि—मनसः प्रकृते अभूतत्वादिविशेषणेन प्रागुक्तहेतुभिः तत्र चैतन्याभावसाधनमशक्यं स्वरूपासिद्धेरिति प्रतिपादितं भवति।

मनसः करणतामात्रमित्यादि—ननु मनसो ज्ञानानाश्रयत्वे 'कामः सङ्कल्पो विचिकित्सा' इत्यादिश्रुत्या इच्छाज्ञानादिरूपाणां कामसङ्कल्पविचिकित्सादीनां मनोगुणत्वप्रतिपादनविरोध इति चेन्न आयुर्घृतमित्यादाविव मनसः कामादिजनकताया एव तादृशश्रुत्यर्थत्वादिति, न तु तत्तदाधारत्वादेः। कामादेः मनोगुणत्वमभ्युपगच्छतामपि कामादौ मनोऽभेदरूपयथाश्रुतश्रुत्यर्थस्य स्वीकर्त्तुमशक्यतया लक्षणाया आश्रयणीयत्वादिति।

सकलात्मसाधकेत्यादि—सकलात्मसाधकः यः प्रत्यक्षः हेतुः तेन। परकीयात्मवृत्तिप्रवृत्तिनिवृत्त्योर्यत्नविशेषयोरपि परेणाग्रहात् ताभ्यां परकीयात्मसाधनस्य अशक्यत्वात् तद्वाधतादवस्थ्यमिति लक्षणया प्रवृत्तिनिवृत्तिजन्यक्रिया प्रकृतलिङ्गम्। प्रत्येकमिति—प्रवृत्तिजन्यक्रिया निवृत्तिजन्यक्रिया च पृथक्तया हेतू, न प्रवृत्तिनिवृत्त्युभयजन्या एका क्रिया, तस्या असम्भवात् विशिष्टहेतोर्वैयर्थ्याच्च।

शरीरं प्रयत्नेत्यादि—अत्र साध्यघटकप्रयत्नवत्तया आत्मसिद्धिः। क्रियावत्त्वमात्रस्य प्राप्तिपरीहारयोग्यक्रियावत्त्वमात्रस्य वा वाय्वादौ व्यभिचारात् तादृशयोग्यान्तं क्रियांशे विशेषणम्।

आदिपदेत्यादि—आदिपदग्राह्येण चेष्टारूपेण हेतुनेत्यर्थः। अनुमान इति—वक्ष्यमाणप्रयत्नवदधिष्ठितत्वानुमान इत्यर्थः।

अन्यथेति—मनःकर्म्मणः प्रयत्नवत्प्रयोज्यत्वानङ्गीकारे। तथाहि सुषुप्तौ मनःकर्म्मप्रयोजकात्मप्रयत्नविरहादेव न मनःकर्म्म तदभावाच्च विषयेन्द्रियसंसर्गविरह इति भावः।

तदुभयज्ञानञ्चेत्यादि—तथाहि कस्यचिदभिमतस्य फलस्य रूपसन्दर्शनेन तत्सजातीयफलान्तरसहचरितस्य पूर्वानुभूतरसस्य स्मरणात् तत्राभिलाषो भवति, ततोऽपि प्रयत्नः आत्ममनःसंयोगसापेक्षो रसनेन्द्रियविक्रियां जनयति, सा च दन्तोदकसंप्लवानुमिता रसनेन्द्रियविक्रिया इन्द्रियस्य चैतन्ये नोपपद्यते, प्रत्येकं नियताभ्यां चक्षूरसनाभ्यां रूपरसयोः सहचारप्रत्यये रूपदर्शनेन रस-

स्मृत्यभावात्; अस्ति चायं विकारः, तस्मादिन्द्रियातिरिक्तो विद्यत एव कश्चि- दुभयदर्शी यो रूपं दृष्ट्वा रसं प्रतिसन्धत्त इति प्राहुः।

अत्र इन्द्रियचैतन्यप्रतिषेधे प्रयोगस्त्वित्थं यथा—'नयनादीन्द्रियम् अचेतनं नियतविषयत्वात् गवाक्षवत्। यद्वा चेतनो नियतविषयेभ्यो भिद्यते प्रतिसन्धा- तृत्वात् प्राक्प्रत्यग्गवाक्षदर्शिवदिति। अन्यथा अन्येन दृष्टस्य अन्येन अस्मरणात् प्रतिसन्धानानुपपत्तौ इच्छानुपपत्तेर्विकारानुपपत्तिः कारणाभावादिति भावः' इत्याचार्य्याणां सन्दर्भः।

सुखादिकमित्यत्र आदिपदेन दुःखादीनामात्ममात्रगुणानामुपग्रहः। द्रव्य- वृत्तित्वमात्रस्य साध्यतायां कालिकेन कालवृत्तित्वमादाय अर्थान्तरमतः सम- वेतत्वं साध्यविधया उपन्यस्तम्। गुणत्वस्य समवायेन हेतुत्वम् अन्यथा व्यभिचारात्।

जन्मद्वयवर्त्त्यभिन्नेत्यादि—तथाहि योऽहमित्यादिवाक्यैः जन्मान्तरवृत्ति- पुण्यादिकर्म्मानुकूलकृतिमतः वर्त्तमानकालावच्छिन्नसुखाद्याश्रयस्य च योऽहं सोऽहमित्यादिनाऽभेदप्रतीतेः जन्मान्तरवर्त्तिनः एतत्कालवर्त्तिनश्चैकस्य तथा- भूतगुणाश्रयस्य असिद्धौ नोपपत्तिरिति शरीरेन्द्रियादीनां प्रतिजन्मभिन्नाना- मनित्यानां सुखाद्याश्रयत्वं न सङ्गच्छत इति भावः। अत एव 'इन्द्रियाणामपि जन्मद्वये भेदादिति' स्वयमेव वक्ष्यते।

इदञ्चेत्यादि—एकदेशमात्रवृत्तिगुणत्वरूपं हेत्वन्तरमित्यर्थः। एकदेश- मात्रवृत्तित्वञ्च अव्याप्यवृत्तित्वम्, संयोगविभागयोरव्याप्यवृत्तिगुणयोः शरीरे- न्द्रियवृत्तित्वात् तत्र तद्गुणत्वाभावरूपसाध्यवैकल्यादेव व्यभिचारः। निष्कर्षे तु संयोगविभागयोः स्पर्शवच्छरीरेन्द्रियगुणत्वेऽपि तयोर्विशेषगुणत्वाभावा- द्दोषः। ये हि शरीरेन्द्रियविशेषगुणा रूपादयः, ते व्याप्यवृत्तय एव दृष्टाः। अव्याप्यवृत्तित्वञ्चेदं दैशिकं बोध्यं, तेन शरीरेन्द्रियादीनामुत्पत्तिकालाव- च्छेदेन रूपाद्यभावमादाय तद्विशेषगुणानामव्याप्यवृत्तित्वसत्त्वेऽपि न व्यभि- चारतादवस्थ्यम्। अत एव प्रदेशवृत्तित्वादित्यस्य एकदेशमात्रवृत्तिगुणत्वा- दित्यर्थः कृतो जगदीशेन। अव्याप्यवृत्तौ शब्दे श्रोत्ररूपेन्द्रियविशेषगुणत्व- सत्त्वाद् व्यभिचारभिया शरीरेन्द्रियविशेषगुणत्वाभावस्य साध्यतामनादृत्य स्पर्शवद्विशेषगुणत्वाभावस्य साध्यत्वमादृतमिति मन्तव्यम्। कन्दलीकारास्तु

यथाश्रुतमेवार्थमुपादाय 'कर्णशष्कुल्यवच्छिन्नस्य नभोदेशस्य श्रोत्रेन्द्रियभावमापन्नस्य यः शब्दो गुणो भवति स तद्विवरव्यापीत्यव्यभिचार' इति समादधते। आचार्य्यास्तु 'ताभ्यां हेतुभ्याम् इन्द्रियगुणत्वममीषां न निषिद्धं शब्देन व्यभिचारात्' इत्याद्युपक्रम्य हेत्वन्तरोपन्यासबीजत्वमस्य समुन्नावितवन्तः।

कदाचिदिति—सुषुप्तौ मोक्षदशायां च आत्मनः सुखादिजातीययावदभाववत्त्वम् 'अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः' इत्यादिश्रुत्यादिभ्यः। तदानीमदृष्टादिसमुच्छेदात् तत एव सुखाद्यसम्भवाच्च।

यथोक्तराहित्याभावादिति—वाह्येन्द्रियप्रत्यक्षवृत्तिगुणत्वव्याप्यजातिराहित्यरूपहेत्वभावादित्यर्थः। वाह्येन्द्रियचक्षुरादिप्रत्यक्षघटरूपादिवृत्तिगुणत्वव्याप्यरूपत्वादिजातेश्चक्षुरादीन्द्रियगुणे सत्त्वादिति भावः।

सुखादिकन्त्विति—सुखादीनां सर्वेषामपि वहिरिन्द्रियजन्यप्रत्यक्षाविषयतया तद्वृत्तिगुणत्वव्याप्यजातीनां सुखत्वादीनां तथात्वाभावात् तथाभूतजातीनां रूपत्वादीनाञ्च तत्र राहित्येन न स्वरूपासिद्धो हेतुः।

विहितेत्यादि—'स्वर्गकामोऽश्वमेधेन यजेत' इत्यादिविधिना प्रतिपादितस्य अश्वमेधे स्वर्गजनकत्वस्य स्वर्गनियतपूर्ववर्त्तित्वलक्षणस्य अन्तरा धर्म्मास्वीकारे अनुपपत्त्या अश्वमेधयागादिजन्यं किमप्यपूर्वं कल्पनीयं, येन स्वर्गाव्यवहितप्राक्कालपर्य्यन्तस्थायिना द्वारीकृतेन यागादिर्जनकः स्यात् इति भावः। अत एव कुसुमाञ्जलौ श्रीभगवदुदयनाचार्य्याः 'चिरध्वस्तं फलायालं न कर्म्मातिशयं विना' इति प्राहुः

व्यधिकरणेत्यादि—कार्य्यकारणयोरैकाधिकरण्यस्य शास्त्रादिसिद्धान्तितत्वादिति शेषः।

नानात्मान इत्यादि—अत्र 'व्यवस्था प्रतिनियमः, यथा कश्चिदाढ्यः, कश्चित् रङ्कः कश्चित् सुखी कश्चिद्दुःखी कश्चिदुच्चाभिजनः, कश्चिन्नीचाभिजनः, कश्चिद्विद्वान् कश्चित् जाल्म इतीयं व्यवस्था आत्मभेदमन्तरेणानुपपद्यमाना साधयत्यात्मनां भेदम्' इत्युपस्कारकाराणामाशयोऽनुसन्धेयः। एतेन वेदान्ताद्युपक्षिप्तमात्मैक्यमतं प्रत्युक्तम्भवति। आत्मनां भेदबोधकानि युक्त्यन्तराणि श्रुत्यन्तराणि च आकरेभ्यो ज्ञातव्यानि।

प्रत्यक्षेत्यादि—प्रत्यक्षे आश्रयमहत्त्वस्य कारणतया आत्मनः परमाणुपरि-

माणवत्त्वे महत्त्वाभावात् तदाश्रितज्ञानादिगुणानां प्रत्यक्षासम्भवादिति भावः।

अथात्मसावित्यादि—अनया परीक्षया जैनानामात्मगतो देहसमपरिमाणवादः प्रतिक्षिप्तः ।

तदेवम् आत्मनः सगुणत्वसिद्ध्या कपिलादिनि[illegible]मात्मनिर्गुणत्वमतं प्रत्युक्तं, निर्गुणत्वप्रतिपादकश्रुतयस्तु जीवस्य मोक्षदशानुवादका इति।

ভাষ্যতাৎপর্য্য।

সম্প্রতি আত্মার নিরূপণ করা হইতেছে, আত্মা দ্বিবিধ জীবাত্মা ও পরমাত্মা। আত্মত্বজাতি জ্ঞানবত্তার অবচ্ছেদকরূপে সিদ্ধ হয়। কাজেই জীবাত্মা ও পরমাত্মা উভয় পদার্থেই জ্ঞানবত্ত থাকায় আত্মত্বজাতিও উভয় পদার্থেই স্বীকার করিতে হইবে। যাহারা সুখাদি পদার্থের সমবায়িকারণতাবচ্ছেদকরূপে আত্মত্বজাতির সিদ্ধি করেন, তন্মতে ঈশ্বরে আত্মত্বজাতির সত্তাবিষয়ে বিসংবাদ পরিলক্ষিত হয়। বিস্তৃতি ভয়ে তাহার আলোচনা পরিত্যক্ত হইল।

উক্ত আত্মত্বজাতি অন্য আত্মায় প্রত্যক্ষ না হইলেও যোগিব্যক্তির আত্মায় উহার মানস প্রত্যক্ষ হইয়া থাকে। এবং সুখাদিবিশিষ্টরূপে আত্মার প্রত্যক্ষকালে তদ্‌বৃত্তি আত্মত্ব নিজ আত্মায়ই অযোগিব্যক্তিরও প্রত্যক্ষ হয়। যেমন পৃথিবীত্ব ও দ্রব্যত্বপ্রভৃতি জাতির ঘটাদিতেই চাক্ষুষ হয়, পরমাণুতে চাক্ষুষ হয় না সেইরূপ।

উক্ত আত্মা বহিরিন্দ্রিয়দ্বারা গৃহীত হইবার যোগ্য নহে, কিন্তু শব্দাদিজ্ঞানদ্বারা অনুমিত শ্রোত্রপ্রভৃতি ইন্দ্রিয় হইতেই উহার অনুমান করা যায়। অর্থাৎ দেখা যায় যে শ্রোত্রপ্রভৃতি ইন্দ্রিয় অচেতন করণরূপে শব্দাদিজ্ঞান উৎপাদন করে, অথচ করণ কর্ত্তার ব্যাপার ব্যতিরেকে কখনও কার্য্য করিতে পারে না, অতএব এমন এক একটী চেতন কর্ত্তা প্রত্যেক শ্রোত্রাদি ইন্দ্রিয়ের অধিষ্ঠাতা বর্ত্তমান রহিয়াছে, যাহার প্রেরণায় শ্রোত্রাদি করণসমূহ নিজ নিজ কার্য্যসাধন করিতে পারে। যেমন দাত্রপ্রভৃতি ছেদনসাধক অস্ত্রবিশেষ কর্ষকপ্রভৃতি কর্ত্তার প্রেরণায়ই

ধান্যাদিচ্ছেদনে সমর্থ হয়, কর্তার প্রেরণ ব্যতিরেকে কখনই ধান্যাদিচ্ছেদনে সমর্থ হয় না।

শব্দাদিজ্ঞানদ্বারাও ঐরূপ আত্মার অনুমান হইয়া থাকে। কারণ ভাবকার্য্য বস্তুমাত্রই কোনও বস্তুতে সমবায়সম্বন্ধে আশ্রিত থাকিবে, জ্ঞানও যখন কার্য্যভাববস্তু তখন উহা কোনও বস্তুতে নিশ্চয়ই সমবায়সম্বন্ধে থাকে। এইরূপে জ্ঞানের আশ্রয় আত্মা সিদ্ধ হয়। জ্ঞানদ্বারা যে আশ্রয়ীভূত দ্রব্যের সিদ্ধি হয়, উহা শরীর ইন্দ্রিয় বা মন নহে, কারণ শরীরাদি অচেতন পদার্থ, কাজেই জ্ঞানের আশ্রয়রূপে শরীরাদির সিদ্ধিদ্বারা গতার্থতাহেতু আত্মার অসিদ্ধি বলা যাইবে না। শরীর ভূতাত্মক ও কার্য্যবস্তু বলিয়া তাহাতে চৈতন্যস্বীকার অসম্ভব, ইহা ঘটাদিপদার্থের দৃষ্টান্তে বলা যায়। কারণ ভূতাত্মক ও কার্য্যবস্তু শরীরকে চৈতন্যের আশ্রয় বলিলে মৃতশরীরেও আকারগত কোনরূপ বৈলক্ষণ্যাদি না থাকায় উক্ত অবস্থায়ও চৈতন্য থাকিতে পারে? ইহা দ্বারা চার্ব্বাকের দেহাত্মবাদ নিরস্ত হয়।

বহিরিন্দ্রিয়সমূহকেও চৈতন্যের আশ্রয় স্বীকার করা যায় না, কারণ ইন্দ্রিয়-সমূহ জ্ঞানের করণ মাত্র, জলানয়নপ্রভৃতি কার্য্যে করণস্বরূপ ঘটাদিই উহার দৃষ্টান্ত। 'যাহা করণ হইবে তাহা চৈতন্যের আশ্রয় হইবে না,' এইরূপ নিয়মে আশঙ্কা হইলে অপর হেতুরও উপন্যাস করা যাইতে পারে, যথা ইন্দ্রিয় নষ্ট হইলেও পূর্ব্বানুভূত ইন্দ্রিয়ার্থের স্মরণ হইয়া থাকে। স্মরণের প্রতি অনুভব কারণরূপে ক্লৃপ্ত আছে, ইন্দ্রিয়কে চৈতন্যের আশ্রয় বলিলে উক্ত অনুভবের আশ্রয় ইন্দ্রিয়কেই বলিতে হইবে। অতএব পরে যে অনুভবাধীন স্মৃতি হইবে, তাহাও উক্ত ইন্দ্রিয়ে থাকিতে হয়, অথচ উক্ত ইন্দ্রিয়রূপ আশ্রয়ের অভাবহেতু ঐ স্মৃতিই অসম্ভব হইয়া ওঠে। এক ইন্দ্রিয়ে অনুভব ও অপর ইন্দ্রিয়ে স্মৃতি ইহা কার্য্যকারণের সামানাধি-করণ্যনিয়মানুরোধেই স্বীকার করা চলে না।

এইরূপ ইন্দ্রিয়ার্থের অসন্নিকর্ষাবস্থাতেও বিষয়ের স্মৃতি হইয়া থাকে। যদি ইন্দ্রিয়কে জ্ঞানের আশ্রয় বলিতে হয়, তবে যে ইন্দ্রিয় হইতে যে জ্ঞান উৎপন্ন হইবে, সেই ইন্দ্রিয়কেই সেই জ্ঞানের আশ্রয় বলিতে হইবে। তাহা না হইলে অতিপ্রসঙ্গ দোষ হয়। অতএব বিষয়ের অসন্নিকর্ষদশায় উৎপন্ন স্মৃতির আশ্রয় কে হইতে পারে? সে স্থলে ত ইন্দ্রিয় উক্ত জ্ঞানের জনক নহে। এই কারণে উক্ত দুই অবস্থায় উৎপন্ন স্মৃতির আশ্রয়রূপে আত্মা সিদ্ধ হইয়া থাকে।

এখন আপত্তি হইতে পারে এই যে ভূতত্ব কার্য্যত্বপ্রভৃতি হেতু থাকায় বহিরিন্দ্রিয়কে জ্ঞানের আশ্রয় স্বীকার করিতে না পারিলেও ভূতত্ব কার্য্যত্বপ্রভৃতি ধর্ম্মশূন্য মনকে জ্ঞানের আশ্রয় বলিতে বাধা কি ? তাহার উত্তরে গ্রন্থকার বলেন যে মনও চৈতন্যের আশ্রয় হইতে পারে না, কারণ তাহা হইলে মন জ্ঞানের কর্ত্তা হয়, করণ হয় না এবং তাহা হইলে একদা বহুবস্তুর জ্ঞানোৎপত্তির প্রসঙ্গ হয়। কারণ করণ যেরূপ একটীমাত্র ব্যাপারের একদা উৎপাদন করে, সেইরূপ কর্ত্তাও একদা একটীমাত্র ব্যাপার উৎপাদন করিবে, এমন নিয়ম নাই। অতএব এমন একটী বস্তু স্বীকার করিতে হয়, যাহার সম্বন্ধ একদা কেবল একটী বস্তুর সহিতই হইবে এবং তন্নিবন্ধন একটীমাত্র বস্তুরই একদা আলোচনা ও স্মৃতি হইবে। উহাই করণরূপী মন। এখন আর তবে উহাকে জ্ঞানের আশ্রয় বলা চলে না, কারণ করণ হইলেই তাহা কর্ত্তার প্রেরণা অপেক্ষা করিবে, অতএব প্রেরক কর্ত্তা তদপেক্ষা ব্যতিরিক্ত।

করণরূপে মনের অনুমান করিয়া তাহাতেই জ্ঞানের অনুমান করা যাইবে ইহাও বলা যায় না, কারণ প্রথমতঃ জ্ঞানের আশ্রয় সিদ্ধ না হইলে জ্ঞানের সিদ্ধি হইতে পারে না এবং জ্ঞানের সিদ্ধি না হইলে জ্ঞানকরণত্বদ্বারা মনের অনুমানই হইতে পারে না। অতএব যে জ্ঞানদ্বারা করণরূপে মনের অনুমান করিতে হইবে উক্ত জ্ঞানের আশ্রয় মন হইতে ভিন্ন এবিষয়ে সন্দেহ নাই।

মন যে জ্ঞানের আশ্রয় নহে এ বিষয়ে আত্মকার্য্যত্বও হেতু হইতে পারে, অর্থাৎ চৈতন্য আত্মার কার্য্য, অতএব উহা আত্মাতে থাকে। সমবায়সম্বন্ধে কার্য্যের প্রতি যে বস্তু অভেদসম্বন্ধে কারণ, উক্ত কার্য্যের আশ্রয় উক্ত কারণকে অবশ্যই স্বীকার করিতে হইবে। যদি জ্ঞানকে উক্তরূপে মনের কার্য্য ও মনের ধর্ম্ম বলা যায়, তবে জ্ঞানাদির প্রত্যক্ষ অসম্ভব হইয়া পড়ে, কারণ প্রত্যক্ষের প্রতি মহত্ত্বকে কারণ বলা হইয়াছে, মন অণুপরিমাণ, অতএব অণুপরিমাণ মনে জ্ঞান থাকিলে জ্ঞানের প্রত্যক্ষ হইতে পারে না ইত্যাদি দোষ দ্রষ্টব্য। যদি মনকে অণুপরিমাণ না বলিয়া পরমমহৎ-পরিমাণ বস্তু স্বীকার করা যায়, তবে একদা অনেক জ্ঞানের উৎপত্তি হইতে পারে, এইজন্য তদ্ভিন্ন আর একটী অণুপরিমাণ মন জ্ঞানের করণরূপে অবশ্যই মানিতে হয়, তাহা হইলে পরমমহৎপরিমাণ জ্ঞানের আশ্রয় অতিরিক্ত বস্তু মানিতেই হইল, কেবল সংজ্ঞা হইল তাহার মন, তাহাতে আর আপত্তির বিষয় কি ?

শব্দাদির জ্ঞান দ্বারা যেরূপ আশ্রয়রূপে নিজ আত্মার অনুমান হয়, ঐরূপ পরশরীরে হিতপ্রাপ্তি ও অহিতপরিহারের কারণ প্রবৃত্তি ও নিবৃত্তিজন্য ক্রিয়া দর্শনে চেতনাধিষ্ঠান অনুমিত হইতে পারে। ঐ স্থলে রথক্রিয়াদ্বারা যেমন সারথির অনুমান হয় এই দৃষ্টান্ত উপন্যাস করা যায়। অর্থাৎ অচেতন কোনও বস্তু হিত-প্রাপ্তি ও অহিতপরিহারের কারণীভূত প্রবৃত্তি ও নিবৃত্তিজন্য ক্রিয়াযুক্ত হইতে গেলে চেতনের অধিষ্ঠানব্যতীত হয় না, এই হেতু অচেতন শরীরও চেতনের অধিষ্ঠান ব্যতীত ঐরূপ ক্রিয়ার আশ্রয় কিরূপে হইতে পারে, অতএব শরীরের অধিষ্ঠাতা এক আত্মা আছে, যাহার সংযোগবশতঃ অচেতন শরীরও তাদৃশ ক্রিয়ার আশ্রয় হইয়া থাকে।

প্রাণাদি বায়ুর উর্দ্ধগতি ও অধোগতি প্রভৃতি দ্বারাও আত্মার অনুমান হইয়া থাকে। কারণ বায়ুর স্বাভাবিক গতি বক্র, উহা বেগপ্রতিরোধক কোনও বস্তু না থাকিলে চেতনের অধিষ্ঠান ব্যতীত কখনই বক্রগতি পরিত্যাগ করিয়া উর্দ্ধগতি বা অধোগতি লাভ করিতে পারে না। ঐ স্থলে কর্ম্মকারের ভস্ত্রা বা হাপোষের ক্রিয়াজনক কর্ম্মকার দৃষ্টান্ত।

ঐরূপ চক্ষুর স্বাভাবিক নিমেষ ও উন্মেষ কর্ম্মদ্বারাও অচেতন শরীরের অধিষ্ঠাতা আত্মার অনুমান হয়। এস্থলে দারুময়যন্ত্রের নিমেষ ও উন্মেষ ক্রিয়াদ্বারা অনুমিত দারুযন্ত্রের পরিচালক শিল্পীই দৃষ্টান্ত।

আরও গৃহের পরিপুষ্টি ক্ষত ও ভগ্নাবস্থার পুনর্ব্বার পূর্ব্বাবস্থাসম্পাদনপ্রভৃতি-দ্বারা যেমন অচেতন গৃহের অধিষ্ঠাতা একজন গৃহস্থ অনুমিত হয়, সেইরূপ দেহের পরিপুষ্টি ক্ষত ও ভগ্নাবস্থার পুনর্ব্বার পূর্ব্বাবস্থাসম্পাদন ও চেষ্টাপ্রভৃতিদ্বারা অচেতন দেহের অধিষ্ঠাতা আত্মা অনুমিত হইয়া থাকে।

অন্য হেতু যথা—যেমন গৃহকোণে অবস্থিত একটী জতুগোলকে অপর জতুগোলকের চালনা করিয়া বালক যখন ক্রীড়া করিতে থাকে, তখন ঐ জতু-গোলকের সংযোগসাধকক্রিয়া দ্বারা তৎপরিচালক বালক অনুমিত হয়, সেইরূপ বহু বিষয় সন্নিহিত থাকিলেও অভিমত বিষয়ে চক্ষুঃসংযোগের কারণ মানসিক ক্রিয়াদ্বারাও তদধিষ্ঠাতা আত্মার অনুমান হয়।

অন্য হেতু যথা—চক্ষুর বিষয়ীভূত অম্লদ্রব্য তিন্তিড়ী (তেঁতুল) প্রভৃতি দর্শনের পর রসের স্মৃতিক্রমে রসনেন্দ্রিয়ের বিকার হইতেও আত্মার অনুমান করা যাইতে

পারে। কারণ উক্তস্থলে প্রথমতঃ অম্লদ্রব্যের দর্শন ও তদনন্তর রসের স্মরণ ব্যতীত রসনেন্দ্রিয়ের বিকার অসম্ভব, অতএব অম্লদ্রব্যের জ্ঞান ও রসস্মৃতি এই উভয়ের আশ্রয় ব্যতিরেকে অনুপপত্তিহেতু তদুভয়ের আশ্রয় শরীরাধিষ্ঠাতা আত্মা সিদ্ধ হয়।

এইরূপ সুখাদি গুণদ্বারাও আত্মার অনুমান হয়। অর্থাৎ সুখ যখন গুণ-পদার্থ তখন উহা কোনও দ্রব্যে সমবেত থাকিবে, উক্ত দ্রব্যই আত্মা। শরীরাদিকে সুখাদির আশ্রয় বলা যায় না, কারণ তাহা হইলে 'অহং সুখী' ইত্যাদিরূপে অহঙ্কারের সহিত সুখাদির সামানাধিকরণ্য প্রতীতির বিরোধ ঘটে। এবং শরীরের বিনাশিত্বহেতু জন্মান্তরে সুখকামনায় বৈধকার্য্যপ্রবৃত্তি অনুপপন্ন হয়। অর্থাৎ বৈধকার্য্য করিলে তন্নিবন্ধন যে ধর্ম্ম উৎপন্ন হয়, তাহা হইতেই জন্মান্তরে সুখ উৎপন্ন হয়, উক্ত ধর্ম্ম শরীরবৃত্তি স্বীকার করিলে প্রতিজন্মে শরীরের ভিন্নতা হেতু পূর্ব্বজন্মের শরীর পরজন্মে না থাকায় আশ্রয়ের অভাবহেতু ধর্ম্মেরও স্থিতি অসম্ভব হওয়ায় সুখ উৎপন্ন হইবে কোথায়? তবে আর তদভিপ্রায়ে ধর্ম্মাচরণ কিরূপে সঙ্গত হইতে পারে ইত্যাদি। অতএব এমন পদার্থকে আত্মা বলিয়া স্বীকার করিতে হইবে, যাহা জন্মান্তরেও সমভাবে অবস্থান করিয়া ধর্ম্মাধর্ম্মাদির আশ্রয় হইবে।

'যোঽহং গৌর আসং' অর্থাৎ যে আমি গৌরবর্ণ ছিলাম 'সোঽহং সম্প্রতি কৃষ্ণঃ' সেই আমি এখন কৃষ্ণবর্ণ ইত্যাদিরূপে গৌরত্ব ও কৃষ্ণত্ব শরীরের ধর্ম্ম যে আত্মার ধর্ম্ম বলিয়া প্রতীত হয়, উহা ভ্রমমাত্র, কারণ পূর্ব্বোক্ত প্রতীতি দ্বারা উহা বাধিত হইয়া থাকে। অবস্থাভেদে শরীরের ভেদ থাকায় উক্ত গৌরত্ব ও কৃষ্ণত্বের সামানাধি-করণ্য প্রতীতিকেও ভ্রম বলিয়াই স্বীকার করিতে হয়। ইন্দ্রিয়সমূহও জন্মান্তরে বিভিন্ন বলিয়া পূর্ব্বোক্ত দোষেই ইন্দ্রিয়কেও সুখাদির আশ্রয় স্বীকার করা যায় না।

অন্য হেতুদ্বারাও সুখাদি যে শরীর বা ইন্দ্রিয়ের গুণ নহে ইহা সাধন করা যাইতে পারে; যথা—'পাদে মে সুখং' অর্থাৎ আমার চরণভাগে সুখ এবং 'শিরসি মে বেদনা' অর্থাৎ আমার মস্তকভাগে দুঃখ এইরূপে সুখ ও দুঃখাদির একদেশমাত্রবৃত্তিত্ব প্রতীত হয় বলিয়া উহা শরীর বা ইন্দ্রিয়ের গুণ হইতে পারে না। শরীর বা ইন্দ্রিয়ের গুণ রূপাদি ব্যাপ্যবৃত্তি, অব্যাপ্যবৃত্তি নহে। একদেশপদ-দ্বারা এস্থলে অব্যাপ্যবৃত্তিত্ব দৈশিক ধরিতে হইবে। অতএব উৎপত্তিকালে শরীর

ও ইন্দ্রিয়ে রূপাদির অভাববশতঃ তাহাতে কালিক অব্যাপ্যবৃত্তিত্ব থাকিলেও ব্যভিচার হইবে না।

অন্য হেতুদ্বারাও উহা সাধন করা যায় যথা,—সুখাদির আশ্রয় বর্ত্তমান থাকিতেও যখন ঐ আশ্রয়ে স্বসমানজাতীয় সমস্ত সুখ দুঃখাদিগুণের অভাব থাকে, তখন উহা শরীর বা ইন্দ্রিয়ের গুণ নহে। শরীর বা ইন্দ্রিয় কখনও স্বীয় গুণ রূপাদি সমস্তগুণের অভাবযুক্ত দেখা যায় না। ইহাও উৎপত্তিক্ষণ ব্যতীতই বুঝিতে হইবে। তাহা না হইলে উৎপত্তিক্ষণে শরীরাদিতে উক্ত অভাব থাকায় ব্যভিচার হইতে পারে।

অন্য হেতুদ্বারাও উহা সাধন করা যায় যথা,—সুখাদি যখন বাহ্যেন্দ্রিয়প্রত্যক্ষের বিষয়ীভূত গুণত্বব্যাপ্য জাতিশূন্য, তখন উহা শরীর বা ইন্দ্রিয়ের গুণ হইতে পারে না। ইন্দ্রিয়ের গুণ রূপাদিতে বাহ্যেন্দ্রিয়প্রত্যক্ষের বিষয়ত্ব না থাকিলেও বাহ্যেন্দ্রিয়প্রত্যক্ষের বিষয়ীভূত গুণত্বব্যাপ্য রূপত্বাদি জাতি থাকায় ব্যভিচারের আশঙ্কা নাই।

অপর হেতু দ্বারাও উহা সাধন করা যায় যথা,—অহংশব্দার্থের সহিত 'অহং শরীরী' অর্থাৎ আমার শরীর আছে এইরূপ ভেদপ্রতীতিই হইয়া থাকে, 'অহং শরীরং' অর্থাৎ আমি শরীর এরূপ অভেদপ্রতীতি হয় না, অতএব আত্মা শরীর-ভিন্ন। উক্ত অনুভব ও যুক্তিসমূহদ্বারা এইরূপে অবাধে আত্মপদার্থ অতিরিক্ত সিদ্ধ হইয়া থাকে।

উক্ত আত্মায় জ্ঞান, সুখ, দুঃখ, ইচ্ছা, দ্বেষ, প্রযত্ন, ধর্ম্ম, অধর্ম্ম, সংস্কার, সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ ও বিভাগ এই চতুর্দ্দশটী গুণ আছে। উক্ত গুণ বৈশেষিকসূত্রকারের মত সিদ্ধ।

বৈশেষিকসূত্রে জ্ঞানাদিকে আত্মার লিঙ্গ বলা হইয়াছে, অতএব জ্ঞানাদি আত্মার গুণ স্বীকার না করিলে ঐ উক্তি অসঙ্গত হয়।

বিহিত ও নিষিদ্ধ কর্ম্ম হইতে ধর্ম্ম ও অধর্ম্ম উৎপন্ন হয়, ইহা স্বীকার না করিলে কালান্তরে সুখ দুঃখাদির উৎপত্তির বিরোধ ঘটে, কারণ কর্ম্ম বহুকাল পূর্ব্বে নষ্ট হইয়া যাওয়ায় কার্য্যের অব্যবহিত পূর্ব্বে না থাকায় উক্ত কর্ম্মকে সুখদুঃখাদির কারণ বলা যায় না। এই জন্য এমন একটী বস্তু স্বীকার করিতে হয়, যাহাকে দ্বার করিয়া সুখ দুঃখাদির প্রতি কর্ম্ম কারণ হইতে পারে। ঐ বস্তুই ধর্ম্ম ও অধর্ম্ম।

স্মৃতির প্রতি পূর্ব্বানুভব কারণ, যেহেতু অননুভূত বিষয়ের কদাপি স্মৃতি হয় না। অনুভবও বহুপূর্ব্বে নষ্ট হইয়া যায়, স্মৃতির পূর্ব্বে থাকে না, অতএব সংস্কার নামে একটী গুণ উহার দ্বাররূপে সিদ্ধ হয়।

আত্মার সংখ্যা বহুত্ব ও পরিমাণ পরমমহৎ। কারণ আত্মা এক স্বীকার করিলে কেহ মুক্ত, কেহ বদ্ধ; কেহ সুখী. কেহ দুঃখী ইত্যাদি বিভিন্নরূপ ব্যবস্থা প্রভৃতি সঙ্গত হয় না। উক্ত যুক্তিদ্বারা বেদান্তের একাত্মবাদ মত খণ্ডিত হইয়া থাকে। আত্মার পরমমহৎপরিমাণ স্বীকার না করিলে মূর্ত্তত্ব স্বীকার করিতে হয়, উহা অত্যন্ত অন্যায্য, যেহেতু কারণান্তরবশতঃ আত্মার নিত্যত্ব সিদ্ধ থাকায় নিত্যত্ব ও মূর্ত্তত্ব এই উভয় স্বীকার করিলে উহাকে পরমাণু স্বরূপ বলিতে হয়, তাহাতে জ্ঞানাদির প্রত্যক্ষ হইতে পারে না ইত্যাদি নানা দোষ উপস্থিত হয়। যদি জ্ঞানাদির প্রত্যক্ষপ্রভৃতির উপপত্তির জন্য আত্মাকে অবয়বী স্বীকার করা হয়, তবে আত্মার নিত্যত্ব সম্ভব হয় না, কারণ এমন কোন সাবয়ব বস্তু নাই, যাহা নিত্য। অথচ শ্রুতি স্মৃতি ও যুক্তিবলে আত্মাকে নিত্যই স্বীকার করিতে হইবে। অতএব আত্মার পরিমাণ পরমমহৎ ইহাই সুসঙ্গত। ইহা দ্বারা জৈনমতসিদ্ধ আত্মার দেহ-পরিমাণবাদ নিরস্ত হইয়াছে।

সুখাদির উৎপত্তি প্রভৃতির অনুরোধে আত্মার সংযোগ ও বিভাগাদিও মানিতে হইবে। আত্মা ও মনের সংযোগ সুখাদির কারণ। বিভাগ উক্ত সংযোগের নাশক। উহা স্বীকার না করিলে সর্ব্বদা সুখাদির উৎপত্তি হইতে আর বাধা থাকে না। ঐরূপে আত্মার চতুর্দ্দশটী গুণই সিদ্ধ হয়।

উক্ত যুক্তি প্রভৃতি দ্বারা আত্মার সগুণত্ব প্রমাণিত হওয়ায় কপিলাদিসম্মত আত্মার নির্গুণত্ব মত নিরস্ত হইয়াছে। মুক্তি অবস্থায় আত্মাতে কোনও বিশেষ-গুণ থাকে না বলিয়া নির্গুণত্ব শ্রুতিগুলি আত্মার মুক্তি অবস্থায়ই সঙ্গত হইতে পারে।

प्रशस्तपादभाष्यम्

मनस्त्वाभिसम्बन्धान्मनः(१)। सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीना(२)मभूतत्वोत्पत्तिदर्शनात् * करणान्तरमनुमीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्ति (३) दर्शनात् वाह्येन्द्रियैरगृहीतसुखादिग्राहकान्तराभावाच्च (४) अन्तःकरणम्।

तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः। प्रयत्नज्ञानायौगपद्यवचनात् प्रतिशरीरमेकत्वं(५) सिद्धम्। पृथक्त्वमत एव। तद्भाववचनादणुपरिमाणम्। अपसर्पणोपसर्पणवचनात् संयोगविभागौ। मूर्त्तत्वात् परत्वापरत्वे संस्कारश्च। अस्पर्शत्वात् द्रव्यानारम्भकक्रियावत्त्वात् (६) मूर्त्तत्वम्। साधारणविग्रहवत्त्वप्रसङ्गात् अज्ञत्वम्। करण-

---

(१) मनस्त्वयोगान्मन इति पाठान्तरम्।

(२) सुखदुःखादीनामिति ज्ञानसुखदुःखानामिति च पाठान्तरे।

* सर्वत्र भाष्यादर्शेषु अभूत्वोत्पत्तिदर्शनादिति पाठो लभ्यते, परन्तु सूत्रादर्शानुरोधात् अभूतत्वोत्पत्तिदर्शनादिति पाठः कल्पितः।

(३) स्मृत्युपपत्तेरिति पाठान्तरम्।

(४) बाह्यान्तरभावाच्चेति पाठान्तरम्।

(५) प्रतिशरीरमेकमिति पाठान्तरम्।

(६) क्रियावचनादिति अस्पर्शवत्त्वात् द्रव्यानारम्भकत्वं क्रियावत्त्वादिति च पाठान्तरम्।

भावात्(७) परार्थम्। गुणवत्त्वात् द्रव्यम्। प्रयत्नादृष्टपरिगृहीतत्वाच्च आशुसञ्चारितेति(८)।

इति प्रशस्तपादभाष्ये द्रव्यपदार्थः (९)

[आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्—३-अ-२आ-१सू। प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्—३अ-२आ—३सू। तदभावादणु मनः—७अ-१आ-२३सू। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चादृष्टकारितानि—५अ-२आ-१७सू। एकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च—७अ-२आ-२१सू। तदलिङ्गमेकद्रव्यत्वात् कर्म्मणः—२अ-१आ-२१सू। तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते—३अ-२आ-२सू। इत्येतान्यालम्बनसूत्राणि।]

जगदीशसूक्तिः

मन आह मनस्त्वेति। ज्ञानजनकसंयोगहेतुक्रियाजनकतावच्छेदको मनस्त्वं नाम जातिविशेषः। स च अतीन्द्रियः ऐन्द्रियकावृत्तित्वात् तदभिमतसम्बन्धादित्यर्थः। मनोऽभावे मनस्त्वाभावात् मनसि प्रमाणमाह सत्यपीति। आत्मन इन्द्रिये इन्द्रियस्यार्थे विषये सान्निध्ये सन्निकर्षे सत्यपि ज्ञानसुखादीनामभूतत्वोत्पत्तिदर्शनात् कदाचिदभूतत्वकदाचिदुत्पन्नत्वदर्शनात् करणान्तर(१०)मनुमीयत इत्यर्थः। तच्च करणं मन इत्यर्थः। अयमर्थः—आत्मेन्द्रियार्थसान्निध्ये कारणे सत्यपि ज्ञानसुखादीनामभूतत्वं कारणान्तरविरहादेव, अनन्तरं तेषामुत्पत्तिश्च

---

(७) स्वयं करणभावादिति पाठान्तरम्।

(८) परिग्रहवशादाशुसञ्चारि चेति पाठान्तरम्।

(९) प्रशस्तकरीयभाष्ये इति प्रशस्तदेवाचार्य्यविरचिते वैशेषिकभाष्ये इति च पाठान्तरे।

(१०) कारणान्तरमिति पाठान्तरम्। भाष्येऽपि तत्र तत् पाठान्तरं सम्भाव्यते।

कारणान्तरप्राप्त्या इत्यतस्तत्कारणमन्यासम्भवात् मन एव कल्प्यत इत्यर्थः। अन्यासम्भवस्तु अन्यस्मिन् समस्ते सत्यपि तदनुत्पत्तिदर्शनाद् बोध्यः।

मनःसाधकं हेत्वन्तरमाह श्रोत्रादीति। ननु स्मृतिरिन्द्रियेणैव जन्यत इत्यत आह श्रोत्रादीति—श्रोत्रादीन्द्रियाणामव्यापारे सत्यपीत्यर्थः। न च (११) स्मृतिः संस्कारेणैव जन्यतां किं मनसेति वाच्यं स्मृतेः कादाचित्कत्वानुपपत्तेः। संस्कारस्य नित्यत्वमपि सत्त्वात् व्याप्रियमाणं मनः सहकारित्वं यदा समासादयति, तदा संस्कारः स्मृतिं जनयति नान्यदेत्यविरोधः।

मनःसाधकं हेत्वन्तरमाह बाह्येति—ग्राहकान्तराभावादिति। अनेनेन्द्रियविशेषग्राह्यत्वमनुमेयमिति दर्शितम्। तथा च सुखादिकमिन्द्रियग्राह्यम् बाह्येन्द्रियाग्राह्यत्वे सति ग्राह्यत्वादितीन्द्रियविशेषो मनः सिध्यतीत्यर्थः।

तस्य गुणानाह तस्य गुणा इति। परत्वापरत्वे दैशिके। संस्कारो वेगाख्यः। तत्र संख्यां साधयति प्रयत्नज्ञानेति। प्रतिशरीरमेकत्वं एकैकत्वमित्यर्थः। अत्र हेतुमाह प्रयत्नज्ञानेति—प्रयत्नानां ज्ञानानाञ्च युगपदुत्पत्त्यभावादित्यर्थः। प्रतिशरीरमनेकत्वे अनेकैर्मनोभिर्युगपदनेकप्रयत्ना अनेकानि ज्ञानानि चोत्पद्येरन् इत्यर्थः। प्रयत्नोऽत्र ज्ञानजनकसंयोगहेतु-मनःक्रियाजनकः, ज्ञानायौगपद्यादेव तदयौगपद्यमुन्नेयम्।

पृथक्त्वमत एवेति अनेकत्वादेवेत्यर्थः। तस्याणुपरिमाणे सूत्रकारसम्मतिमाह तदभावेति। तदभावादणु मन इति सूत्रे तत्पदेन वैभवं परामृष्टं, वैभवाभावादणु इत्यर्थः। वैभवाभाव एव मनसः कुत इति चेद् युगपज्ज्ञानाभावात्। वैभवे सति एकदा सकलेन्द्रियसन्नि-

(११) ननु इति पाठान्तरम्।

कर्षे युगपदनेकानि ज्ञानादीनि स्युः। न चैवम् वैभवाभावादपरममहत्त्व-मेवास्तु, अणुत्वं कुतः, अपरममहत्त्वेऽपि वैभवाभावोपपत्तेरिति वाच्यं अपरममहत्त्वेऽपि ज्ञानयौगपद्यापत्तेर्दुर्वारत्वात्।

संयोगविभागसिद्धौ सूत्रकारसम्मतिमाह अपसर्पणेति। अपसर्पण-मुपसर्पणमशितपीतसंयोगाः कार्य्यान्तरसंयोगाश्चादृष्टकारितानीति सूत्रवचने चापसर्पणं पूर्वशरीरसंयोगनाशकविभागहेतुर्मनःकर्म्म, उप-सर्पणमुत्तरशरीरसंयोगहेतुमनःक्रिया ततः संयोगविभागौ सिद्धा-वित्यर्थः।

मूर्त्तत्वादिति—मनः परत्वापरत्ववत् वेगाख्यसंस्कारवच्च मूर्त्त-त्वात् घटवदित्यनुमानात् मनसि परत्वापरत्वसंस्काराः सिद्धा इत्यर्थः। तस्य मूर्त्तत्वं साधयति अस्पर्शत्वादिति। द्रव्यारम्भिका क्रिया स्पर्श-वतामेव मनसस्त्वस्पर्शत्वात् द्रव्यानारम्भिकैव क्रिया तद्वत्त्वान्मूर्त्तत्व-मित्यर्थः। यद्यपि क्रियावत्त्वादेव मूर्त्तत्वं सिध्यति तथापि द्रव्या-रम्भिका क्रिया मनसो नास्तीत्येतत्प्रदर्शनपरमेव द्रव्यानारम्भि[म्भ]केति क्रियाविशेषणम्। अस्पर्शत्वात् द्रव्यानारम्भिका क्रिया ततो मूर्त्तत्व-मित्यर्थः।

ननु मनसो ज्ञानकरणत्ववत् ज्ञातृत्वमपि स्यादविरोधादित्यत आह साधारणेति। मनोऽज्ञम् अज्ञातृ। तत्र हेतुमाह साधारणेति। विग्रहः शरीरं तद्वत्त्वं तदधिष्ठितत्वं शरीरस्य आत्मसाधारण्येन मनो-ऽधिष्ठितत्वप्रसङ्गादित्यर्थः। शरीरमात्मना मनसा च ज्ञात्रा अधिष्ठितं स्यादिति क्रियावत्। न च तथात्वे किमनिष्टमिति वाच्यं चैत्रात्मनः पराधिष्ठिते शरीरे स्वेच्छया प्रवृत्तिनिवृत्त्यधीनक्रियाजनननियमो न स्यात्। न हि मैत्रात्माधिष्ठिते शरीरे चैत्रात्मना प्रवृत्तिनिवृत्तिजन्य-क्रिया जन्यते, यदि च पराधिष्ठितत्वेऽपि स्वाधिष्ठिते प्रवृत्तिनिवृत्त्य-धीनक्रिया जन्यत इत्युच्यते, तदा तयोरेकेन प्रवृत्तौ अन्येन निवृत्तौ

इच्छया विरोधिन इयमपि न स्यात्। इत्थं मनसो न ज्ञातृत्वम्, किन्तु ज्ञानकरणत्वमेव। तथाच परनिष्ठज्ञानजनकत्वेन परार्थमेवेत्याह करणभावादिति करणत्वमात्रादित्यर्थः।

संख्याद्यष्टगुणास्तत्र साधिता अत एव तस्य द्रव्यत्वमित्याह गुणवत्त्वादिति। तस्याशुसञ्चारित्वे हेतुमाह प्रयत्नेति। क्वचिदात्मनः प्रयत्नेन क्वचिददृष्टेन परिगृहीतत्वाच्च आलिङ्गितत्वाच्च आशुसञ्चारितेत्यर्थः।

इति महामहोपाध्याय-श्रीजगदीशभट्टाचार्य्यतर्कालङ्कारकृता द्रव्यभाष्यसूक्तिः समाप्ता *।

सूक्तिदीपिका

अथोद्देशक्रमप्राप्त्या द्रव्येषु मन एवेदानीं निरूपयितुमवशिष्यते, अतस्तदेवेदानीं निरूपयति इत्याह मन इत्यादि। मनस्त्वेत्यादिभाष्यग्रन्थस्य पूर्ववद् व्याख्यानमवसेयम्।

मन इति संज्ञायाः परिभाषिकत्वं वा नैमित्तिकत्वं वा औपाधिकत्वं वेति संशये मनस्त्वस्य जातित्वं निर्दिश्य मनःसंज्ञाया नैमित्तिकत्वमावेदयति ज्ञानेत्यादिना। जात्यवच्छिन्नवाचकशब्दस्य नैमित्तिकत्वमिति निरुक्तपूर्वमाकाशनिरूपणग्रन्थे सूक्तिदीपिकायामेवास्माभिः।

ज्ञानजनकेत्यादि—ज्ञानजनकसंयोगः आत्ममनःसंयोगः तद्धेतुः क्रिया मनःक्रिया आत्मनो विभुत्वेन निष्क्रियत्वात् कर्म्मजसंयोगे प्रतियोग्यनुयोगिक्रियाया एव जनकत्वात्। अतस्तत्क्रियाजनकतावच्छेदकतया मनस्त्वजातिसिद्धिः। तथा चायं प्रयोगः ज्ञानसामान्यजनकसंयोगहेतुक्रियाजनकता

---

* क्वचित् पुस्तके 'समाप्तोऽयं ग्रन्थ' इत्येतन्मात्रं, क्वचित 'इति महामहोपाध्यायभट्टाचार्य्यतर्कालङ्कारकृत-द्रव्यभाष्यटीका समाप्ते'ति, क्वचिच्च 'इति श्रीजगदीशभट्टाचार्य्यकृता द्रव्यभाष्यसूक्तिः समाप्ते'ति पुष्पिका लभ्यते। अस्माभिस्तु सर्वासां विचारेण एषा पुष्पिका परिकल्पिता।

किञ्चिद्धर्मावच्छिन्ना जनकतात्वात् दण्डादिनिष्ठघटादिजनकतावत्, धर्मस्य जातित्वे लाघवमिति लाघवज्ञानसहकाराच्च अवच्छेदकतया सिद्धस्य धर्मस्य जातित्वसिद्ध्या मनस्त्वजातिसिद्धिरिति भावः।

ऐन्द्रियकावृत्तित्वादिति – इन्द्रियजन्यप्रत्यक्षविषयासमवेतत्वादित्यर्थः। तेन कालिकादिना मनस्त्वस्य ऐन्द्रियकघटादिवृत्तित्वेऽपि न स्वरूपासिद्धिः, कालिकादिसम्बन्धावच्छिन्नैन्द्रियकवृत्तित्वस्य तत्र सत्त्वेऽपि समवायसम्बन्धावच्छिन्नतादृशवृत्तित्वाभावस्य तत्रानपायात्।

तदभिमतेति—पूर्ववत् समवायसम्बन्धादित्यर्थः। अत्रापि तत्सम्बन्धमन्तर्भाव्य मनः पक्षीकर्त्तव्यमित्याद्यर्थोऽनुसर्त्तव्यः।

स्मृतेः कादाचित्कत्वानुपपत्तेरिति—न च संस्कारस्य उद्बोधकसमवधानेनैव स्मृतिजनकतानियमात् उद्बोधकानाञ्च अननुगमात् यत्र यत्र वस्तुगत्या स्मृतिस्तत्र तत्रैव वर्त्तमानानां वस्तुविशेषाणां क्लृप्तसंयोगादीनाम् उद्बोधकत्वकल्पनया स्मृतेः कादाचित्कत्वस्य शक्योपपादनत्वे किमित्यतिरिक्तेन मनसेति वाच्यं सम्बन्धिज्ञानादीनामनुगतोद्बोधकानामपि सत्त्वेन तत्समवधानस्थले स्मृतिप्रसङ्गस्य तथापि वारयितुमशक्यत्वादित्यादिकमूहनीयम्।

इन्द्रियविशेषेति—बाह्येन्द्रियभिन्नेन्द्रियविशेषेत्यर्थः। तथाहि प्रकृते इन्द्रियग्राह्यत्वसाधकनिरुक्तहेतुघटकसत्यन्तदलेन पक्षे इतरबाधस्य उपपन्नतया व्यापकतानवच्छेदक—बहिरिन्द्रियभिन्नेन्द्रियग्राह्यतात्वेन साध्यसिद्ध्या अतिरिक्तस्य मनसः सिद्धिरिति महानसीयवह्नीतरवह्न्यभाववत्पर्वतकालीनधूमादिहेतुना वह्निव्याप्यतादृशधूमवान् पर्वत इति परामर्शविषयेणापि पर्वते महानसीयवह्निसिद्ध्यादिवत्। इतरबाधलाघवज्ञानादिसहकारेण सामान्यव्याप्तिज्ञानादपि व्यापकतानवच्छेदकविशेषधर्मप्रकारेण साध्यसिद्धेः पक्षताप्रकरणादौ स्वयं जगदीशादिभिरुपदिष्टत्वात्।

दैशिके इति—कालिकपरत्वापरत्वयोरनित्यत्वव्याप्यतया नित्यस्य मनसो न कालिकपरत्वापरत्वयोर्ज्येष्ठत्वकनिष्ठत्वलक्षणयोः सम्भव इति मनसः परत्वापरत्वयोर्दैशिकत्वमवगन्तव्यमिति भावः।

प्रयत्नानामित्यादि—तथाहि यदा येनावयवेन मनसः संयोगः, तदा तदवयवावच्छेदेन प्रयत्नोत्पादो नान्यावयवावच्छेदेन। यदि मनसः प्रतिशरीरमने-

कत्वं स्यात्, तदा प्रतिशरीरमनेकावयवावच्छेदेनानेकेषां मनसां संयोगसम्भवादेकदा एकस्मिन्नात्मनि प्रयत्नद्वयोत्पादप्रसङ्गः। एकदा प्रयत्नद्वयाभावेऽपि अनेकावयवावच्छेदेन प्रयत्नजन्यानेकक्रियायौगपद्यप्रतीतिस्तु उत्पलशतपत्रव्यतिभेदयौगपद्यप्रतीतिवत् भ्रमरूपा मन्तव्या मनस आशुसञ्चारिताया भाष्यादिभिरेव निर्वचनात् तदुपपत्तेः। मनसो नानात्वे एकस्य पुरुषस्य मनसामेकदैव चक्षुराद्यनेककरणसम्बन्धात् ज्ञानद्वययौगपद्यं दुरपह्नवं स्यादत एकमेव प्रतिशरीरं मनो यत्सम्बन्धासम्बन्धकृतौ तत्तदिन्द्रियादिजन्यज्ञानभावाभावौ न विरुध्येते इति तत्त्वम्। उक्तञ्चोपस्कारग्रन्थे शङ्करमिश्रैः—'यद्येकैकस्मिन्नपि शरीरे बहूनि मनांसि स्युस्तदा ज्ञानप्रयत्नानां यौगपद्यं स्यात्। यत्तु नर्त्तकीकरचरणाङ्गुलीषु युगपत् कर्म्मदर्शनाद् युगपदेव बहवः प्रयत्ना उत्पद्यन्त इति मतं, तदयुक्तं मनसः शीघ्रसञ्चारादेव तदुपपत्तेः, अविनश्यदवस्थयोग्यात्मविशेषगुणानां यौगपद्यानभ्युपगमात्' इत्यादि।

ततः संयोगविभागाविति—कारणसत्त्वे कार्य्यानुत्पादे व्यभिचारात् तथाभूतक्रियासत्त्वमेव संयोगविभागानुमापकमिति भावः।

परत्वापरत्ववदिति—दैशिकपरत्वापरत्ववदित्यर्थः। इतरयोः कालिकपरत्वापरत्वयोर्मनसि वाधस्य निरुक्तपूर्व्वत्वात्।

तत्प्रदर्शनपरमेवेति—न तु हेतुघटकतयापि तत् प्रविष्टमित्येवकारव्यवच्छेद्यम्, क्रियावत्त्वहेतोरेव मूर्त्तत्वाव्यभिचारेण द्रव्यानारम्भकत्वस्य प्रकृते व्यर्थविशेषणताप्रयोजकत्वादिति।

इति श्रीकालीपदतर्काचार्य्यकृतायां महामहोपाध्याय श्रीजगदीशतर्कालङ्कारकृत-द्रव्यभाष्यसूक्तिविवृतौ सूक्तिदीपिकायां

द्रव्यग्रन्थः समाप्तः।

ভাষ্যতাৎপর্য্য

যথাক্রমে অপরাপর সকল দ্রব্যই নিরূপণ করা হইয়াছে, এখন কেবল মনঃপদার্থই অবশিষ্ট আছে, সম্প্রতি উহা নিরূপিত হইতেছে। মনস্ত্বজাতির

সম্বন্ধ প্রযুক্তই মনকে ইতর বস্তু হইতে পৃথক্‌রূপে বুঝিতে হইবে। উক্ত মন ইন্দ্রিয়গ্রাহ্য নহে, এই জন্য মনস্ত্বজাতিকেও অতীন্দ্রিয় জানিবে। আত্মার সহিত ইন্দ্রিয় ও ইন্দ্রিয়ের বিষয় উভয়ের সন্নিকর্ষ থাকিলেও জ্ঞানাদি কখনও হয় এবং কখনও হয় না দেখিতে পাওয়া যায়, কাজেই কেবল মাত্র আত্মা ও ইন্দ্রিয়াদির সম্বন্ধকেই জ্ঞানাদির কারণ বলিলে চলে না। যদি উহা বলা হয় তবে কারণ থাকিতে কার্য্যের উৎপত্তি না হইবে কেন? এই জন্যই অপর এমন একটী ইন্দ্রিয় মানিতে হইবে, যাহার সম্বন্ধ সহকারী থাকিলে জ্ঞানাদি উৎপন্ন হইবে, না থাকিলে হইবে না উহাই মনঃপদার্থ।

যৎকালে বহিরিন্দ্রিয়রূপে প্রসিদ্ধ শ্রোত্রাদির ব্যাপার থাকে না, তৎকালেও স্মৃতি উৎপন্ন হইয়া থাকে, এই জন্য বহিরিন্দ্রিয় শ্রোত্রাদিভিন্ন একটী করণ অনুমিত হইতে পারে। বহিরিন্দ্রিয়ের ব্যাপার না থাকিলেও উক্ত মনোরূপ অন্তরিন্দ্রিয়ের ব্যাপারবশতই তৎকালে স্মৃতি হইবে। মনের ব্যাপার ও বহিরিন্দ্রিয়ের ব্যাপার কোনওরূপ ব্যাপার সে স্থলে কারণ বলিয়া না মানিলে অবিশেষে সর্ব্ব বস্তুরই স্মৃতির একদা আপত্তি হয়। মন স্বীকার করিলে যখন যে বিষয়ে মনোব্যাপার সংস্কারের সহকারিতা প্রাপ্ত হয়, তখনই সেই বিষয়ের স্মৃতি হয়, অন্য বিষয়ের স্মৃতি হইতে পারে না।

অন্য হেতুদ্বারাও মনের অনুমান করা যায় যথা,—'অহং সুখী' ইত্যাদিরূপে সুখাদির প্রত্যক্ষ হইয়া থাকে, অথচ কোনও বহিরিন্দ্রিয়ের সুখাদির সহিত কোনও সম্বন্ধ নাই, কাজেই সুখের গ্রাহক একটী ইন্দ্রিয় কল্পিত হওয়ায় উহাই মনোরূপ অন্তঃকরণ বুঝিতে হইবে।

এইরূপে মনঃপদার্থ সিদ্ধ করিয়া তাহার গুণসম্বন্ধে আলোচনা করিতে গিয়া ভাষ্যকার বলেন যে,—সংখ্যা, পরিমাণ, পৃথক্ত্ব, সংযোগ, বিভাগ, দৈশিক পরত্ব ও অপরত্ব, এবং বেগাখ্য সংস্কার এই কয়টী মনের গুণ। উক্ত গুণবত্ত্ব হেতুদ্বারাই উহার দ্রব্যত্ব সিদ্ধ হইয়া থাকে। মন প্রতিশরীর ভেদে এক একটী। প্রতি-শরীরে অনেক মন স্বীকার করিলে একদা বহু মন বহুবিষয়ে সংযুক্ত হইতে পারায় আত্মাতে একদা বহু প্রযত্ন ও জ্ঞানের উৎপত্তি হইতে পারে, কিন্তু তাহা কখনও হয় না। আর প্রতিশরীরে এক একটী মন স্বীকার করিলে সেই একটী মন যখন যে শরীরাবয়বে সংযুক্ত থাকে, তখন সেই শরীরাবয়বাবচ্ছেদে আত্মার প্রযত্ন

ও যখন যে ইন্দ্রিয়ের সহিত সেই একটী মন সংযুক্ত থাকে, তখন সেই ইন্দ্রিয়জন্য জ্ঞানমাত্রই উৎপন্ন হইতে পারে। কাজেই কোনওরূপ অতিপ্রসঙ্গাদি দোষ সম্ভব হয় না।

মনঃপদার্থ শরীরভেদে অনেক বলিয়া পৃথক্‌ত্ব ধর্ম্ম তাহাতে অবশ্যই আছে। মন অণু-পরিমাণ। পরমমহৎপরিমাণ বা মধ্যমপরিমাণ নহে। কারণ মন বিভু অর্থাৎ পরমমহৎপরিমাণ স্বীকার করিলে একদা সর্ব্ববিষয়ের সহিত সম্বন্ধ থাকায় যুগপৎ অনেকবিধ জ্ঞানের আপত্তি হয়। মধ্যমপরিমাণ স্বীকার করিলেও বহুবিষয়ের সহিত একদা সম্বন্ধ থাকায় উক্ত দোষ পরিহার করা অসম্ভব হয় ও মনে অনিত্যত্বের আপত্তি হয়।

মনে মূর্ত্তত্ব অর্থাৎ নিকৃষ্টপরিমাণবত্ত্ব আছে বলিয়া উহাতে পরত্ব অপরত্ব ও বেগাখ্যসংস্কারও সিদ্ধ হইয়া থাকে। মূর্ত্তপদার্থ ব্যতীত ক্রিয়াবান্ হয় না, কাজেই মনের ক্রিয়া আছে বলিয়াই মূর্ত্তত্ব সিদ্ধ হইয়া থাকে। উক্ত মনের ক্রিয়া কোনও দ্রব্যের আরম্ভক নহে।

সূত্রকার মনের অপসর্পণ উপসর্পণ প্রভৃতি দ্বারা সংযোগ ও বিভাগ জ্ঞাপন করিয়াছেন। মনের স্পর্শ না থাকায় উহা কোনও দ্রব্যের সমবায়িকারণ নহে। মনের চৈতন্য নাই, উহা অচেতন। মনেরও চৈতন্য স্বীকার করিলে শরীরকে যেমন আত্মাধিষ্ঠিত বলা হয় ঐরূপ মনোঽধিষ্ঠিত স্বীকার করিতে হয়। তাহা হইলে চৈত্রের আত্মা মনোরূপ অন্যবস্তুদ্বারা অধিষ্ঠিত শরীরে স্বেচ্ছায় প্রবৃত্তি নিবৃত্তি জন্য ক্রিয়া জন্মাইতে পারে না। মৈত্রের আত্মা দ্বারা অধিষ্ঠিত চৈত্রের শরীরে চৈত্র কখনও স্বেচ্ছায় প্রবৃত্তি নিবৃত্তিজন্য ক্রিয়া উৎপাদন করিতে পারে না। অতএব আত্মা ও মন এই দুইটীকে চেতন ও শরীরাধিষ্ঠান বলা যায় না। আর দুইটী চেতন দ্বারা আত্মা অধিষ্ঠিত স্বীকার করিলে একের প্রবৃত্তি ও অন্যের নিবৃত্তির ইচ্ছা হইতে পারায় বিরোধপ্রযুক্ত প্রবৃত্তি বা নিবৃত্তি কোনটীই হইতে পারে না। অতএব মন জ্ঞানের করণমাত্র জ্ঞানের আশ্রয় নহে।

মন পরবৃত্তি জ্ঞানের জনক হয়, অতএব উহা পরার্থ। উহাতে গুণবত্ত্ব আছে বলিয়া উহা দ্রব্য। মন অণুপরিমাণ অথচ গতিশীল বলিয়া অত্যন্ত শীঘ্রগামী, কাজেই ক্ষণকালের মধ্যে সুমেরু পর্ব্বতাদিতে মনের গতি সম্ভব হওয়ায় 'মনসা মেরুং গচ্ছতি' অর্থাৎ মনের দ্বারা সুমেরু পর্ব্বতে যাইতেছে ইত্যাদি প্রয়োগ সঙ্গত

হয়। মনের ঐ শীঘ্রগামিত্বের প্রতি কোনও স্থলে আত্মার প্রযত্নবিশেষ ও কোনও স্থলে অদৃষ্টবিশেষই কারণ জানিবে। কাজেই অন্য বস্তুর সহিত পৃথক্‌রূপে ইহার আশুগতি অসঙ্গত নহে।

ইতি শ্রীকালীপদতর্কাচার্য্যকৃত প্রশস্তপাদভাষ্যতাৎপর্য্যে

দ্রব্যগ্রন্থ সমাপ্ত।

मुद्राप्यमाणग्रन्थाः—

आनन्दलतिका—सरलोक-कृष्णनाथविरचितं काव्यम्।

यात्रातत्त्वम्—रघुनन्दनभट्टाचार्य्यविरचितम्।

मुद्रापणार्थं गृहीता ग्रन्थाः—

छान्दोग्यमन्त्रभाष्यम्—सायणपूर्व्ववर्त्ति गुणविष्णुकृतम्।

ऋग्वेदप्रातिशाख्यम्—शौनककृतम्।

प्रमेयरत्नावली—बलदेवविद्याभूषणकृता गौड़ीयवैष्णवदर्शन-
प्रकरणग्रन्थरूपा।

सङ्गतिवादः—गदाधरभट्टाचार्य्यकृतः।

समञ्जसावृत्तिः—अनुपनारायणशिरोमणिकृता ब्रह्मसूत्रवृत्तिः।

संस्कृतसाहित्यपरिषद्ग्रन्थमाला

	मूल्यम्	
	साधारणानाम्	सदस्यानाम्
कालीतत्त्वम्—सटीकानुवादम्	॥৵०	॥०
शङ्करीसङ्गीतम्—शङ्करीविषयकं गीतगोविन्दानुकरण-काव्यम्	।৵०	।०
मुक्तिवादः—गदाधरभट्टाचार्य्यविरचितः टीकाद्वय-भाष्यानुवादसहितः	२)	१॥०
দুর্গোৎসবতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্ শারদীয়দুর্গোৎসবপ্রমাণপ্রয়োগতত্ত্বরূপম্	১।০	১৲
पितृदयिता—अनिरुद्धभट्टकृता सामवेदीय-सन्ध्याश्राद्धादिपद्धतिरूपा	१।०	१)
দুর্গোৎসবনিবন্ধকল্পম্—দুর্গোৎসববিবেকাদিগ্রন্থপঞ্চকাত্মকম্	॥০	।৶০
कारकोल्लासः—भरतमल्लिककृतः सोदाहरणकारकनिर्णयरूपः	৵०	৵०
ऋग्वेदभाष्योपक्रमणिका—सायणकृता आङ्गलभाषाटिप्पणसमेता	॥।०	॥৵०
গ্রহযাগতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্	।৶০	।৵০
प्रभाकरविजयः—नन्दीश्वरविरचितः प्रभाकरसम्प्रदायानुसारि-मीमांसाग्रन्थः ।	१।०	१)
তীর্থতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যবিরচিতম্ ।	।৶০	।৵০
पवनदूतम्—टिप्पनीपाठान्तरादिभिः समलङ्कृतम् । धोयीकवि-कृतम् ।	॥।०	॥৵०
नलदमयन्तीयम् (नाटकम्)—परिषदाचार्य्य--श्रीकालीपद तर्काचार्य्यकृतम् ।	१।०	१)
प्रशस्तपादभाष्यम्—जगदीशसूक्तिसहितम्, सम्पादककृतया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	१॥०

Jagadīśa Tarkālankāra
Praśastapādabhāṣyam